श्रीम

10 स्कंधः

१०

दशमस्कंधे उत्तरार्धे समाप्तम्

Shreemad Bhagavatam (10)

Dashamskandhe Uttarardh.

अथ

दशमस्कंधे-उत्तरार्धम्

भा०द०उ०
१

श्रीगणेशायनमः ॥ ततः पंचाशत्तमे तु जरासंधभयाद्दिव ॥ कारयित्वा वुधो दुर्गं तन्निनाय निजं जनं ॥ कपटान्न कपूटै रैवह
त्वा दैत्यानयत्ततः ॥ अत्र यच्च जरासंधं धर्मैर्लेवतु धाम्निकं ॥ अस्तिप्राप्तिसंज्ञिके द्वे यद्वः ॥१॥२॥ कंसस्त्रीकः क्रुद्धोऽमर्षेनान्वितो यु
तः ॥३॥ न्यरुणत् न्यरोध ॥४॥ तस्यैव वलं सैन्यं उद्वेलं तंघितमर्यादं ॥ सागरमिव तेने तस्य वलेन संरुद्धं ॥ किं वत्त्मेव हान्ति ॥ न

श्रीशुकउवाच ॥ अस्तिःप्राप्तिश्च कंसस्य महिष्यौ भरतर्षभ ॥ हतेभर्त्तरि दुःखार्त्ते ईयतुः स्मपि
तुर्गृहान् ॥१॥ पित्रेमगधराजाय जरासंधाय दुःखिते ॥ वेदयां चक्रतुः सर्वमात्मवैधव्यका
रणं ॥२॥ सतदप्रियमाकर्ण्य शोकामर्षयुतो नृप ॥ अयादवीं महीं कर्तुं चक्रे परममुद्यमं ॥३॥
अक्षौहिणीभिर्विंशत्या तिसृभिश्चापि संवृतः ॥ यदुराजधानीं मथुरां न्यरुणत्सर्वतो दिशं
॥४॥ निरीक्ष्य तद्बलं कृष्ण उद्वेलमिव सागरं ॥ स्वपुरं तेन संरुद्धं स्वजनं च भयाकुलं ॥ चिंतयामा
स भगवान् हरिः कारणमानुषः ॥ तद्देशकालानुगुणं स्वावतारप्रयोजनम् ॥६॥

मागधं ॥ मागधं वा हत्वा वलं गृह्णामि ॥ यद्वा ॥ समागधं सर्वं हन्मि ॥ इति चिंतयामास ॥ ननु प्रथमं कथं जेष्यामीति
वे चिंतयितुं युक्तं स्त्रत्राह ॥ कारणमानुष इति ॥ भूभारावतारकारणेन मानुषो न तत्त्वतः इति ॥५॥ ऽऽ ॥

भा० द० उ०
२

१४ दंशितौ बद्धकवचौ स्वायुधाढ्यौ सोभनायुधसंपन्नौ १५ १६ पुरुषात्त्र्यधमायस्मादितिवास्तवोऽर्थो हे पु
रुषोत्तमेति १७ गुप्तेनसर्वांतरत्वात् दर्शनानर्हेण हेअमंद व बध्नातीति बंधुरविद्यातांहंतीतितथा हेअविद्या

त्रयोविंशत्यनीकाख्यंभूमेर्भारमपाकुरु १४ एवंसंमंत्र्यदाशार्हौ दंशितौरथिनौपुरात्
निर्जग्मतुःस्वायुधाढ्यौबलेनाल्पीयसावृतौ १५ शंखंदध्मौविनिर्गत्यहरिर्दारुकसारथिः ततोऽ
भूत्परसैन्यानांहृदिवित्रासवेपथुः १६ तावाहमागधोवीक्ष्यहेकृष्णपुरुषाधम नत्वया
योद्धुमिच्छामिबालेनैकेनलज्जया १७ गुप्तेनहित्वयामंदनयोत्स्येहिबंधुहन् १८ तवरा
मयदिश्रद्धायुध्यस्वधैर्यमुद्वह हित्वावामच्छरैश्छिन्नंदेहंस्वर्याहिमांजहि १९ श्रीभग
वाउ वाच नवैशूराविकत्थंतेदर्शयंत्येवपौरुषं नगृह्णीमोवचोराजन्नातुरस्यमुमूर्षतः २० जरा
सुतस्तावभिसृत्यमाधवौमहाबलौघेनबलीयसावृणोत् ससैन्ययानध्वजवाजिसारथी सूर्या
नलौवायुरिवाभ्ररेणुभिः २१
निरसनेति याहिप्राप्नुहि १८ अच्छेद्यदेहोऽसाविति स्वयमेवमत्वा
अपरितोषात्पक्षांतरमाह यद्वा मांजहीति १९ यथाश्रुतार्थग्रहेणभगवतउत्तरं नवैशूराविकत्थंतेश्लाघंते २० माधवौ

मधुवंशोद्भवौ महासैन्यस्तुहेनवृतवान् वायुरभ्रैः सूर्य
रेणुभिश्चाग्निं यथेत्यदर्शनमेवाचरणमिति तिरस्कृतिं २१

२

एवं नैधा विचिंत्य प्रथमपक्षं निर्द्धारितवान् ॥ तदाह चतुर्भिः हनिष्यामीति ॥ ६ ॥ बलोद्यमं कर्त्ता करिष्यति ॥ ७ ॥ नन्वत
एव हंतव्यस्तत्राह ॥ एतदर्थ इति ॥ एतच्छब्दार्थस्य स्पष्टयति भूभारहरणायेति ॥ ८ ॥ अयमेतदर्थोऽवतार इत्युपलक्षणमि

हनिष्यामि बलं ह्येतद्भुवि भारं समाहितं ॥ मागधेन समानीतं वश्यानां सर्वभूभुजां ॥ अक्षौहिणी
भिः संख्यातं भटाश्वरथकुंजरैः ॥ ६ ॥ मागधस्तु न हंतव्यो भूयो कर्त्ता बलोद्यमं ॥ ७ ॥ एतदर्थोऽवतारोयं
भूभारहरणाय मे ॥ संरक्षणाय साधूनां कृतोन्येषां वधाय च ॥ ८ ॥ अन्योपि धर्मरक्षायै देहः संभ्रियते म
या ॥ विरामायाप्यधर्मस्य काले प्रभवतः क्वचित् ॥ ९ ॥ एवं ध्यायति गोविंद आकाशात्सूर्यवर्चसौ
रथावुपस्थितौ सद्यः ससूतौ सपरिछदौ ॥ आयुधानि च दिव्यानि पुराणानि यदृच्छया ॥ १० ॥ दृष्ट्वा
तानि हृषीकेशः संकर्षणमथाब्रवीत् ॥ ११ ॥ पश्यार्य व्यसनं प्राप्तं यदूनां त्वावतां प्रभो ॥ एष ते र
थ आयातो दयितान्यायुधानि च ॥ १२ ॥ यानमास्थाय जह्येतद्व्यसनात्स्वान्समुद्धर ॥ एतदर्थं
हि नौ जन्म साधूनामीश शर्मकृत् ॥ १३ ॥

त्याह अन्योपीति प्रभवतः उद्भवतः ॥ ९ ॥ ससूतौ सारथिसहितौ ॥ परिछदः परिकरः ध्वजकवचादिः तत्स
हितौ ॥ १० ॥ ११ ॥ त्वं अवंतस्त्वं रक्षको नाथो विद्यते येषां ते त्वावंतः तेषाम् ॥ १२ ॥ १३ ॥ ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ ॥

भा० द० उ० प्रसिद्धां नदीं निरूपकमाह ॥ भुजा एव अहयो यासु ताः ॥ पुरुषाणां शीर्षाण्येव कच्छपा यासु ताः ॥ हस्ता द्विपा एव द्वीपा अं
३ तर्वर्त्तितटानि ॥ ह्याएवग्रहा ग्राहास्तैश्चाकुला व्याप्ताः ॥ कराः क्षुरवश्च मीना यासु ताः ॥ नराणां केशा एव शैवालं यासु ताः
धनूंष्येव तरंगा आयुधान्येव गुल्मास्तैश्च संकुलाः ॥ अच्छूरिकाश्चर्माणि चक्राणि वा ता एव आवर्ताः तैर्भयानकाः ॥ महा
मणीनां प्रवेकाः उत्तमाः आभरणानि च यथार्थं ॥ अश्मानः शर्कराश्च यासु ताः ॥ भीरूणां भयावहाः ॥ मनस्विनां हर्षकर्यः

भुजाहयः पुरुषशीर्षकच्छपा हस्तद्विपद्वीपहयाग्रहाकुलाः ॥ करोरुमीना नरकेशशैवला धनुस्त
रंगायुधगुल्मसंकुलाः ॥ अच्छूरिकावर्त्तभयानका महामणिप्रवेकाभरणाश्मशर्कराः ॥ प्रवर्त्ति
ताभीरुभयावहा मृधे मनस्विनां हर्षकरीः परस्परं ॥ २५ ॥ विनिघ्नतारीन्मुसलेन दुर्मदान्संक
र्षणेनापरिमेयतेजसा ॥ बलं त्वदं गार्णववदुर्गभैरवं दुरंतपारं मगधेंद्रपालितं ॥ क्षयं प्रणी
तं वसुदेवपुत्रयोर्विक्रीडितं तज्जगदीशयोः परं ॥ २६ ॥

२५ ॥ किंच संकर्षणेनापि तद्बलं स्वयं प्रणीतं ॥ अंग हे राजन् ॥ अर्णववद्दुर्गं दुर्गमं ॥ भैरवं भयंकरं ॥ यतः अंतो ऽन्तः तत्पा
रमवधिः ॥ दुःशक्यो निषेध्ये ॥ विक्रमेणागाधम् ॥ देशतश्च निरवधिकमित्यर्थः ॥ किंच ॥ मगधेंद्रेण पालितं ॥ यदे
वं रामकृष्णयोः कर्मोक्तं ॥ तत्परं केवलं तयोर्विक्रीडितं ॥ न तु पराक्रमं ॥ २६ ॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ॥ ३

२२ परस्यानीकानि सैन्यानि तान्येव पयोमुचो मेघास्तेषां शिलीमुखा बाणास्तेषामत्युल्बणं वर्षं तेन पीडितं व्यस्फूर्जयत् तज्जं भि
तवान् ॥ २३ ॥ तदा हरगृह्णन्निति निषंगात् इषुधेः शरान् गृह्णन् ॥ अथ तान् गुणेषु संदधत् गुणान् आकर्षयति ॥ शितबाणसमूह
हान्मुंचन् ॥ निघ्नन् प्रहरन् पत्तिः पदातिर्निरंतरमिति प्रहरणादिक्रियाविशेषणं ॥ चेलत्काष्ठभ्रमणे यथा चक्रे वर्तते तद्व

सुपर्णतालध्वजचिह्नितौ रथावलंबयंतौ हरिरामयोर्मृधे ॥ स्त्रियः पुराट्टालकहर्म्यगोपुरं समाश्रिताः
समुमुहुः शुचार्दिताः ॥ २२ ॥ हरिः परानीकपयोमुचां मुहुः शिलीमुखात्युल्बणवर्षपीडितं ॥ स्वसैन्यमा
लोक्य सुरासुरार्चितं व्यस्फूर्जयच्छार्ङ्गशरासनोत्तमम् ॥ २३ ॥ गृह्णन्निषंगादथ संदधच्छरान्विकृ
ष्य मुंचन् शितबाणपूगान् ॥ निघ्नन् रथान्कुंजरवाजिपत्तीन्निरंतरं यद्वदलातचक्रं ॥ २४ ॥ निर्भि
न्नकुंभाः करिणो निपेतुरनेकशोऽश्वाः शरवृक्णकंधराः ॥ रथा हताश्वध्वजसूतनायकाः पदा
तयश्छिन्नभुजोरुकंधराः ॥ संछिद्यमानद्विपदेभवाजिनामंगप्रसूताः शतशोऽसृगापगाः ॥

व्यस्फूर्जयदिति ॥ २४ ॥ हताः अश्वाः ध्वजाः सूताः नायकाः रथिनश्च येषु ते ॥ संछिद्यमानाः द्विपदा इभा वा
जिनश्च तेषामंगेभ्यः प्रसूताः ॥ असृगापगा रुधिरनद्यः ॥ परस्परं प्रवर्तिता इति टीकाशेषान्वयः ॥ ॥ ॥ ऽऽ

भा०द०उ मुकुंदेय यावित्यनुषंगः ॥ नक्षतं बलं यस्य सः ॥ तस्यैश्वमतदहृष्यात्तत्वप्रसंधानादिति भावः ॥ निस्तीर्णः अनायासे
४ नैव तीर्णोऽरिबलौघो येन ॥ साधु साध्विति ॥ अनुमोदितश्च ॥ प्रत्युद्यतैर्मथुरावासिभिर्जनैरभिसंगम्य मिलित्वा ॥ १ ॥
तदनन्तरं प्रभौ पुरं प्रविशति सति ॥ शंखादयो नेदुः ॥ कथंभूतां पुरं तदाह ॥ सिक्तमार्गामिति ॥ ब्रह्मघोषेण वेदघोषेण

मुकुंदेऽप्यक्षतबलो निस्तीर्णारिबलार्णवः ॥ विकीर्यमाणः कुसुमैस्त्रिदशैरनुमोदितः ॥ मा
थुरैरुपसंगम्य विज्वरैर्मुदितात्मभिः ॥ उपगीयमानविजयः सूतमागधवंदिभिः ॥ १ ॥ शं
खदुंदुभयो नेदुर्भेरीतूर्याण्यनेकशः ॥ वीणावेणुमृदंगानि पुरं प्रविशति प्रभौ ॥ सिक्तमार्गां ५२
हृष्टजनां पताकाभिरलंकृतां ॥ निर्घुष्टां ब्रह्मघोषेण कौतुकाबद्धतोरणां ॥ ३२ ॥ निचीयमा
नो नारीभिर्माल्यदध्यक्षतांकुरैः ॥ निरीक्ष्यमाणः सस्नेहं प्रीत्युत्कलितलोचनैः ॥ ३३ ॥ आयोध
नगतं वित्तमनंतं वीरभूषणं ॥ यदुराजाय तत्सर्वमाहृतं प्रादिशत्प्रभुः ॥ ३४ ॥

निर्घुष्टाम् ॥ निनादितां ॥ कौतुकेनोत्सवेन ॥ आ सर्वतो बद्धानि तोरणानि यस्यां तां ॥ ३२ ॥ निचीयमानः वि
कीर्यमाणः ॥ प्रविवेशेति विपरिणतानुषंगः ॥ ३३ ॥ आयोधनं रणभूमिस्तत्रस्थं वित्तं ॥ वीराणां भूषणं ॥ ३४ ॥ ४

नैवैतदाश्चर्यमित्याह स्थित्युद्भवांतमिति । नहि किमत्याश्चर्यमिव वर्णितं तत्राह । तथापीति मर्त्यो ननु विधत्ते
नुकरोतीति मर्त्यानुविधस्तस्य ॥ २७ ॥ किंच जग्राहेति । हतान्यनीकानि यस्य । अवशिष्टा असवो यस्य तं च तं च ॥ २८ ॥ हता
वधूः शोऽराः तयो येन । तथाभूतमपि जरासंधं वध्यमानं वारयामासेति ॥ २९ ॥ पवित्रार्थानि धर्मोपदेशोपराणि पदा

स्थित्युद्भवांतं भुवनत्रयस्य यः समीहतेनंतगुणः स्वलीलया । न तस्य चित्रं परपक्षनिग्रहस्त
थापि मर्त्यानुविधस्य वर्ण्यते ॥ २७ ॥ जग्राह विरथं रामो जरासंधं महाबलं । हतानीकावशिष्टासुं
सिंहः सिंहमिवौजसा ॥ २८ ॥ वध्यमानं हतारातिं पाशैर्वारुणमानुषैः । वारयामास गोविंदस्तेन
कार्यचिकीर्षया ॥ २९ ॥ समुक्तो लोकनाथाभ्यां व्रीडितो वीरसंमतः । तपसे कृतसंकल्पो वारितः
पथि राजभिः । वाक्यैः पवित्रार्थपदैर्नयनैः प्राकृतैरपि । स्वकर्मबंधप्राप्तोयं यदुभिस्ते पराभ
वः ॥ ३० ॥ हतेषु सर्वानीकेषु नृपो बार्हद्रथस्तदा । उपेक्षितो भगवता मगधान्दुर्मना ययौ ॥ ३१ ॥

नि येषु तैर्वाक्यैः । नयनैः नीतिभिः । प्राकृतैः लौकिकैः । तत्र लौकिकन्यायमाहुः । स्वकर्मेति । यदुभिरल्पकैः कृ
त्वा ते महतः पराभवः केवलं कर्मबंधेन प्राप्तः अतस्त्वया न लज्जितव्यमिति भावः ॥ ३० ॥ बार्हद्रथो जरासंधः ॥ ३१ ॥

दुर्गे १

ना० ८ः ३ ॥ ४२ ॥ समुद्रमध्ये जनमध्ये नगरं हरत्नाद्भुतं सर्वाश्चर्यमयं अचीकरत्कारयामास ॥ ४३ ॥ त्वष्टा विश्वकर्मा तद्दी
५ यं शिल्पनैपुण्यं च क्रियाकौशल्यं ॥ तदाह सार्द्धैस्त्रिभिः ॥ रथ्येति रथ्या राजमार्गाः ॥ पुरतः वीथ्यस्तूपमार्गाः पश्चिम
तः उभयतो विचित्राण्यंगनानि ॥ तन्मध्ये कोष्ठा ततोप्यंतः सुवर्णभवनानि ॥ तदुपरि स्फाटिका हालिकाः तदु
परि हेमकुंभाः ॥ इति वद्धभूमिकं यथावास्तु ॥ वास्तु गृहादिनिर्माणस्थानं ॥ तमतिक्रम्य निर्मितं सुराणां द्रुमालं
८१ तस्मा द्यविधास्यामो दुर्गं द्विपद दुर्गमं ॥ तत्र ज्ञातीन्समाधाय पययवनं घातयामहे ॥ ४४ ॥ इति संचिं
त्य भगवान्दुर्गं हि द्वादशयोजनं ॥ अंतः समुद्रे नगरं हरत्नाद्भुतमचीकरत् ॥ ४५ ॥ दृश्यते यत्र हि
त्वाष्ट्रं विज्ञानं शिल्पनैपुणं ॥ रथ्याचत्वरवीथीभिर्यथावास्तु विनिर्मितं ॥ सुरद्रुमलतोद्यान
विचित्रोपवनान्वितं ॥ हेमशृंगैर्दिविस्पृग्भिः स्फाटिकाट्टालगोपुरैः ॥ राजतारकूटैः कोष्टै
हेमकुंभैरलंकृतैः ॥

ताश्चयेषु तान्युद्यानानि ॥ विचित्रोपवनानि च ॥ तैरन्वितं ॥ हेममया
नि शृंगाणि येषां तैः ॥ दिविस्पृग्भिः ॥ अत्युच्चैः ॥ स्फाटिका ॥ अट्टालाउपरिभूमिकाः ॥ गोपुराणि च पुरद्वाराणि
तैर्निर्मितमित्युत्तरेणान्वयः ॥ राजतारकूटैः ॥ रजतं च आरकूटं च पीतलोहं ताभ्यां निर्मितैः ॥ कोष्टैः ॥ अध्यक्षशा ५

कालयवन २

तावतीतिछेदः ॥ तावतिपराजयेवर्त्तमानेपि ॥ अक्षौहिण्याबलंयस्यसः ॥ सप्तदशकृत्वः ॥ सप्तदशवारान्युयुधे ॥ ३५ ॥
आदितएवन्तुतयंनिन्युः ॥ ३६ ॥ अष्टादशमे ॥ अष्टादशमेसंग्रामेभाव्यतन्मध्ये अकस्मात्संप्राप्तः ॥ ३७ ॥ आत्मसंभि

एवंसप्तदशंकृत्वातावत्यक्षौहिणीबलः ॥ युयुधेमागधोराजायदुभिःकृष्णपालितैः ॥ ३५ ॥ अक्षु
ण्वंतद्बलंसर्ववृष्णयःकृष्णतेजसा ॥ हतेषुस्वेष्वनीकेषुत्यक्तोयादरिभिर्नृप ॥ ३६ ॥ अष्टादशम
संग्रामेआगामिनितदंतरा ॥ नारदप्रेषितोवीरोयवनोप्रत्यदृश्यत ॥ ३७ ॥ रुरोधमथुरामे
त्यतिसृभिर्म्लेछकोटिभिः ॥ नृलोकेचाप्रतिद्वंद्वोवृष्णीन्श्रुत्वात्मसंमितान् ॥ ३८ ॥ तंदृष्ट्वा
चिंतयत्कृष्णःसंकर्षणसहायवान् ॥ अहोयदूनांवृजिनंप्राप्तंह्युभयतोमहत् ॥ ३९ ॥ यव
नोऽयंनिरुंधेऽस्मानद्यतावे[illegible]न्महाबलः ॥ मागधोप्यद्यवाश्वोवापरश्वोवागमिष्य
ति ॥ ४० ॥ आवयोर्युध्यतोरस्ययद्यागंताजरासुतः ॥ बंधून्वधिष्यत्यथवान्यष्यतेस्वपुरंबली ॥ ४१

नान्स्वतुल्यान् ॥ ३८ ॥ वृजिनंदुःखं ॥ उभयतः यवनाज्जरासंधाच्च ॥ ३९ ॥ तदाहद्द्येन ॥ निरुंधेनिरुणद्धि ॥ ४० ॥ अ

५८

भा०द०टी०
८६

इति दशमे पंचाशत्तमः ॥ ५० ॥ एकपंचाशत्तमे हन्मुचुकुंददृशा हरिः ॥ यवनं मुचुकुंदेन तत्तुष्टस्तमनुकंपयत् ॥ यव
नेंद्रसुतात्कालयवनाद्यदुभीषणात् ॥ हरिर्हरगिरः स्वैरं पालनाय पलायत ॥ यदा गार्ग्यः श्यालेन षंढ इत्युक्तः ॥ तदा या
दवैरुपहसितः ॥ क्रुद्धोऽसौ गार्ग्यः श्रीमहेशं प्रसाद्य यदुभीषणं पुत्रवरं लब्धवान् ॥ तमश्वयवनेंद्रेण पुत्रेण स्व

इति श्रीमद्भागवते महापुराणे दशमस्कंधे दुर्गनिवेशनं पंचाशत्तमोऽध्यायः ॥ ५० ॥ श्रीशुक
उवाच ॥ तं विलोक्य विनिष्क्रांतमुज्जिहानमिवोडुपं ॥ दर्शनीयतमं श्यामं पीतकौशेयवा
ससं ॥ श्रीवत्सवक्षसं भ्राजत्कौस्तुभामुक्तकंधरं ॥ पृथुदीर्घचतुर्बाहुं नवकंजारुणेक्षणं ॥ नित्यं
प्रमुदितं श्रीमत्सुकपोलं शुचिस्मितं ॥ मुखारविंदं बिभ्राणं स्फुरन्मकरकुंडलं ॥ वासुदेवो ह्ययमि
ति पुमान् श्रीवत्सलांछनः ॥ चतुर्भुजोऽरविंदाक्षो वनमाल्यतिसुंदरः ॥ लक्षणैर्नारदप्रोक्तैर्नान्यो
भवितुमर्हति ॥ निरायुधश्चलन्पद्भ्यां योत्स्येऽनेन निरायुधः ॥ इति निश्चित्य यवनः प्राद्रवंतं पराङ्मुखं
अन्वधावज्जिघृक्षुस्तं दुरापमपि योगिनां ॥ १ ॥

क्षेत्रे पुत्रोत्पादनाय प्रार्थितो गार्ग्यः कालयवनं यवनेंमुजीजनदिति पुराणप्रसिद्धं ॥ पुरद्वाराद्विनिष्क्रांतं ॥ उज्जिहानं उद्गच्छंतं नि
त्यप्रमुदितमित्यादि मुखारविंदविशेषणं ॥ नारदोक्तैर्लक्षणैरयं पुमान्वासुदेव एव नान्यो भवितुमर्हति ॥ अयं च नि
रायुधः ॥ अतोऽनेन पद्भ्यामेव चलन् निरायुधोऽहं योत्स्यामीति निश्चित्य तं पराङ्मुखं प्राद्रवंतमन्वधावदित्यन्वयः ॥ १ ॥ ८६

वै १

तथाचरत्नकूटैरलंकृतैः रत्नकूटैः पद्मरागादिशिखरैः हैमैः सौवर्णैर्महामरकतमयानि स्थलानि येषु तैर्गृहैश्च ॥ किंच ॥ नगरगृहादौ वास्तोष्पतीनां देवानां गृहैः ॥ वलभीभिश्चंद्रशालिकाभिश्च निर्मितं ॥ यदुदेवगृहैः ॥ राजगृहैरुल्लसच्छोभमानं ॥ ५४ ॥ पारिजातंच प्राहिणोत ॥ प्रस्थापयामासेति ॥ शुकपरीक्षित संवादात्पूर्वभावि वो

रत्नकूटैर्गृहैर्हैमैर्महामरकतस्थलैः ॥ वास्तोष्पतीनां च गृहैर्वल्लभीभिश्च निर्मितं ॥ चातुर्वर्ण्यजनाकीर्णं यदुदेवगृहोल्लसत ॥ ५४ ॥ सुधर्मां पारिजातं च महेंद्रः प्राहिणोद्धरेः ॥ यत्र चावस्थितो मर्त्यो मर्त्यधर्मैर्न युज्यते ॥ श्यामैककर्णान्वरुणो हयान्शुक्लान्मनोजवान् ॥ अष्टौ निधिपतिः कोशांल्लोकपालो निजोदयान् ॥ ५५ ॥ यद्यद्भगवता दत्तमाधिपत्यं स्वसिद्धये ॥ सर्वं प्रत्यर्पयामासुर्हरौ भूमिगते नृप ॥ ५६ ॥ तत्र योगप्रभावेन नीत्वा सर्वजनं हरिः ॥ मथुरामेत्य रामेण
कृष्णः समनुमंत्रितः ॥ निर्जगाम पुरद्वारात्पद्ममाली निरायुधः ॥ ५७ ॥

इतनिर्दृष्टाः ॥ मर्त्यधर्मैः क्षुत्पिपासादिषड्भिर्मिभिः ॥ निधिपतिः कुबेरः ॥ अष्टौ कोशान्निधीन् ॥ पद्मश्चैव महापद्मो मत्स्यकूर्मौ तथैव च ॥ खर्वः शंखो मुकुंदश्च नीलश्चैवाष्टमः स्मृतः ॥ इति प्रसिद्धान् ॥ निजोदयान् निजविभूतीः ॥ ५५ ॥ अन्ये चासिद्ध्यै इदयो भगवता माधिकारसिद्धये यद्यदाधिपत्यं दत्तमासीत्तत्सर्वं प्रत्यर्पयामासुरिति ॥ ५६ ॥ यथा कालयवनो नवेत्ति नयो

सजनः तथायोगप्रभावेन नीत्वा स्वमवस्थितां प्रजाः पाल
यन्त्रहपलायिघाइतिसमन्त्रितः कृतानुमन्त्रितः स्वयं ॥ ५७ ॥

ओ४

भा० द० ३० १० गुहं कार्त्तिकेयं स्वःपालं स्वर्गपालकं सेनान्यं ११ उज्झिता त्यक्ताः गता इत्यर्थः १२ किंच सुता इति तुल्यकालीयाः
७ तत्समानकालीनाः कालिता विचालिताः १३ मन्त्रज्ञाः कोऽन्यः कालयेदिति चेदत आह काल इति कालयते इतस्ततः

सयाचितः सुरगणैरिंद्राद्यैरात्मरक्षणे ॥ असुरेभ्यः परित्रस्तैस्तद्रक्षां सोऽकरोच्चिरं १० ॥ लब्ध्वा गुहं ते स्वःपालं मुचुकुंदमथाब्रुवन् ॥ राजन् विरमतां कृच्छ्राद्भवान्नः परिपालनात् ११ ॥ नरलोकं परित्यज्य राज्यं निहतकंटकं ॥ अस्मान् पालयतो वीर कामास्ते सर्व उज्झिताः १२ ॥ सुता महिष्यो भवतो ज्ञातयोऽमात्यमंत्रिणः ॥ प्रजाश्च तुल्यकालीया नाधुना संति कालिताः १३ ॥ कालो बलीयान् बलिनां भगवानीश्वरोऽव्ययः ॥ प्रजाः कालयते क्रीडन् पशुपालो यथा पशून् १४ ॥ वरं वृणीष्व भद्रं ते ऋते कैवल्यमद्य नः ॥ एक एवेश्वरस्तस्य भगवान्विष्णुरव्ययः १५ ॥ एवमुक्तः स वै देवानभिवंद्य महायशाः ॥ निद्रां हि वरयामास मुचुकुंदस्तदा नृपः ॥ यो मे विघातं निद्रायाः करिष्यति स मंदधीः स सद्यो भस्मसाद्भूयाद्देवाश्चाहुस्तथेति तं ॥ अशयिष्ट गुहाविष्टो निद्रया देवदत्तया ॥ १६ यवने भस्मसान्नीते भगवान् सात्वतर्षभः ॥ आत्मानं दर्शयामास मुचुकुंदाय धीमते १७ ॥

तस्मात्कालयति १४ तस्य कैवल्यस्य १५ गुहायां प्रविष्टः शेते स्म ॥ १६ ॥ १७ ॥ रामराम रामराम रामराम रामराम ७

आत्मानं हस्तप्राप्तमिव दर्शयता दूरं नीत इत्यन्वयः ॥ १ ॥ अहताशुभः अक्षीणकर्मा ॥ २ ॥ ४ ॥ तं शयानमच्युतं मत्वा ताडयदिति

हस्तप्राप्तमिवात्मानं हरिणा स पदे पदे ॥ नीतो दर्शयता दूरं यवनेशोद्रिकंदरं ॥ २ ॥ पलायनं यदु
कुले जातस्य तव नोचितं ॥ इति क्षिपन्ननुगतो नैनं प्रापाहताशुभः ॥ ३ ॥ एवं क्षिप्तोपि भगवान् प्रा
विशद्गिरिकंदरं ॥ सोपि प्रविष्टस्तत्रान्यं शयानं ददृशे नरं ॥ ४ ॥ नन्वसौ दूरमानीय शेते मामिह सा
धुवत् ॥ इति मत्वाच्युतं मूढस्तं पदा समताडयत् ॥ ५ ॥ स उत्थाय चिरं सुप्तः शनैरुन्मील्य लोचने
दिशो विलोकयन् पार्श्वे तमद्राक्षीदवस्थितं ॥ ६ ॥ स तावत्तस्य रुष्टस्य दृष्टिपातेन भारत ॥ देहजे
नाग्निना दग्धो भस्मसादभवत्क्षणात् ॥ ७ ॥ राजोवाच ॥ को नाम स पुमान् ब्रह्मन् कस्य किं
वीर्य एव च ॥ कस्माद्गुहां गतः शिश्ये किंतेजो यवनार्दनः ॥ ८ ॥ श्रीशुक उवाच ॥ स इक्ष्वाकुकुले जा क २
तो मान्धातृतनयो महान् ॥ मुचुकुंद इति ख्यातो ब्रह्मण्यः सत्यसंगरः ॥ ९ ॥

५ ॥ ६ ॥ तस्य क्रुद्धस्य दृष्टिपातेन संहृतः प्राप्यः स्वदेहजोग्निस्तेन ॥ ७ ॥ यवनं मर्दयति हिनस्तीति तथा संकल्पवश्यः किं
वीर्यः कीदृक्प्रभाववीर्ये ॥ किंतेजः कस्य वीर्यं पुत्र इत्यर्थः शिश्ये अशयिष्ट ॥ ८ ॥ सत्यसंगरो सत्यप्रतिज्ञा वाचा यस्य सः ॥ ९ ॥

२४ २५ २६ २७ २८ क्वचित्कदाचित् कश्चिदपि रजांसि अपि विममे गणितवान् न यापि न जन्मानि कर्माणि च वि

चिरः प्रजागरः श्रांतो निद्रयापहृतेंद्रियः ॥ शये स्मिन् विजने कामं केनाप्युत्थापितोऽधुना ॥ २४ ॥ सो
पि भस्मीकृतो नूनमात्मीयेनैव पाप्मना ॥ अनंतरं भवान् श्रीमान् लक्षितोऽमित्रशातन ॥ २५ ॥ तेज
सा तेऽविषह्येण भूरि द्रष्टुं न शक्नुमः ॥ हतौजसा महाभाग माननीयोसि देहिनां ॥ २६ ॥ एवं संभा
षितो राज्ञा भगवान्भूतभावनः ॥ प्रत्याह प्रहसन्वाण्या मेघनादगभीरया ॥ २७ ॥ श्रीभगवानुवा
च ॥ जन्मकर्माभिधानानि संति मेऽङ्ग सहस्रशः ॥ न शक्यंतेनुसंख्यातुमनंतत्वान्मयापि हि ॥ २८ ॥
क्वचिद्रजांसि विममे पार्थिवान्युरुजन्मभिः ॥ गुणकर्माभिधानानि न मे जन्मानि कर्हिचि
त् ॥ २९ ॥ कालत्रयोपपन्नानि जन्मकर्माणि मे नृप ॥ अनुक्रमंतो नैवांतं गच्छंति परमर्षयः ॥
तथाप्यद्यतनान्यंग शृणुष्व गदतो मम ॥ ३० ॥ विज्ञापितो विरिंचेन पुराहं धर्मगुप्तये ॥ भूमेर्भाराय
माणानामसुराणां क्षयाय च ॥ ३१ ॥ अवतीर्णो यदुकुले गृह आनकदुंदुभेः ॥ वदंति वासुदेवेति वसुदे
वसुतं हि मां ॥ ३२ ॥ कालनेमिर्हतः कंसः प्रलंबाद्याश्च सद्द्विषः ॥ अयं च यवनो दग्धो राजंस्ते तिग्मचक्षुषा ॥ ३३ ॥

मीते ॥ २९ ३० ३१ ॥ ३२ ॥ नेतिग्मचक्षुषा निमित्तेन मयैव दग्धः ३३ रामराम ॥ ऽऽ ॥ राम ॥

धर्षितः अभिभूतः ॥ दुर्धर्षं अधृष्यं ॥ १७ ॥ विपिने ॥ ॥ तत्रापि गिरिगह्वरे दुष्प्रवेशस्थाने तत्रापुरुकंटके ॥

तमालोकाघनश्यामं पीतकौशेयवाससं ॥ श्रीवत्सवक्षसं भ्राजत्कौस्तुभेन विराजितं ॥ चतुर्भुजं रोच
मानं वैजयंत्या च मालया ॥ चारुप्रसन्नवदनं स्फुरन्मकरकुंडलं ॥ प्रेक्षणीयं त्रिलोकस्य सानुरागस्मि
तेक्षणं ॥ अपीच्यवयसं मत्तमृगेंद्रोदारविक्रमं. पर्य्यपृछन्महाबुद्धिस्तेजसा तस्य धर्षितः ॥ शंकि
तः शनकै राजा दुर्द्धर्ष इव तेजसा ॥ १८ ॥ मुचुकुंद उवाच ॥ को भवानिह संप्राप्तो विपिने गिरि
गह्वरे ॥ पद्भ्यां पद्मपलाशाभ्यां विचरस्युरुकंटके ॥ १९ ॥ किंस्वित्तेजस्विनां तेजो भगवान्वा विभा
वसुः ॥ सूर्य्यः सोमो महेंद्रो वा लोकपालोऽपरोऽपि वा ॥ २० ॥ मन्ये त्वां देवदेवानां त्रयाणां पुरुष
र्षभं ॥ यद्बाधसे गुहाध्वांतं प्रदीपप्रभया यथा ॥ २१ ॥ शुश्रूषतामव्यलीकमस्माकं नरपुंगव ॥
स्वजन्मकर्म्मगोत्रं वा कथ्यतां यदि रोचते ॥ २२ ॥ वयं तु पुरुषव्याघ्र ऐक्ष्वाकाः क्षत्रबांधवः ॥ मुचुकुं
द इति प्रोक्तो यौवनाश्वात्मजः प्रभो ॥ २३ ॥ पद्मपल्लोसदृशाभ्यां पद्भ्यां विचरसीति ॥ १९ ॥ तेजः मूर्तिः प्रभा
वो ऽग्निर्वा ॥ २० ॥ सर्वत्रापरितोषादाह मन्य इति ॥ पुरुषर्षभं ॥ श्रीविष्णुं गुहाध्वांतं अंतस्तमः ॥ २१ ॥ २२ ॥ वयं त्विति वंश्याभि

भा० द० उ०
१९

किंच कामसुखं शूकरादिष्वपि संभवति। भगवद्भजनं तु न मानुषव्यतिरेकेणेति। मानुषत्वं प्राप्य त्वां न भजन्ति मूढतया
हतश्चेति। अत्र केचिन्मा मा। अव्यंगं अविकलांगम्। किंच। असति विषयसुखे मतिर्यस्य सः। गृहमेवांधकूपस्तस्मिन् पतितः
यथा पशुः तृणलुब्धोऽन्धकूपे पततीति।४६। न केवलं मम स्वजनस्य परंगतिः किंतु ममापि तथैवेत्याह ममेति। मर्त्ये शरीरे
आत्मबुद्धिर्यस्य तस्य मम। अत एव सुतादिषु आसज्जमानः।४७।४८। उन्नद्धमदं त्वं प्रपंचयति। कलेवर इति। घटकुड्यो

लब्ध्वा जनो दुर्लभमत्र मानुषं कथंचिदव्यंगमयत्नतोऽनघ। पादारविंदं न भजत्यसन्मति
र्गृहांधकूपे पतितो यथा पशुः।४६। ममैष कालोऽजित निष्फलो गतो राज्यश्रियोन्नद्धमदस्य
भूपतेः। मर्त्यात्मबुद्धेः सुतदारकोशभूष्वासज्जमानस्य दुरंतचिंतया।४७। कलेवरेऽस्मिन् घटकु
ड्यसंनिभे निरूढमानो नरदेव इत्यहम्। वृतो रथेभाश्वपदात्यनीकपैर्गां पर्यटंस्त्वागणयन्सुदुर्मदः।
४८। प्रमत्तमुच्चैरितिकृत्यचिंतया प्रवृद्धलोभं विषयेषु लालसम्। त्वमप्रमत्तः सहसाभिपद्यसे क्षु
ल्लेलिहानोऽहिरिवाखुमंतकम्।४९।

सहरूपेऽत्र नात्मानि यत एवं सुदुर्मदोऽभवं। अतः ममैष कालो निष्फलो गत इति।४८। त्वा न गणयंतं त्वमासीत्याह। प्रमत्तमिति
प्रमत्तं अनवहितत्वात् मार्गेऽपि देहादिष्वासक्तः इति यावत्। कुतः प्रमत्त इति इतिकृत्यचिंतया। एवमेव कर्तव्यमिति मनोर
थपरंपरया मनोरथैर्भोगेऽपि विषयेषु लालसं। उत्सुकं प्राप्तेष्वपि पुनः प्रवृद्धलोभं अस्त्वायस्य तत्त्वम्। अतः कस्त्वमभिपद्यसे

१९

३४॥ अप्रपूर्णोऽहमिति शोचितुं॥ यद्वा॥ अन्यदत्तेषु वरेषु क्षीणेषु यथा शोचति॥ नैवं मां प्रपन्नः॥ मद्दत्तवराणाम् अक्षयत्वादिति
भावः॥ ३५॥ अष्टाविंशतितमे युगे भगवान् अवतरिष्यतीति वृद्धगर्गवाक्यमनुस्मरन्नित्यर्थः॥ ३६॥ बद्धाञ्जलिरेव केवलं दुर्लभा॥ का

सोऽहं तवानुग्रहार्थं गुहामेतामुपागतः॥ प्रार्थितः प्रचुरं पूर्वं त्वयाहं भक्तवत्सलः॥ ३४॥ वरान्वृणी
ष्व राजर्षे सर्वान्कामान्ददामि ते॥ मां प्रपन्नो जनः कश्चिन्न भूयोऽर्हति शोचितुं॥ ३५॥ श्रीशुक उवाच॥
इत्युक्तस्तं प्रणम्याह मुचुकुन्दो मुदान्वितः॥ ज्ञात्वा नारायणं देवं गर्गवाक्यमनुस्मरन्॥ ३६॥ मु
चुकुन्द उवाच॥ विमोहितोऽयं जन ईश मायया त्वदीयया त्वां न भजत्यनर्थदृक्॥ सुखाय
दुःखप्रभवेषु सज्जते गृहेषु योषित्पुरुषश्च वंचितः॥ ३७॥ ॥ ऽऽ॥ ॥ ० ॥ ॥ ऽऽ

का मास्तु तद्वराः॥ नवरणयोग्या इत्याशयेनाभक्तानां संसारमष्टभिः प्रपंचयन् स्तौति॥ विमोहिता इति हे
ईश योषिच्च पुरुषश्चेति द्विविधोऽप्ययं जनस्त्वदीयया मायया विमोहितः॥ अनर्थदृक्॥ अनर्थं परमार्थसु
खत्वं पश्यतीति तथा॥ अतस्त्वां न भजति॥ किंतु परस्परं वंचितः सन् सुखेच्छया दुःखानामेव प्रभवो येषु तेषु

 तदेवमष्टभिः श्लोकैरीशवहिर्मुखानां संसारप्रपंच्यमुक्त्या तन्निवृत्तिक्रममाह ॥ भवापवर्ग इति । भो अच्युत ॥ भ्रमतः सं-
१० सरतो जनस्य यदा त्वदनुग्रहेण भवस्य बंधस्य अपवर्गः अंतो भवेत् ॥ आसन्नकालः स्यात् तदा सतां संगमो भवेत् ॥ तदा सर्व-
संगनिवृत्त्या कार्यकारणनियंतरि त्वयि भक्तिर्भवति ॥ ततो मुच्यत इत्यर्थः ॥ ५५ ॥ मम तु सत्संगमात्रमेव यो राज्यादिसं-
गविच्छेदो जातः ॥ सोऽयं त्वया महाननुग्रहः कृत इत्याह ॥ मन्य इति ते त्वया साधुभिर्विवेकिभिस्तपसे वनं प्रविष्टुमिच्छ-

भवापवर्गो भ्रमतो यदा भवेज्जनस्य तर्ह्यच्युत सत्समागमः ॥ सत्संगमो यर्हि तदैव सद्गतौ पराव-
रेशे त्वयि जायते मतिः ॥ ५५ ॥ मन्ये ममानुग्रह ईश ते कृतो राज्यानुबंधापगमो यदृच्छया ॥ यः प्रार्थ्य-
ते साधुभिरेकचर्यया वनं विविक्षद्भिरखंडभूमिपैः ॥ ५६ ॥ न कामयेन्यं तव पादसेवनादकिंचनप्रा-
र्थ्यतमाद्वरं विभो ॥ आराध्य कस्त्वां ह्यपवर्गदं हरे वृणीत आर्यो वरमात्मबंधनं ॥ ५७ ॥ तस्माद्विसृज्या-
शिष ईश सर्वतो रजस्तमः सत्वगुणानुबंधनाः ॥ निरंजनं निर्गुणमद्वयं परं त्वां ज्ञप्तिमात्रं पुरुषं व्रजा-
म्यहम् ॥ ५८ ॥

भगवत्सेवामार्गे १ द्भिः स्वयं त्यक्तुमलभमानैः प्रार्थ्यत इति ॥ ५६ ॥ तदेव विषयसेवामार्गं च विविच्य वरान्न वृणीष्वेति
यदुक्तं तत्रोत्तरमाह ॥ न कामय इति ॥ अकिंचना निवृत्ताभिमानाः आर्यो विवेकी ॥ ५७ ॥ रजस्तमःसत्वगुणैरनुबंध्य
तदृत्तिन थाताः ऐश्वर्यादिशत्रुमरणादिधर्मादिरूपा विसृज्य परं पुरुषमीश्वरं ज्ञप्तिमात्रं ज्ञानघनं ॥ कुतो निरंजनं ततः कुतः

निर्गुणं नदयिशिक्रमः ॥ अद्वयं ॥ [illegible]
मौलि ५४ ॥

किंच कालात्मना त्वयाभिपन्नो देह एवं भवतीत्याह ॥ पुरेति ॥ श्वसृगालादिभक्षितो विट्संज्ञितः ॥ तैरभक्षितः दग्धो भस्मसंज्ञितो भवतीति बुद्ध्या विचार्य एवं भूते देहे ममत्वं कुर्वतो जना हरिं नाराधयंते इति आत्मनि शान्ते भूता ज्ञेयाः ॥ सततं गतः योनीः सहस्राणि बह्वीर्निर्गत्वा गत्वा दुःखेन लब्ध्वापि च मानुषत्वं सुखावहं येन भजंति विष्णुं ते वै मनुष्या आत्मनि शान्ते भूता इति ॥ ४९ ॥ किंच ॥ अनंतकु प्राप्तैः प्रागपि दिग्विजयिनो राज्ञोपि पारतंत्र्यदुःखं तदवस्थमेवेत्याह ॥ निर्जित्येति ॥ अभूतविग्रहः ॥ अविद्यमानसंग्रामः ॥ पूर्व

पुरा रथैर्हेमपरिष्कृतैश्चरन्मतंगजैर्वा नरदेवसंज्ञितः ॥ स एव कालेन दुरत्ययेन ते कलेवरो विट्कृमिभस्मसंज्ञितः ॥ ५० ॥ निर्जित्य दिक्चक्रमभूतविग्रहो वरासनस्थः समराजवंदितः ॥ गृहेषु मैथुन्यसुखेषु योषितां क्रीडामृगः पूरुष ईश नीयते ॥ ५१ ॥ करोति कर्माणि तपःसुनिष्ठितो निवृत्तभोगस्तदपेक्षयाददत् ॥ पुनश्च भूयासमहं स्वराडिति प्रवृद्धतर्षो न सुखाय कल्पते ॥ ५२ ॥

ये समा राजानस्तै राजभिर्वंदितोपि ॥ मिथुनीभावसुखमेव परं येषु तेषु योषितो गृहेषु ॥ क्रीडामृगः पूरुषस्ततो नीयन्ते ॥ ५१ ॥ किंच ॥ तत्रापि तस्याकुलस्य न भोगाय क्षणः कश्चिदस्तीत्याह ॥ करोतीति ॥ तपसि श्रद्धया अनशनब्रह्मचर्यादौ सुनिष्ठितः ॥ पुनश्च स्वराडिंद्रः स्यामिति ॥ यद्वा ॥ जन्मांतरेष्वेवमेव चक्रवर्ती स्यामिति ॥ ५२ ॥ राम राम राम

भा०द०उ० युञ्ज्याभासेनभीषयंस्तपसिलोकसंग्रहेप्रवर्त्तयति ।।५४।।५५।। इतिदशमेएकपंचाशत्तमः ।।५१।। द्विपंचाशत्तमेधा
११ वन्भयादिवगतःपुरी ।। अन्वमोदतसंदेशंरुक्मिण्याद्विजवर्णितम् ।।१।। क्षुल्लकान् अल्पप्रमाणान् ।।२।। तपसिश्रद्धा

क्षात्रधर्मेस्थितोजंतून्न्यवधीर्मृगयादिभिः ।। समाहितस्तत्तपसाजह्यघंमदुपाश्रितः ।।५४।। ज
न्मन्यनंतरेराजन्सर्वभूतसुहृत्तमः ।। भूत्वाद्विजवरस्त्वंवैमामुपैष्यसिकेवलं ।।५५।। इतिश्री
मद्भागवतेमहापुराणेदशमस्कंधेमुचुकुंदस्तुतिरेकपंचाशत्तमोध्यायः ।।५१।। श्रीशुकउवाच ।।
इत्थंसोनुगृहीतोऽङ्गकृष्णेनेक्ष्वाकुनंदनः ।। तंपरिक्रम्यसंनम्यनिश्चक्रामगुहामुखात् ।।१।। सवी
क्ष्यक्षुल्लकान्मर्त्यान्पशून्वीरुद्वनस्पतीन् ।। मत्वाकलियुगंप्राप्तंजगामदिशमुत्तरां ।।२।। तपः
श्रद्धायुतोधीरोनिःसंगोमुक्तसंशयः ।। समाधायमनःकृष्णेप्राविशद्गंधमादनं ।।३।। बदर्याश्र
निन्ये २ ममासाद्यनरनारायणालयं ।। सर्वद्वंद्वसहःशांतस्तपसाराधयद्धरिं ।।४।। भगवान्पुनराव्र
ज्यपुरींयवनवेष्टितां ।। हत्वाम्लेच्छबलंनिन्येतदीयंद्वारकांधनं ।।५।। नीयमानेधनेगोभिर्नृभि
श्चाच्युतचोदितैः ।। आजगामजरासन्धस्त्रयोविंशत्यनीकपः ।।६।।

युतः ।। निनिन्ये नयनमार्गेचलतिस्म ।।५।। वेगरभसम् वेगौद्धत्यम् ।।६।। एमरामरामरामएममरामरामराम ११

मुंस्त्वा तवङ्घ्रीशान् ॥ कैवल्यं तु करस्थमेवेति पुनर्वरैः प्रलोभयंतं श्रीकृष्णं पादोपग्रहणेन प्रार्थयते चिरमिह वृजिनैः कर्मफ
लैरार्त्तः पुनस्तद्वासनाभिस्तप्यमानः ॥ तथाप्यवितृषषडमित्रः ॥ तृट् एव तृषा तस्मो नविगतस्तत्स्माः षडमित्राः शत्रवः इंद्रि
यलक्षणा यस्य सः ॥ अत एवालब्धशांतिः ॥ कथंचिद्दैववशेन लब्धशांतिरिति रिति वा शरणं त्वत्तोत्तद्दातीति तथा हे नं २

चिरमिह वृजिनार्त्तस्तप्यमानोनुतापैरवितृषषडमित्रोलब्धशांतिः कथंचित् ॥ शरणद समुपे
तस्त्वत्पदाब्जं परात्मन्नभयमृतमशोकं पाहि मापन्नमीश ॥ ४९ ॥ श्रीभगवानुवाच ॥ सार्वभौम म
हाराज मतिस्ते विमलोर्जिता ॥ वरैः प्रलोभितस्यापि न कामैर्विहता यतः ॥ ५० ॥ प्रलोभितो वरै
र्यत्त्वमप्रमादाय विद्धि तत् ॥ न धीरेकांतभक्तानामाशीर्भिर्भिद्यते क्वचित् ॥ ५१ ॥ युंजानाना
मभक्तानां प्राणायामादिभिर्मनः ॥ अक्षीणवासनं राजन् दृश्यते क्वचिदुत्थितं ॥ ५२ ॥ विचर
स्व महीं कामं मय्यावेशितमानसः ॥ अस्त्वेवं नित्यदा तुभ्यं भक्तिर्मय्यनुपायिनी ॥ ५३ ॥

शरणद समुपेतः प्राप्तोहं ॥ अशोकत्वे हेतुः ऋतं ॥ आपन्नं ॥ आपदाव्याप्तं पाहीति ॥ ४९ ॥ ५० ॥ अप्रमादाय प्रमा
दनभवत्येव ॥ कुत इत्यत आह ॥ न धीरिति ॥ एकांतभक्तानां धीराशीर्भिः प्राप्ताभिरपि न भिद्यते ॥ न सज्जत इत्यर्थः ॥
५१ ॥ व्यतिरेकमाह ॥ युंजानामिति ॥ उत्थितं विषयाभिमुखं ॥ ५२ ॥ तुभ्यं नव ॥ ५३ ॥

भा० द० उ० ॥१४॥ श्रीकृष्णविवाहान्निरूपयितुं बलदेवविवाहं नवमस्कंधोक्तमनुस्मारयति आनर्तेति ॥१५॥ मात्रां कलां गरुडो
१२ यथा देवान्प्रमथ्य सुधामहरत्तथेति ॥१६॥ राक्षसो युद्धहरणादि स्मृतेः ॥ राज्ञः प्रमथ्येति स्वदुःसारा हृतसेन विवाहेनोप

सोपि दग्धाविति मृषा मन्वानो बलकेशवौ ॥ बलमाकृष्य सुमहन्मगधान्मागधो ययौ ॥१४॥ आनर्ताधिपतिः श्रीमान्रैवतो रेवतीं सुताम् ॥ ब्रह्मणा चोदितः प्रादाद्बलायेति पुरोदितम् ॥१५॥ भगवानपि गोविंद उपयेमे कुरूद्वह ॥ वैदर्भीं भीष्मकसुतां श्रियो मात्रां स्वयंवरे ॥ प्रमथ्य तरसा राज्ञः शाल्वादींश्चैद्यपक्षगान् ॥ पश्यतां सर्वलोकानां तार्क्ष्यपुत्रः सुधामिव ॥१६॥ राजोवाच ॥ भगवान्भीष्मकसुतां रुक्मिणीं रुचिराननां ॥ राक्षसेन विधानेन उपयेम इति श्रुतं ॥१७॥ भगवन्श्रोतुमिच्छामः कृष्णस्यामिततेजसः ॥ यथा मागधसाल्वादीन्जित्वा कन्यामुपाहरत् ॥१८॥ ब्रह्मन्कृष्णकथाः पुण्या माध्वीर्लोकमलापहाः ॥ को नु तृप्येत शृण्वानः श्रुतज्ञो नित्यनूतनाः ॥१९॥

येमे परिणीतवान् श्रुतं ॥१७॥ पूर्वमेव बासामान्यतः ॥ श्रुतं विशेषतस्तु श्रोतुमिच्छामः ॥१८॥ अवृष्णोत्सुक्यमाविष्करोति ब्रह्मन्निति पुण्या महाफलाः ॥ माध्वीः श्रुतिमधुराः ॥ लोकस्य मलापहाश्च शृण्वानः शृण्वन्नित्यर्थः ॥ श्रुतज्ञः श्रुतसारवित् ॥ नित्यनूतनाः ॥ प्रतिक्षणमास्वाद्यवित्प्रतीयमानाः ॥१९॥ ॥ ॥ ऽऽ ॥ ॥ ॥ ऽऽ ॥ ऽऽ ॥ ॥ १२

वेगरभसं वेगोद्रेकं १

८ ॥ भीरुभीतवत् ॥ भीरोरपिभीतवदित्यर्थः ॥ वेरतुः पलायेतां ॥ वह्नयोजनं देशम् ॥ च ॥ अप्रमाणवित् ॥ प्रमाणमि
यत्तातन्नवेत्तीतितथा ॥ ९ ॥ तुगमेकादशयोजनोन्नतं ॥ प्रकर्षेणवर्षत्यस्मिन्निति प्रवर्षण इत्याख्यायस्यतं तदाह

विलोक्यवेगरभसं रिपुसैन्यस्यमाधवौ ॥ मनुष्यचेष्टामापन्नौ राजन्द्रुद्रुवतुर्द्रुतं ॥ ७ ॥ विहायवि
त्तं प्रचुरमभीतौ भीरुभीतवत् ॥ पद्भ्यांपद्मपलाशाभ्यांचेरतुर्बहुयोजनं ॥ ८ ॥ पलायमानौतौदृ
ष्ट्वामागधः प्रहसन्बली ॥ अन्वधावद्रथानी[illegible]कैरीशयोरप्रमाणवित् ॥ ९ ॥ प्रद्रुत्यदूरंसं
श्रांतौतुंगमारुहतांगिरिं ॥ प्रवर्षणाख्यं भगवान्नित्यदायत्रवर्षति ॥ १० ॥ गिरौ निलीनावाज्ञाय
नाधिगम्यपदं नृप ॥ ददाह गिरिमेधोभिः समंतादग्निमुत्सृजन् ॥ ११ ॥ ततउत्पत्यतरसाद
ह्यमानतटावुभौ ॥ दशैकयोजनोत्तुंगान्निपेततुरधोभुवि ॥ १२ ॥ अलक्ष्यमाणौ रिपुणासानु
गेनयदूत्तमौ ॥ स्वपुरीं पुनरायातौ समुद्रपरिखां नृप ॥ १३ ॥ भगवानिंद्रः ॥ १० ॥ तत्रविचिन्वन्नपितयोःपदं
निलयंस्थानं ॥ अनधिगम्य ॥ ११ ॥ ततोगिरेः दशचएकंचयानियोजनानितावदुत्तुंगात् ॥ मागधसंरोधदेशंमति

कृ॰स्यापरतौधीतिपिवः ॥ १९ ॥ २३ ॥

लोकानाप्नोति ॥ लोकात्लोकांतरं पर्य्यटति नैकत्रनिर्वृतिष्ठतीत्यर्थः ॥ नाप्नोतीति पाठे सुरेश्वरोपिसन्लोकान्नाप्नोति ॥ उत्तमश्लोकानाप्नोतिप्राप्तइवक्षिप्यतीत्यर्थः शेतेसुखमास्तइत्यर्थः तदेवाह सर्वेषांगेषुवा कपायायादिषु विज्वरस्तापरहितः ॥ ३१ ॥ स्वलाभः स्वतस्वप्राप्तलाभः ॥ आत्मलाभोवातेनतुष्टात् ॥ ३२ ॥ साधू

असंतुष्टोऽसकृल्लोकानाप्नोत्यपिसुरेश्वरः ॥ अकिंचनोपिसंतुष्टः शेतेसर्वांगविज्वरः ॥ ३१ ॥ विप्रान्स्वलाभसंतुष्टान्साधून्भूतसुहृत्तमान् ॥ निरहंकारिणः शांतान्नमस्येशिरसासकृत् ॥ ३२ ॥ कच्चिद्वः कुशलंब्रह्मन्राजतोयस्यहिप्रजाः ॥ सुखंवसंतिविषयेपाल्यमानाः समेप्रियः ॥ ३३ ॥ यतस्त्वमागतोदुर्गंनिस्तीर्य्येहयदिच्छया ॥ सर्वंनोब्रूह्यगुह्यंचेत्किंकार्य्यंकरवामते ॥ ३४ ॥ एवंसंपृष्टसंप्रश्नोब्राह्मणः परमेष्ठिना ॥ लीलागृहीतदेहेनतस्मै सर्वमवर्णयत् ॥ ३५ ॥

न्स्वधर्म्मनिष्ठान् ॥ ३२ ॥ यस्यराज्ञोविषयेदेशे ॥ ३३ ॥ यतः स्थानात् यदिच्छ ॥ या ॥ यस्यकार्य्यस्येच्छयादुर्गंसमुद्रं ॥ ३४ ॥ संपृष्टः संप्रश्नः प्रष्टव्योऽर्थोयस्य सः ॥ परमेष्ठिनापरमेश्वरेण ॥ वंधूनामभिप्रेतं ॥ रुक्मिणश्चेष्टितमित्यादिसर्वं ॥ रुक्मिण्याःस्वयमेकांतेलिखित्वादत्तपत्रिकांमुद्रामुन्मुच्यकृष्णाय

२०।२१।२२।२३ चैद्यममन्यत तस्या वरमित्यर्थः ॥२४॥ अवेत्य ज्ञात्वा ॥ असितापांगी सुनीलकटाक्षी ॥ रुक्मायफलसमाने तं प्रे
षयामास ॥२५॥ प्रतीहारैः द्वारपालैः ॥ आत्मानं श्रीकृष्णम् ॥२७॥ अभिमृशन् शनैः संदर्शयन् ॥२८॥ स धर्मोऽस्य ब्राह्म

श्रीबादरायणिरुवाच ॥ राजासीद्भीष्मको नाम विदर्भाधिपतिर्महान् ॥ तस्य पंचाभवन् पुत्राः कन्यैका
च वरानना ॥२०॥ रुक्म्यग्रजो रुक्मरथो रुक्मबाहुरनंतरः ॥ रुक्मकेशो रुक्ममाली रुक्मिण्येषां स्व
सा सती ॥२१॥ सोपश्रुत्य मुकुंदस्य रूपशीलगुणश्रियः ॥ गृहागतैर्गीयमानास्तं मेने सदृशं पतिं ॥२२॥
तां बुद्धिलक्षणौदार्यरूपशीलगुणाश्रयां ॥ कृष्णश्च सदृशीं भार्यां समुद्वोढुं मनो दधे ॥२३॥ बंधू
५४ नामिच्छतां दातुं कृष्णाय भगिनीं नृप ॥ ततो निवार्य कृष्णद्विड्रुक्मी चैद्यममन्यत ॥२४॥ तदवेत्या
सितापांगी वैदर्भी दुर्मना भृशं ॥ विचिंत्याप्तं द्विजं कंचित्कृष्णाय प्राहिणोद्द्रुतं ॥२५॥ द्वारकां स समभ्येत्य प्रतिहारैः स६
प्रवेशितः ॥ अपश्यदाद्यं पुरुषमासीनं कांचनासने ॥२६॥ दृष्ट्वा ब्रह्मण्यदेवस्तमवरुह्य निजासनात् ॥ उपवेश्यार्हयां
चक्रे यथात्मानं दिवौकसः ॥२७॥ तं भुक्तवंतं विश्रांतमुपगम्य सतां गतिः ॥ पाणिनाभिमृशन्पादावव्यग्रस्तमपृच्छ
त ॥२८॥ कच्चिद्द्विजवरश्रेष्ठ धर्मस्ते वृद्धसंमतः ॥ वर्तते नातिकृच्छ्रेण संतुष्टमनसः सदा ॥२९॥ संतुष्टो यर्हि वर्तेत ब्रा
ह्मणो येन केनचित् ॥ अहीयमानः स्वधर्मात्स ह्यस्याखिलकामधुक् ॥३०॥
णस्याखिलकामदोग्धा ॥ यद्वा स ब्राह्मणोऽस्य विश्वस्याखिलकामधुगिति ॥३०॥ रामराम राम राम राम राम

भा० द० उ०
१८

हे विभो तत्तस्मान्मे मया भवान्खलु परिवृत्तः । आत्मा च भवतोऽर्पितः । अतस्त्वमत्रागत्य मां भवतो जायां विधेहि । विपक्षे बाधकं द्योतयंत्याह । मा वीरभागमिति । वीरस्य तव भागं मां । आरात् शीघ्रं एत्य आगत्य चैद्यो माभिमर्शतु मृगपतेर्बलिं गोमायुः शृगाल इव वेति ॥ ३८ ॥ अनेकजन्मकृतैः सुकृतैरिदमेव भूयादिति प्रार्थयते ॥ पूर्तेति ॥ पूर्तं

तन्मे भवान्खलु वृतः पतिरंग जायामात्मार्पितश्च भवतोऽत्र विभो विधेहि ॥ मा वीरभागमभिमर्शतु चैद्य आराद्गोमायुवन्मृगपतेर्बलिमंबुजाक्ष ॥ ३८ ॥ पूर्तेष्टदत्तनियमव्रतदेवविप्रगुर्वर्चनादिभिरलं भगवान्परेशः ॥ आराधितो यदि गदाग्रज एत्य पाणिं गृह्णातु मे न दमघोषसुतादयोन्ये ॥ ३९ ॥ श्वोभाविनि त्वमजितोद्वहने विदर्भान्गुप्तः समेत्य पृतनापतिभिः परीतः ॥ निर्मथ्य चैद्यमगधेंद्रबलं प्रसह्य मां राक्षसेन विधिनोद्वह वीर्यशुल्कां ॥ ४० ॥

कूपादि । इष्टमग्निहोत्रादि दत्तं हिरण्यादि । नियमस्तीर्थस्नानादिः ॥ व्रतं कृच्छ्रादि ॥ ३९ ॥ चेद्यायवंधुभिरार्प्पितायां । त्वयि किमधुना करणीयमित्यपेक्षायामाह । श्वोभाविनीति हे अजित श्वोभाविनि उद्वहने विवाहे । प्रथमं गुप्तः अलक्षित एवागत्य पश्चात्पृतनापतिभिः परिवृतः सन् । चैद्यादिबलं निर्मथ्य प्रसह्य हठात् । वीर्यप्रभावदर्शनमेव शुल्कं वैवाहिकं देयं यस्यास्तां मां । अनेन राक्षसेन विधिना उद्वह इति उपदेशरहस्यं ॥ ४० ॥

ब्राह्मणः कस्मात् तुह्ययावाचयति ॥ श्रुत्वेति ॥ अयमर्थः ॥ हे अच्युत ॥ हे भुवनसुंदरेति ॥ औत्सुक्यं द्योतयति ॥ क्व तव महिमा
क्वचाहं रूपकुलशीलादियुक्तापि त[illegible] तथापि अपगतत्रपा यस्मात् ॥ तन्मे चित्तं त्वय्याविशति ॥ आसज्जते ॥
ततः कुतस्तत्राह ॥ शृण्वतां कर्णविवरैः अंतःप्रविश्य अंगतापं ॥ अंगेति पृथक् संबोधनं वा ॥ हरतस्तव गुणान् ॥ श्रु
त्वा ॥ तथा दृशिमतां चक्षुष्मतां दृशामखिलार्थलाभात्मकं रूपं च श्रुत्वेति ॥ ३६ ॥ अहं कुलकन्यानामिदमतिधा

रुक्मिण्युवाच ॥ श्रुत्वा गुणान् भुवनसुंदर शृण्वतां ते निर्विश्य कर्णविवरैर्हरतोंऽगतापं ॥ रू
पं दृशां दृशिमतामखिलार्थलाभं त्वय्यच्युताविशति चित्तमपत्रपं मे ॥ ३६ ॥ का त्वा मुकुं
द महती कुलशीलरूपविद्यावयोद्रविणधामभिरात्मतुल्यं ॥ धीरा पतिं कुलवती न वृणी
त कन्या काले नृसिंह नरलोकमनोभिरामम् ॥ ३७ ॥

अहमिति माशंकीत्याह ॥ हे मुकुंद ॥ हे नृसिंह ॥ नरवरश्रेष्ठ ॥ का नाम कन्या कुलवती तथा महती पुरुगुणो
दारा ॥ तथा धीरा धीरमती ॥ त्वां पतिं न वृणीत ॥ मय्येव केयं दोषशंकेति भावः ॥ कथंभूतं तं कुलशीलादि
भिरात्मनैव तुल्यं निरुपममित्यर्थः ॥ द्रविणं द्रव्यसंपत् ॥ धाम प्रभावः ॥ तथा नरलोकमनसामभिरामोऽ
भिरमणं यस्मात्तं ॥ किंच काले विवाहावसरे ॥ ३७ ॥

इति दशमे द्विपंचाशत्तमः ॥५२॥ त्रिपंचाशत्तमे गत्वाक्रिदर्भानद्रुतेहितः ॥ रुक्मिणीमहरत्कृष्णो मिषतां द्विषतां
बलात् ॥१॥ निद्राया अलाभे कारणं तं वेदेति ॥ तया अकुंथितमत्यहं जानामीति ॥२॥ आनयिष्ये आनेष्यामि
राजन्यापसदान् ॥ राजन्येषु अतिहीनान् ॥ उन्मथ्य आनयने दृष्टांतः एधस इति ॥३॥ उद्वाहर्क्षमिति ॥ पैंस्यारात्रौ

इति श्रीमद्भागवते महापुराणे दशमस्कंधे रुक्मिण्याः संदेशो द्विपंचाशत्तमोऽध्यायः ॥५२॥ श्री
शुक उवाच ॥ वैदर्भ्याः स तु संदेशं निशम्य यदुनंदनः ॥ प्रगृह्य पाणिना पाणिं प्रहसन्निदम
ब्रवीत् ॥१॥ श्रीभगवानुवाच ॥ तथाहमपि तच्चित्तो निद्रां च न लभे निशि ॥ वेदाहं रुक्मिणा द्वे
षान्ममोद्वाहो निवारितः ॥२॥ तामानयिष्य उन्मथ्य राजन्यापसदान्मृधे ॥ मत्परामनवद्यां
गीमेधसोऽग्निशिखामिव ॥३॥ उद्वाहर्क्षं च विज्ञाय रुक्मिण्या मधुसूदनः ॥ रथः संयुज्यता
माशु दारुकेत्याह सारथिं ॥४॥ स चाश्वैः शैब्यसुग्रीवमेघपुष्पवलाहकैः ॥ युक्तं रथमुपानी
यतस्थौ प्रांजलिरग्रतः ॥५॥

विवाहनक्षत्रमिति विज्ञाय ॥ तस्यां रात्र्यां प्रस्थापय ॥ प्रात
र्विदर्भदेशानगमत् ॥ श्वोभाविनि त्वमजितोद्वहने विदर्भान्गुप्तः समेत्येति ॥ रुक्मिणीसंदेशात् ॥४॥ से

ननुभवतुशिशुपालादीनांवलप्रमथनं॥ अंतःपुरमप्यधिगतायास्तवहरणेत्वद्बंधुवधोपिप्रसज्जेतेत्यतआ
ह॥ अंतःपुरेति॥ पुराहढदिर्वेत्तेमानांगिरिशामविकां॥ अंबिकामहंदेवममहरणंसुकरमितिभावः॥ ४१॥ ननुकि
मनेनानर्थकारिणानिर्बन्धेन॥ चेद्योपितावत्त्वद्व्यातागुणैकमोयौग्यरुचवरइतितत्राह॥ यस्येति॥ हे अंबुजाक्ष

अंतःपुरांतरचरीमनिहत्यबंधूंस्त्वामुद्वहेकथमितिप्रवदाम्युपायं॥ पूर्वेद्युरस्तिमहतीकुलदे
वयात्रायस्यांवहिर्नववधूर्गिरिजामुपेयात्॥ ४१॥ यस्यांघ्रिपंकजरजःस्नपनंमहांतोवांछंत्युमापति
रिवात्मतमोपहत्यै॥ यर्ह्यंबुजाक्षनलभेयभवत्प्रसादंजह्यामसून्व्रतकृशान्शतजन्मभिःस्यात्॥
४२ ब्राह्मणउवाच॥ इत्येतेगुह्यसंदेशायदुदेवमयाहृताः॥ विमृश्यकर्तुंयच्चात्रक्रियतांतदनंतरं
॥ ४३॥

यस्यभवतोंऽघ्रिपंकजरजोभिःस्नपनंआत्मनस्तमसोपहत्यैउमापतिरिवमहांतोवांछंति॥ तस्यभवतःप्रसा
दंयद्यहंनलभेयं॥ नप्राप्नुयां॥ तर्हिव्रतैरुपवासादिभिःकृशानअसून्प्राणान्जह्यांत्यजेयं॥ ततःकिमित्यतआह
शतजन्मभिरिति॥ एवमेववारंवारंजह्यां॥ यावच्छतजन्मभिरपिवःप्रसादःस्यादिति॥ ४२॥ यत्रयत्कर्तुंकरणीयम
तद्विमृश्यक्रियतां॥ तच्चानंतरमेवक्रियतामिति॥ ४३॥ ॥ ॥ऽऽ॥ ॥ ॥ऽऽ॥ ॥ ॥ऽऽ॥ ॥ ॥ऽऽ॥

भा०द०उ० वृध्वास्तस्याः कन्यायाः अथर्ववित् आथर्वणमंत्रवित् ॥१०॥११॥ अभ्युदयेऽचितं ॥१२॥ ततस्तु तुरंगसैन्यैः परिवृतः
१६ कुंडिनं भीष्मकस्य पुरं ययौ मदच्यवंतेम दच्युतस्तैः स्यंदनैर थैः हेममाचित्तामालाविद्धंते ये ष्ठुनैः ॥१३॥ कल्पितं भि
चक्रुः साम ऋग्यजुर्मंत्रैर्वधार क्षां द्विजोत्तमाः ॥ पुरोहितोऽथर्वविद्वै जुहाव ग्रहशांतये ॥१०॥ हिरण्य
रूप्यवासांसि तिलांश्च गुडमिश्रितान् ॥ प्रादाद्धेनूश्च विप्रेभ्यो राजा विधिविदांवरः ॥११॥ एवं चैद्यपती
राजा दमघोषः सुताय वै ॥ कारयामास मंत्रज्ञैः सर्वमभ्युदयोचितं ॥१२॥ मदच्युद्भिर्गजानीकैः स्यंद
नैर्हेममालिभिः ॥ पत्त्यश्वसंकुलैः सैन्यैः परीतः कुंडिनं ययौ ॥१३॥ तं वै विदर्भाधिपतिः समभ्येत्या
भिपूज्य च ॥ निवेशयामास मुदा कल्पितान्यनिवेशने ॥१४॥ तत्र शाल्वो जरासंधो दंतवक्त्रो विदूर
थः ॥ आजग्मुश्चैद्यपक्षीयाः पौंड्रकाद्याः सहस्रशः ॥१५॥ योत्स्यामः संहितास्तेन इति निश्चितमा
नसाः ॥ आजग्मुर्भूभुजः सर्वे समर्थबलवाहनाः ॥१६॥ श्रुत्वैतद्भगवान्रामो विपक्षीयनृपोद्यमं ॥ कृ
ष्णं चैकं गतं हर्तुं कन्यां कलहशंकितः ॥ बलेन महता सार्द्धं भ्रातृस्नेहपरिप्लुतः ॥ ॥ (कृष्णरामद्विषो यत्ताः कन्यां चैद्याय साधितुं ॥)
मितं ॥ परन्यनिवेशनम् ॥ तस्मिन् ॥१४॥ यदि कृष्णो हरेदिति शंकिताः ॥ कन्यां साधयितुमित्यर्थः ॥१५॥१६॥

ह । पुत्रस्य रुक्मिणः स्नेहेन तद्दूरमनुगच्छतीति । तथानेन शिशुपालेनाभिरुचिं द्योतयति । कर्माणि पुरालंका
रयित्वा देवार्चनादीनि ॥ ७ ॥ तान्येवाह पुरमित्यादिभिश्चतुर्भिः । संमृष्टाः संसिक्ताश्च मार्गादयो यस्मिंस्तत् । चि
त्रध्वजेषु पताकास्ताभिः समलंकृतं । अकारयत् । स्रग्गंधमाल्याभरणैरित्यत्र मत्वर्थीयः प्रत्ययः । यद्वा स्रगमा

आरुह्य स्यंदनं शौरिर्द्विजमारोप्य तूर्णगैः । आनर्तादेकरात्रेण विदर्भानगमद्धयैः ॥ ६ ॥ राजा स कुंडिनप
तिः पुत्रस्नेहवशानुगः । शिशुपालाय स्वां कन्यां दास्यन्कर्माण्यकारयत् ॥ ७ ॥ पुरं संमृष्टसंसिक्तमार्गर
थ्याचतुष्पथं । चित्रध्वजपताकाभिस्तोरणैः समलंकृतं । स्रग्गंधमाल्याभरणैर्विरजोंबरभूषितैः ।
जुष्टं स्त्रीपुरुषैः श्रीमद्गृहैरगुरुधूपितैः । पितॄन्देवान्समभ्यर्च्य विप्रांश्च विधिवन्नृप । भोजयित्वा
यथान्यायं वाचयामास मंगलं । सुस्नातां सुदतीं कन्यां कृतकौतुकमंगलां । अहतांशुकयुग्मेन भू
षितां भूषणोत्तमैः ॥ ११ ॥

धमाल्यानि आविभ्रतीति तथा तैः । तथा विरजोंबरैर्भूषितैश्च स्त्रीपुरुषैर्जुष्टं । तथा श्रीमद्भिर्गृहैश्च जुष्टं । च । यथा
न्यायमन्यायश्च कन्यां प्रति मंगलं वाचयामास । कृतं कौतुकेन विवाहसूत्रेण मंगलं यस्यास्तां । अहतेन नवीनेन भू
षणोत्तमैर्भूषितां ॥ ११ ॥

भा० द० उ० पुरोपवनंप्राप्तेनश्रीकृष्णेनविनिर्दिष्टः॥आत्मनंमांकथयेत्यादिष्टः॥२३॥नव्यग्रात्मनोदेहस्यगतिर्यस्यांतंदूतस्य
१७ लक्षणंततोत्क्वाप्यस्यसूचकमभिज्ञानंनातीतितथा॥२४॥तस्येप्राप्तंयदुनंदनंआवेदितवान्॥तन्नशशंस॥आत्मनोनय
नप्रति॥आत्मनःस्वयंश्रीकृष्णस्यानयनंप्रति॥तेनद्विजेनसत्यवचनंप्रोक्तमिति॥आत्मनःप्राणेश्वरस्येतिवा॥यद्वा॥आ

अथकृष्णविनिर्दिष्टःसएवद्विजसत्तमः॥अंतःपुरचरीदेवीराजपुत्रीददर्शह॥२४॥सातंप्रहृष्टवद
नमव्यग्रात्मगतिंसती॥आलक्ष्यलक्षणाभिज्ञासमपृच्छत्शुचिस्मिता॥२५॥तस्याआवेदयत्प्राप्तंश
शंसयदुनंदनं॥उक्तंचसत्यवचनमात्मनोनयनंप्रति॥२६॥तमागतंसमाज्ञायवैदर्भीहृष्टमानसा
नपश्यंतीब्राह्मणायप्रियमन्यन्ननामसा॥२७॥प्राप्तौश्रुत्वास्वदुहितुरुद्वाहप्रेक्षणोत्सुकौ
अभ्ययात्तूर्यघोषेणरामकृष्णौसमर्हणैः॥२८॥मधुपर्कमुपानीयवासांसिविरजांसिसः॥उपाय
नान्यभीष्टानिविधिवत्समपूजयत्॥२९॥

मानस्तस्याउपनयनंप्रतिश्रीकृष्णेनयदुक्तंसत्यवचनंतन्मानयिष्यइत्यादिवचः॥शशंस॥अवर्णयदित्यर्थः॥२६॥
तिश्रीकृष्णं॥अस्मिन्कार्येसर्वस्वार्पणमपिअपर्याप्तमितितदुक्त्वित्तप्रियमपश्यंतीतद्वाकेवलंननाम॥पश्चा
द्दत्तुरुद्रावित्यर्थः॥यद्वा॥मांश्रियेयेनमंतिनेतावत्सर्वसंपदामास्पदंभवंति॥किंपुनर्मयिप्रपन्नायामितित्त

॥२४॥२४॥१८ [illegible]

१७॥ सर्पोर्द्रयात्पूर्वमेवौत्सुक्येन रुक्मिण्यचिंतयदित्याह॥ भीष्मकन्येति॥ प्रत्यापत्तिं॥ प्रत्यागमनं॥ १८॥ त्रियामा रा
त्रिस्तावन्मात्रेणांतरितः॥ अल्पराधस अंदभाग्यायाः॥ १९॥ जुगुप्सितं धार्ष्ट्यादि॥ अपीति शंकायां॥ नायाति हि कृतोद्यम
इति॥ अयमर्थः॥ आदौ कृतोद्यमत्वात्तेन प्रस्थापितवान्॥ प्रस्थानावसरे च मयि किंचिज्जुगुप्सितं मत्वा प्रत्याचष्टः॥ अ

त्वरितं कुंडिनं प्रागाद्गजाश्वरथपत्तिभिः॥१७॥ भीष्मकन्या वरारोहा कांक्षंत्यागमनं हरेः॥ प्रत्यापत्तिमप
श्यंती द्विजस्यागमनं तदा॥१८॥ अहो त्रियामांतरित उद्वाहो मेल्पराधसः॥ नागच्छत्यरविंदाक्षो नाहं वेद्म्य
त्र कारणम्॥ सोपि नावर्त्ततेद्यापि मत्संदेशहरो द्विजः॥१९॥ अपि मय्यनवद्यात्मा दृष्ट्वा किंचिज्जुगुप्सि
तं॥ मत्पाणिग्रहणे नूनं नायाति हि कृतोद्यमः॥२०॥ दुर्भगाया न मे धाता नानुकूलो महेश्वरः॥ देवी वा
विमुखा गौरी रुद्राणी गिरिजा सती॥२१॥ एवं चिंतयती बाला गोविंदहृतमानसा॥ न्यमीलयत कालज्ञा
नेत्रे चाश्रुकलाकुले॥२२॥ एवं वध्वाः प्रतीक्षंत्या गोविंदागमनं नृप॥ वाम ऊरुर्भुजो नेत्रमस्फुरन्प्रियभाषि णः॥२३॥

नः सोपि द्विजो नूनं नायातीति॥२०॥ यद्वा ततो निर्गतोपि श्रीकृष्णो महद्दैववैमुख्यात्किंचिद्विलंबितं धीभवेदि॥
त्याह॥ दुर्भगाया इति॥२१॥ कालज्ञा अधुनापि गोविंदागमनं काल इति मन्वाना॥ किंचिद्दास्यत्तच्चित्रासती चिंतातप्ते लोचने
निमीलितवतीत्यर्थः॥२२॥ प्रियभाषिणः प्रियसूचकाः॥२३॥

भा०दे०उ०
१८

तस्यागमनं विज्ञाय हृष्टहृदयेन ॥ पद्मामिति ॥२४॥ अपिच मृदंगेत्यादि जघ्निरे ॥ आहता वादिता इत्यर्थः ॥२५॥
वीरमुख्या गणिकोत्तमाः ॥२६॥ उपस्पृश्य आचम्य ॥२७॥ प्रवयसो वृद्धा ॥ भवान्वितामिति भवस्योपसर्ज्ज

पद्मां विनिर्ययौ द्रष्टुं भवान्याः पादपल्लवं ॥ साचानुधावती सम्यङ्मुकुंदचरणांबुजं ॥ यत्तवाङ्गा
त्रभिः सार्द्धं सखीभिः परिवारिता ॥ गुप्ता राजभटैः शूरैः सन्नद्धैरुद्यतायुधैः ॥३४॥ मृदंगशंख
पणवास्तूर्या भेर्यश्च जघ्निरे ॥३५॥ नानोपहारवलिभिर्वीरमुख्याः सहस्रशः ॥ स्रग्गंधवस्त्राभ
रणैर्द्विजपत्न्यः स्वलंकृताः ॥ गायंतश्च स्तुवंतश्च गायका वाद्यवादकाः ॥ परिवार्य वधूं जग्मुः
सूतमागधवंदिनः ॥३६॥ आसाद्य देवसदनं धौतपादकरांबुजा ॥ उपस्पृश्य शुचिः शांता प्र
विवेशांबिकांतिकं ॥३७॥ तां वै प्रवयसो बाला विधिज्ञा विप्रयोषितः ॥ भवानीं वंदयांचक्रुर्भ
वपत्नीं भवान्वितां ॥३८॥ नमस्ये त्वांबिकेभीक्ष्णं स्वसंतानयुतां शिवां ॥ भूयात्पतिर्मे भगवान्कृष्णस्तद
नुमोदतां ॥३९॥

नत्वं स्त्रीकर्मोचितमुक्तं ॥३८॥ नमस्य इति ॥ रुक्मिण्या तदेव दृष्टोऽयं मंत्रः ॥ ससंतानयु
तां ॥ गणेशादिसहितां ॥ आत्मारामोऽसौ कथं त्वत्पतिर्भवेत् ॥ इति चेदत आह ॥ तदनुमोदतामिति भवतीति

श्रीशिवविवाहे

१८

महामतिरित्यनेन श्रीकृष्णो वोढं कन्यामुद्वोढुमेवागतः॥ स्यादितिवरोचितेन विधिनातु मपूजयदितिसूचि
तं यथावत्॥३०॥ समेतानां राज्ञां मध्ये वीर्याद्यनतिक्रम्य तं तमर्हितवानित्यर्थः॥३१॥ श्रीकृष्णस्य भाविकमेसूचकं जे
नानुरागं दर्शयति॥ कृष्णमागतमिति त्रिभिः॥३२॥ अस्यैव रुक्मिण्येव॥ अर्हत्येव॥ असावपि॥ भैष्म्याएव समुचित एव

तयोर्निवेशनं श्रीमदुपकल्प्य महामतिः॥ ससैन्ययोः सानुगयोरातिथ्यं विदधे तथा॥३०॥ एवं रा
ज्ञां समेतानां यथावीर्यं यथावयः॥ यथाबलं यथावित्तं सर्वैः कामैः समर्हयत्॥३१॥ कृष्णमागतमा ग२
कर्ण्य विदर्भपुरवासिनः॥ आगत्य नेत्राञ्जलिभिः पपुस्तन्मुखपंकजं॥३२॥ अस्यैव भार्या भवितुं
रुक्मिण्यर्हति नोपरा॥ असावप्यनवद्यात्मा भैष्म्याः समुचितः पतिः॥ किंचित्सुचरितं यन्नस्तेन तु
ष्टस्त्रिलोककृत्॥ अनुगृह्णातु वैदर्भ्याः पाणिं गृह्णातु पाणिमच्युतः॥ एवं प्रेमकलावद्धा वदंतिस्म पु
रौकसः॥ कन्या चांतःपुरात्प्रागाद्भटैर्गुप्ताम्बिकालयम्॥३३॥

चेति षडवधारणानि॥ तत्रैकस्मिन्व्यतिरेकप्रदर्शनमुपलक्षणार्थं नापरेति॥ नचवाक्यभेददोषः॥ अन्
द्यविधेयभेदेन विभिन्नानामेकवाक्यानां सहप्रयोगात्॥ अहमस्मि ईर्त्यादिवदिति॥ अयमेव चानुग्रह
इति निर्दिशति॥ अनुगृह्णात्विति॥३३॥

भा०द०उ० नकेवलंसमुद्भ्रःपेतुश्चेत्याह ॥ यामिति ॥ यात्राछलेनहरयेस्वलावन्यंसमर्पयंती ॥ यांवीक्ष्य क्षितौपेतुः ॥ सातान्प्राप्ता
१९ न्ह्रियेक्षततदेवाच्युतंचददर्शेत्युत्तरेणान्वयः ॥ चलेपद्मकोशतुल्यौचरणौचालयंती ॥ ५४ ॥ सुपर्णलक्षणं गरुड

यांवीक्ष्यतेनृपतयस्तदुदारहासव्रीडावलोकहृतचेतसउज्झितास्त्राः ॥ पेतुःक्षितौगजरथाश्वगताविमूढायात्राछलेनहरयेऽर्पयतीस्वशोभां ॥ सैवंशनैश्चलयतीचलपद्मकोशौप्राप्तिंतदाभगवतःप्रसमीक्षमाणा उत्सार्यवामकरजैरलकानपांगैःप्राप्तान्ह्रियैक्षतनृपान्ददृशेऽच्युतंसा ॥ ५४ ॥ तांराजकन्यांरथमारुरुक्षतींजहारकृष्णोद्विषतांसमीक्षतां ॥ रथंसमारोप्यसुपर्णलक्षणंराजन्यचक्रंपरिभूयमाधवः ॥ ५५ ॥ ततोययौरामपुरोगमैःशनैःशृगालमध्यादिवभागहृद्धरिः ॥ तंमानिनःस्वाभिभवंयशःक्षयंपरेजरासंधमुखानसेहिरे ॥ ५६ ॥ अहोधिगस्मान्यशआत्तधन्विनांगोपैर्हृतंकेशरिणांमृगैरिव ॥ ५७ ॥ इतिश्रीमद्भागवतेमहापुराणेपारमहंस्यांसंहितायांवैयासिक्यांदशमस्कंधेरुक्मिणीहरणंत्रिपंचाशत्तमोध्यायः ॥ ५३ ॥

ध्वजं ॥ ५५ ॥ हरिःसिंहः ॥ ५६ ॥ असहमानानांतेषामाक्रोशमाह ॥ अहोधिगस्मान् ॥ यतोऽस्माकंयशोगोपैर्हृतमिति ॥
५७ ॥ इतिश्रीदशमेत्रिपंचाशत्तमः ॥ ५३ ॥ चतुःपंचाशत्तमेत्वजित्वाराज्ञोरिपून्रुगान् ॥ रुक्मिणंचविरूप्याथभैष्मा

१९

सुगंधादिभिरंबिकां समपूजयत्॥ तथा विप्रस्त्रियोपि तैर्द्रव्यैर्वस्त्रादिभिश्च समपूजयदिति॥६०॥ शेषाणि निर्माल्यं
६१ सुनिवृत्तं मौनं भर्त्यांसखी॥६२॥ तां विलोक्य वीरमुमुक्षुरिति तत्त्वतीर्थश्लोकेनान्वयः॥ श्यामा त्र्यजातेरजस्का॥ कुंभ

अहिर्गंधादातैर्धूपैर्वासः स्रग्माल्यभूषणैः॥ नानोपहारबलिभिः प्रदीपावलिभिः पृथक्॥ विप्रस्त्रियः
पतिमतीस्तथा तैः समपूजयत्॥ लवणापूपतांबूलकंगसूत्रफलेक्षुभिः॥६०॥ तस्येस्त्रियस्ताः प्रददुः शे
षायुयुजुराशिषः॥ ताभ्यो देव्येन मस्कृत्य केशेषां श्रजगहेवधूः॥६१॥ मुनिवृत्तमथात्यक्त्वा निश्चक्राम विवि
कागृहात्॥ प्रगृह्य पाणिना भर्त्यारत्नमुद्रोपशोभिना॥६२॥ तां देवमायामिव वीरमोहिनीं सुमध्यमां
कुंडलमंडिताननां॥ श्यामां नितंबार्पितरत्नमेखलां व्यंजत्स्तनीं कुंतलशंकितेक्षणां॥ शुचिस्मितां बिंब
फलाधरद्युतिशोणायमानद्विजकुंदकुड्मलां॥ पदा चलंतीं कलहंसगामिनीं शिंजत्कलानूपुरधा
मशोभिना॥ विलोक्य वीरमुमुक्षुः समागता यशस्विनस्तत्कृतहृच्छयार्दिताः॥६३॥

तेभ्यः शंकिते इव चपले ईक्षणे यस्यास्तां॥ द्विजाएव कुंदानां कुड्मलानि॥ बिंबफलवद्योऽधरस्तस्य द्युतिभिः॥
शोणायमाना नियस्यास्तां॥ कलाशोभा तद्युक्तं नूपुरं॥ शिंजद्ध्वनत्कलानूपुरं च॥ तस्य धाम दीप्तिः॥ तेन शोभितं श्री
अंगं यस्य तेन पदा चलंतीं॥६४॥

भा० द० उ० च॥ अप्राप्तदारमिव हृतदारमिवातुरं॥९॥ निष्ठास्थैर्य्यः॥१०॥ कुहको नर्त्तयिता॥ तस्येच्छया दुःखेपीहमानत्वेन पारवश्यं
२० व्यक्तं दर्शितं॥११॥ अत्र चाहमेव दृष्टांत इत्याह॥ जरासंध॥ शौरेरिति॥ कस्मात्सकाशात्॥ एवं संयुगपरं केवल॥ अते

हन्यमानबलानीका वृष्णिभिर्जयकांक्षिभिः॥ राज्ञानो विमुखा जग्मुर्जरासंधपुरःसराः॥८॥ शिशुपालं सम
भ्येत्य हृतदारमिवातुरं॥ नष्टत्विषं गतोत्साहं शुष्यद्वदनमब्रुवन्॥९॥ भो भो पुरुषशार्दूल दौर्मनस्य
मिदं त्यज॥ न प्रियाप्रिययो राजन्निष्ठा देहिषु दृश्यते॥१०॥ यथा दारुमयी योषिन्नृत्यते कुहकेच्छया
एवमीश्वरतंत्रोयमीहते सुखदुःखयोः॥११॥ शौरेः सप्तदशाहं वै संयुगानि पराजितः॥ त्रयोविंशति
भिः सैन्यैर्जिग्ये एकमहं परं॥१२॥ तथाप्यहं न शोचामि न प्रहृष्यामि कर्हिचित्॥ कालेन दैवयुक्तेन जा
नन्विद्रावितं जगत्॥१३॥ अधुनापि वयं सर्वे वीरयूथपयूथपाः॥ पराजिताः फल्गुतंत्रैर्यदुभिः कृ
ष्णपालितैः॥१४॥ रिपवो जिग्युरधुना काल आत्मानुसारिणि॥ तदा वयं विजेष्यामो यदा कालः प्रद
क्षिणः॥१५॥ एवं प्रबोधितो मित्रैश्चैद्योगात्सानुगः पुरं॥ हतशेषाः पुनस्तेपि ययुः स्वं स्वं पुरं नृपाः॥१६॥

वाजितवानहम्॥१२॥ दैवमदृष्टं तद्युक्तेन॥१३॥ फल्गुतंत्रैः॥१४॥ प्रदक्षिणः अनकूलः स्यात्॥१५॥१६॥ राम २०

इतीति॥ अहो धिगित्येवं वदंतः सुसंरब्धाः क्रोधाविष्टाः॥ दंशिताः कृतसन्नाहाः॥ परिक्रांताः परिवृताः॥ अन्वीयुः॥ अन्वधाव
न्॥ १॥ विस्फूर्ज्य टंकारयित्वा॥ २॥ परेषां शराणां वाहुल्ये यादवानामचलत्वे दृष्टांतः॥ ३॥ एच्छन्नं॥ ऐच्छत॥ ४॥ मास्मभैः माभ

श्रीशुक उवाच॥ इति सर्वे सुसंरब्धा वाहानारुह्य दंशिताः॥ स्वैः स्वैर्बलैः परिक्रांता अन्वीयुर्धृतकार्मुकाः॥ १॥
तानापतत आलोक्य यादवानीकयूथपाः॥ तस्थुस्तत्संमुखा राजन्विस्फूर्ज्य स्वधनूंषि ते॥ २॥ अश्वपृष्ठे गजस्कंधे
रथोपस्थे च कोविदाः॥ मुमुचुः शरवर्षाणि मेघा अद्रिष्वपो यथा॥ ३॥ पत्युर्बलं शरासारैश्छन्नं वीक्ष्य सु
मध्यमा॥ सव्रीडमैक्षत्तद्वक्त्रं भयविह्वललोचना॥ ४॥ प्रहस्य भगवानाह मास्मभैर्वामलोचने॥ विनंक्ष्य
त्यधुनैवैतत्तावकैः शात्रवं बलं॥ ५॥ तेषां तद्विक्रमं वीरा गदसंकर्षणादयः॥ अमृष्यमाणा नाराचै
र्जघ्नुर्हयगजान्रथान्॥ ६॥ पेतुः शिरांसि रथिनामश्विनां गजिनां भुवि॥ सकुंडलकिरीटानि सोष्णीषा
णि च कोटिशः॥ हस्ताः सासिगदेष्वासाः करभा ऊरवोंघ्रयः॥ अश्वाश्वतरनागोष्ट्रखरमर्त्यशिरां
सि च॥ ७॥

यं कुरु॥ हे वाम लोचने॥ वराङ्गि॥ तावकैः त्वदीयैः कृत्वा॥ ५॥ स चासौ विक्र
मश्च तं॥ ६॥ उष्णीषाणि शिरोवतंसवस्त्राणि॥ तत्सहितानि शिरांसि करभाः प्रकोष्ठाः॥ ऊरुविशेषणं वा॥ ७॥ राम

भा०द०उ० २८॥२९॥३०॥३१॥३२॥३३॥ परित्रासेन कंपितान्यंगानि यस्यास्तया शुचा शोकेन शुष्यन्मुखं यस्याः रुद्धकंठं यस्याः
२१ सा चासौ चतया ॥ कातर्येण वैक्लव्येन विस्रंसिता हेममयी माला यस्याः तया गृहीतः पादो यस्य सः ॥ ३४ ॥ स श्मश्रुके

पुनरन्यदुपादत्त तदप्यच्छिनदच्युतः ॥ २८ ॥ परिघं पट्टिशं शूलं चर्मासी शक्तितोमरौ ॥ यद्यदायुधमाद
दात्तत्सर्वमच्छिनद्धरिः ॥ २९ ॥ ततो रथादवप्लुत्य खड्गपाणिर्जिघांसया ॥ कृष्णमभ्यद्रवत्क्रुद्धः पतंग इ
व पावकं ॥ ३० ॥ तस्य चापततः खड्गं तिलशश्चर्म चेषुभिः ॥ छित्वासिमाददे तिग्मं रुक्मिणं हंतुमुद्य
तः ॥ ३१ ॥ दृष्ट्वा भ्रातृवधोद्योगं रुक्मिणी भयविह्वला ॥ पतित्वा पादयोर्भर्तुरुवाच करुणं सती ॥ ३२ ॥ योगे
श्वराप्रमेयात्मन् देवदेव जगत्पते ॥ हंतुं नार्हसि कल्याण भ्रातरं मे महाभुज ॥ ३३ ॥ श्रीबादरायणिरु
वाच ॥ तया परित्रासविकंपितांगया शुचावशुष्यन्मुखरुद्धकंठया ॥ कातर्यविस्रंसितहेममालया गृही
तपादः करुणो न्यवर्तत ॥ ३४ ॥ चैलेन बध्वा तमसाधुकारिणं सश्मश्रुकेशं प्रवपन्व्यरूपयन् ॥ तावन्म
मर्दुः परसैन्यमद्भुतं यदुप्रवीरा नलिनीं यथा गजाः ॥ ३५ ॥ कृष्णांतिकमुपव्रज्य ददृशुस्तत्र रुक्मिणम् ॥ ३६ ॥

शसहितानि स्थाने स्थाने ऽवशिष्टानि श्मश्रूणि केशाश्च यथा भवंति तथा ॥ तेनैवासिना प्रवपन् मुंडयन् व
रूपयन् विरूपमकरोत् ॥ ३५ ॥ ३६ ॥

॥१७॥१८॥१९॥२०॥गोपालस्यवेदपालकस्येतिवास्तवोऽर्थः॥तथासुदुर्मतेरिति॥शोभनात्रतुगरुडवतीदुष्टेष्वपिमतिर्य
स्यतस्येति॥२१॥२२॥यदूनांकुलपांसनब्रह्मदूषण॥वस्तुतस्तुयदूनांकुलस्यपते॥असनस्वयंचरिपुहन्ननचतुर॥असमसम

श्रीः रुक्मीतुराक्षसोद्वाहंकृष्णद्विडसहन्स्वसुः॥पृष्ठतोऽन्वगमत्कृष्णमक्षौहिण्यावृतोबली॥१७॥रुक्म्यमर्षीसुसंरब्धः
शृण्वतांसर्वभूभुजां॥प्रतिजज्ञेमहाबाहुर्दंशितःसशरासनः॥१८॥अहत्वासमरेकृष्णमप्रत्यूह्यचरुक्मिणीं॥कुं
डिनंनप्रवेक्ष्यामिसत्यमेतद्ब्रवीमिवः॥१९॥इत्युक्त्वारथमारुह्यसारथिंप्राहसत्वरः॥चोदयाश्वान्यतःकृष्ण
स्तस्यमेसंयुगंभवेत्॥२०॥अद्याहंनिशितैर्बाणैर्गोपालस्यसुदुर्मतेः॥नेष्येवीर्यमदंयेनस्वसामेप्रस
भंहृता॥२१॥विकत्थमानःकुमतिरीश्वरस्याप्रमाणवित्॥रथेनैकेनगोविंदंतिष्ठतिष्ठेत्यथाह्वयत्॥२२॥
धनुर्विकृष्यसुदृढंजघ्नेकृष्णंत्रिभिःशरैः॥आहचात्रक्षणंतिष्ठयदूनांकुलपांसन॥२३॥कुत्रयासि
५२ स्वसारंमेमुषित्वाध्वांक्षवद्धविः॥हरिष्येऽद्यमदंमंदमायिनःकूटयोधिनः॥२४॥यावन्नमेहतोबाणैः
शयीथामुंचदारिकां॥२५॥स्मयन्कृष्णोधनुश्छित्वाषड्भिर्विव्याधरुक्मिणं॥अष्टभिश्चतुरोवाहान्द्वा
भ्यांसूतंध्वजंत्रिभिः॥२६॥सचान्यद्धनुरादायकृष्णंविव्याधपंचभिः॥तैस्ताडितःशरौघैस्तुचिच्छेदधनुरच्युतः॥२७॥

घातइत्यस्माद्धन्तेःकर्त्तरिल्युप्रत्ययोनंद्यादिविहितः॥२३॥ध्वांक्षःकाकःसयथाहविर्मुष्णातितद्वत्॥वस्तुतस्तुअध्वां

त्तवदितिश्लेषः॥सहात्तवदित्यर्थः॥२४॥२५॥२६॥२७॥

भा॰ ७॰ उ॰ कुत इत्यत आह॥ आत्ममोह इति॥ ४४॥ परमार्थमाह॥ एक एवेति परः शुद्धः॥ ज्योतिश्चंद्रादिः यथोदकेषु नभो यथा घटादिष्वि
२२ ति॥ ४५॥ कुतस्तर्हि न चंद्रादिवद्देहात्मानं एकं शुद्धं प्रतीतः॥ तत्राह द्रव्यमधिभूतं॥ प्राणा इंद्रियाण्यध्यात्मं गुणाः शब्दादिनाधि
दैवकं तत्त्रयात्मकः देहोपाधिना शुद्धो न प्रतीयत इत्यर्थः॥ ४६॥ ननु देहसंबंधेनापि संसारे सति शुद्धत्वं गतमेव तत
त्राह॥ नात्मन इति॥ हे सति॥ अन्येन अधिभूतादिना आत्मनः संयोगवियोगौ न स्तः॥ कुतः असतः॥ असत्वादन्यस्येत्यर्थः॥

ज्योतिर्यथा आत्ममोहो नृणामेष कल्प्यते देवमायया॥ सुहृद्दुर्हृदुदासीन इति देहात्ममानिनां॥ ४४॥ एक एव परो ह्या
ववृषेऽसमान् ॥ राजभ्यो बिभ्यतः सुभ्रु समुद्रं शरणं गतान् ॥ बलवद्भिः कृतद्वेषान्प्रायस्त्यक्तनृ
न५ पासनान् ॥ ७ ॥ अस्पष्टवर्त्मनां पुंसामलोकपथमीयुषां ॥ आस्थिताः पदवीं सुभ्रु प्रायः सीदंति यो
षितः ॥ ८ ॥ निष्किंचना वयं शश्वन्निष्किंचनजनप्रियाः ॥ तस्मात्प्रायेण न ह्याढ्या मां भजंति सुमध्यमे
॥ ९ ॥ ययोरात्मसमं वित्तं जन्मैश्वर्य्याकृतिर्भवः ॥ तयोर्विवाहो मैत्री च नोत्तमाधमयोः क्वचित् ॥ १० ॥

रणं ॥ अलोकपथं ॥ अस्त्रीपारतंत्र्य पदवीं मार्गमास्थिताः ॥ अनुसृताः ॥ ८ ॥ निष्किंचना इति ॥ ९ ॥ आत्मसमं पर
स्परमनुरूपं ॥ जन्मैश्वर्य्याभ्यां सहिता आकृतिः रूपं जातिर्वा समा भवः ॥ आयातिः ॥ १० ॥ रामराम राम राम राम ६२

तदेवाभिनयति॥ वालव्यजनमिति॥ ७॥ उपाच्युतमच्युतस्य समीपे सा मणिनूपुराभ्यां रेजे॥ क्वणयती मणिमयी
नूपुरे कूजयतीत्यर्था॥ अंगुलीयवलयव्यजनानि अग्रहस्ते हस्ताग्रे यस्याः सा॥ वस्त्रांतेन गूढौ स्थगितौ कुचौ तयोः कुं
कुमेन शोणो हारः॥ तस्य भासा॥ नितंबे धृतया परार्ध्या अमूल्या कांच्या तया च रेजे॥ ८॥ तां निरीक्ष्य प्रीतः सन्

वालव्यजनमादाय रत्नदंडं सखीकरात्॥ तेन वीजयती देवी उपासांचक्र ईश्वरम्॥ ७॥ सो
पाच्युतं क्वणयती मणिनूपुराभ्यां रेजेंगुलीयवलयव्यजनाग्रहस्ता॥ वस्त्रांतगूढकुचकुंकु
मशोणहारभासा नितंबधृतया च परार्ध्यकांच्या॥ ८॥ तां रूपिणीं श्रियमनन्यगतिं निरी
क्ष्य या लीलया धृततनोरनुरूपरूपाम्॥ प्रीतः स्मयन्नलककुंडलनिष्ककंठवक्त्रोल्लसत्स्मितसु
धो हरिराबभाषे॥ ९॥

स्मयमानो हरिराबभाषे॥ कथंभूतां॥ या लीलया धृततनोः॥ तस्यानुरूपरूपम्॥ अनुरूपं यस्यास्तां॥ यथोक्तं श्री
पराशरेण॥ देवत्वे देवदेहेयं॥ मानुषत्वे तु मानुषी॥ विष्णोर्देहानुरूपां वै करोत्येषात्मनस्तनुमिति॥ किंच अल
कैः कुंडलाभ्यां निष्केण पदकेनालंकृतकंठेन च उद्दीप्तं शोभितं वक्त्रे उल्लसंती स्मितसुधा यस्य सः॥ ९॥

भा०द०उ०
८३

२ ति

चितालक्षणमाह ॥ पदेति ॥ नखैररुणश्रीः कांतिर्यस्य ॥ तेन सुजातेन कोमलेन पदा ॥१८॥ सुदुःखमप्रियश्रवणात् भ
यं त्यागशंकया शोकः ॥ अनुतापः ॥ तैर्विनष्टा बुद्धिर्यस्यास्तस्याः ॥ श्लथंति पतंति वलया यस्मात् तस्माद्धस्तात् ॥ देहश्चापपात वि

पदा सुजातेन नखारुणश्रिया भुवं लिखंत्यश्रुभिरंजनासितैः ॥ आसिंचती कुंकुमरूषितौ स्तनौ
तस्थावधोमुख्यतिदुःखरुद्धवाक् ॥१८॥ तस्याः सुदुःखभयशोकविनष्टबुद्धेर्हस्ताच्छ्लथद्वलय
तो व्यजनं पपात ॥ देहश्च विक्लवधियः सहसैव मुह्यन् रंभेव वातविहता प्रविकीर्य केशा
न् ॥१९॥ तद्दृष्ट्वा भगवान्कृष्णः प्रियायाः प्रेमबंधनं ॥ हास्यप्रौढिमजानंत्याः करुणः सोऽन्व
कंपत ॥२०॥ पर्यंकादवरुह्याशु तामुत्थाप्य चतुर्भुजः ॥ केशान्समुह्य तद्वक्त्रं प्रामृजत्पद्म
पाणिना ॥२१॥ प्रमृज्याश्रुकले नेत्रे स्तनौ चोपहतौ शुचा ॥ आश्लिष्य बाहुना राजन्ननन्यविष
यां सतीं ॥ सांत्वयामास सांत्वज्ञः कृपया करुणां प्रभुः ॥ हास्यप्रौढिभ्रमच्चित्तामतदर्हां सतां गतिः
॥२२॥

क्लवा अवशा धीर्यस्यास्तस्याः ॥१९॥ हास्यस्य प्रौढिं गांभीर्यं ॥२०॥ चतुर्भुज इति ॥ उत्थापनाश्लेषणं वक्त्रपरिमार्ज
नार्थं आविष्कृतचतुर्भुज इत्यर्थः ॥ समुह्य निबध्य ॥२१॥ अश्रुकले अश्रुभिः शोभिते ॥ शुचा शोकाश्रुभिः ॥ सांत्वयामा ॥८३॥
स ॥ अनुनीतवान् ॥२२॥

नदीर्घसमीक्षा विचारो यस्यास्तया ॥११॥ अथ इदानीमपि ॥१२॥ तर्हि किमित्यानीताहमिति चेदित्याशंक्याह चैद्येति
ममां विद्विषंति ॥१३॥ स्मयनुत्तये गर्वापनयनाय ॥१४॥ स्त्र्यपत्यार्थकामुकाः अतिदुःसह मोदर्भी अन्यमकामं त्वं चाह ॥ उदासीना

वैदर्भ्येतदविज्ञाय त्वयादीर्घसमीक्षया ॥ वृता वयं गुणैर्हीना भिक्षुभिः श्लाघिता मुधा ॥११॥
अथात्मनोनुरूपं वै भजस्व क्षत्रियर्षभं ॥ येन त्वमाशिषः सत्या इहामुत्र च लप्स्यसे ॥१२॥ चैद्य
साल्वजरासंधदंतवक्रादयो नृपाः ॥ मम द्विषंति वामोरु रुक्मी चापि तवाग्रजः ॥१३॥ तेषां वीर्य्य
मदांधानां दृप्तानां स्मयनुत्तये ॥ आनीतासि मया भद्रे तेजोपहरता सतां ॥१४॥ उदासीना वयं नू
नं न स्त्र्यपत्यार्थकामुकाः ॥ आत्मलब्ध्यास्महे पूर्णा गेहयोर्ज्योतिरक्रियाः ॥१५॥ श्रीवादरायणिरुवाच ॥ एतावदुक्त्वा भगवानात्मानं वल्लभामिव ॥ मन्यमानामविश्लेषात्तद्दर्पघ्न उपारम
त् ॥१६॥ इति त्रिलोकेशपतेस्तदात्मनः प्रियस्य देव्यश्रुतपूर्वमप्रियं ॥ आश्रुत्य भीता हृदि जातवेप
थुश्चिंतां दुरंतां रुदती जगाम ह ॥१७॥
२ के

इति गेहयोर्देहगेहयोरुदासीनाः अत एव ज्योतिरक्रियाः ज्योतिः प्रदीपादि तद्वत् साक्षिमात्रया क्रियारहिताः आ
स्महे वर्त्तामहे इति ॥१५॥ अविश्लेषाद्धेतोः आत्मानमिवेति एवशब्दार्थे इव शब्दः ॥१६॥ ॥१७॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥

भा॰ द॰ उ॰ असमत्वं दर्शयन्त्यः एं प्रबलैः ॥ अराजन्त्वमविज्ञाताः लौकिकहा ॥ अवसादनं निष्किंचनत्वं तत्प्रीतिरादृत्य गनादरणीयत
६४ अनोचितं निर्गुणत्वं ॥ रथाश्लाघ्यायोच भिक्षुभिः ॥ औदासीन्य मकामत्वं स्वदेशान् ॥ वोऽशासनं ॥ अस्त्वा दीर्घदर्शि
त्वेभ्ये प्साराणां वृद्धान्गुणान् हस्मन्मोट्विता न्मेषी न्यषधन्त ऋण स्त्वे वै ॥ भगवतः स्वनिद्यपराणी वयानि वृ
नानि ॥ तानि सर्वो लोकेषु परतया व्याचष्टाणा प्रतिभाषते ॥ तत्र यदुक्तं कस्मान्नोवव्रेषु समानिति ॥ तत्रासाम्यं सत्यमेव
त्याह ॥ नन्विति हे अरविन्दलोचन ॥ त्र्यधीशः ॥ त्रयाणां ब्रह्मादीनामप्यधीशः नियन्ता त्वं क्व ॥ क्व चाहं गुणप्रकृतिः

रुक्मिण्युवाच ॥ नन्वेवमेतदरविंदविलोचनाह यद्वै भवान्भगवतोऽसदृशी विभूम्नः ॥ क्व स्वे
महिम्न्यभिरतो भगवांस्त्र्यधीशः क्वाहं गुणप्रकृतिरज्ञगृहीतपादा ॥ २४ ॥ सत्यं भयादिव गुणे
द्विं भ्य उरुक्रमान्तः शेते समुद्र उपलंभनमात्र आत्मा ॥ नित्यं कदिन्द्रियगणैः कृतविग्रहस्त्वं त्वत्सेवकै
र्नृपपदं विधुतं तमोऽन्धम् ॥ २५ ॥

प॰ ६ रू॰ २ त्रिगुणस्वभावा प्राकृतामुग्धमायी प्रकृतिर्वा ॥ ननु त्वमधीश्वरोऽस्त्रीः सर्वे हपासत्वादित्यत आह ॥ अज्ञैः सकामैः ॥ ग्र
हीतौ पादौ यस्याः सा ॥ २४ ॥ गुणेभ्यो बिभ्यत इव सन्तः समुद्रं शरणं गत्वा तानि तितत्र आह ॥ सत्यमिति ॥ हे उरुक्रम ॥ मे बिभ
यामा वं दर्शयति ॥ गुणाः शब्दादयः एवं राजेन्द्र इति राजानः ॥ तेभ्यो भयादिवेति ॥ अंतर्हृदये समुद्रे हृदयाकाशे विषया
कारैरपरिच्छिन्ने इत्यर्थः ॥ शेते निश्चलतया प्रकाशते ॥ उपलंभनमात्रश्चेतन्यघन आत्मा भवानिति ॥ बल२

मामां त्वद्वचः किं न वदिष्यसीति श्रोतुकामेन ॥ श्रोतुमिछता क्ष्वेल्या नर्मणा एवमाचरितमुक्तं ॥ न तत्वतः ॥ हे अं
गने हे सुंदरि ॥ प्रेमसंरंभेण ॥ प्रणयकोपेन स्फुरितः कंपितो ऽधरो यस्मिंस्तत् ॥ कटाक्षेण कुटिलाक्षो देशोक्ते पेरो अ
रुणापांगो यस्मिंस्तत् ॥ अत एव सुंदरं कौटिल्यं भ्रुकुटीतटं यस्मिंस्तत् ॥ २३ ॥ ननु कलहे किं कौतुकं सुखं वा अत आ

श्रीभगवानुवाच ॥ मा मा वैदर्भ्यसूयेथा जाने त्वां मत्परायणां ॥ त्वद्वचः श्रोतुकामेन क्ष्वेल्या
चरितमंगने ॥ मुखं च प्रेमसंरंभस्फुरिताधरमीक्षितुं ॥ कटाक्षेपारुणापांगं सुंदरं भ्रुकुटी
तटं ॥ २३ ॥ अयं हि परमो लाभो गृहेषु गृहमेधिनां ॥ यन्नर्मैर्नीयते यामः प्रियया भीरु भामिनि ॥
२४ ॥ श्रीशुक उवाच ॥ सैवं भगवता राजन्वैदर्भी परिसांत्विता ॥ ज्ञात्वा तत्परिहासोक्तिं प्रियत्या
गभयं जहौ ॥ २५ ॥ बभाष ऋषभं पुंसां वीक्षंती भगवन्मुखं ॥ सव्रीडहासरुचिरस्निग्धापांगे
न भारत ॥ २६ ॥

ह ॥ अयं हीति नर्मैः ॥ नर्मभिः ॥ यामः कालः ॥ २४ ॥ २५ ॥ भगवतस्तस्य ऐश्वर्ययुक्तेन ॥ मुखं स
व्रीडहासेन रुचिरेण स्निग्धेनापांगेन वीक्ष्यमाणा ॥ २६ ॥ रामरामरामरामरामरामरामरामरामरा म

भा॰ ६॰ ९॰ ४५ बलिभुजामपि भवान्प्रेष्ठ इत्यत्र हेतुं वदंतीति युयोरात्मसमं वित्तमित्यनेनोक्तं अनौचित्यं परिहरति त्वं वाइ धि
ति फलात्मा परमानंदरूपः ॥ एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः समाजः सेवकत्वेन स्पर्शः से
वधः ॥ न तु पुंसः स्त्रियाश्च मिथो रतयोः अत एव सुखदुःखिनोः ॥ तदाकुलयोरित्यर्थः ॥ ४१ ॥ मिदं मिः मनोषितामु
धेत्यस्य परिहारस्त्वमिति भिन्नपदव्याख्यानं ॥ न्यस्तदंडैर्मुनिभिरितिमुधेत्यस्य परिहारः आत्मेति यदर्थे सर्वं प्रियं

त्वं वै समस्तपुरुषार्थमयः फलात्मा यद्वांछया सुमतयो विसृजंति कृत्स्नं ॥ तेषां विभो समुचि
तो भवतः समाजः पुंसः स्त्रियाश्च रतयोः सुखदुःखिनोर्न ॥ ४१ ॥ त्वन्यस्तदंडमुनिभिर्गदिता
नुभाव आत्मात्मदश्च जगतामिति मे वृतोसि ॥ हित्वा भवद्भ्रुव उदीरितकालवेगध्वस्ताशि
षोऽब्जभवनाकपतीन्कुतोन्ये ॥ ४२ ॥

जगतां तस्य जगतामात्मन ॥ स्तववर्णनं नवर्धेत्यर्थः ॥ किंच त्व
न्मद इति ॥ वेदभर्थ्यैत्स्व विज्ञापत्वयादीर्घसमीक्षयेति ॥ स्वस्मिन्नुक्तं दोषद्वयं परिहरति ॥ इतीति ॥ इति ज्ञा
त्वैवमेमया वृतोसीत्यज्ञानपरिहारः ॥ हित्वेति ॥ अदीर्घः समीक्षया परिहारः ॥ भवतो भ्रुवाः सकाशादु
दीरितो यः कालस्तस्य वेगस्तेन ध्वस्ता आशिषो येषां तान् ब्रह्मादीनपि विहाय कुतोऽन्ये वराकाइत्यर्थः
॥ ४२ ॥ ४५

कुत्सित इंद्रियगणो येषामिति वा ॥ ते त्वां नित्यं कृतविग्रहः ॥ तेषु त्वप्रतीते ॥ यदुक्तं त्यक्तनृपासनानि ॥ तदुक्तं मे
द्वित्याह ॥ विलसिवकैरिति ॥ नृपाणां पदमासनं ॥ अधंगादेन समुएवततत् ॥ अविवेकवकुलत्वात् विलसिवकैरेव तत्त्यक्तं किंपुन
र्वेक्रव्यैस्त्वया त्यक्तमिति ॥ २८ ॥ अस्य इव वर्त्मनो पुंसामलौकपथमीयुषामित्येतदुक्तं ॥ तदपि तथैवमित्याह ॥ चित्पादैति न
पशुभिः ॥ किंपुनर्वक्तव्यं ॥ तत्र वर्त्म अस्पष्टमिति ॥ किंच ॥ यस्माद्येभवतं अनुवर्तंते तेषामपीहितमलौकिकमित्यर्थः
आस्थिता पदवीस्तुभु प्रायः सीदंतियोषित इत्यस्य परिहारं ॥ वक्ष्यति पंचमश्लोकेन ॥ २९ ॥ निष्किंचनावयं शम्भ्वन्निष्किं

त्वत्पादपद्ममकरंदजुषां मुनीनां वर्त्मास्फुटं न पशुभिर्ननु दुर्विभाव्यं ॥ यस्मादलौकिकमि
वेहितमीश्वरस्य भूमंस्तवेहितमथो अनुयेभवंतं ॥ २९ ॥ निष्किंचनो न नु भवान्न यतोस्ति किं
चिद्यस्मैवलिं वलिभुजोपि वहंत्यजाद्याः ॥ न त्वाविदंत्युत्तपसोंतकमाशुतोंधाः प्रेष्टो भवान्वलिभु
जामपि तेपि तुभ्यं ॥ ३० ॥

ए १

चनजनप्रियाः ॥ तस्मात्प्रायेण ह्याढ्या मां भजंति सु मध्यम इत्येतत् श्लोकोक्तं परिहरति ॥ निष्किंचन इति दारिद्र्यतालद्वयं ॥ नि
ष्किंचन त्वत्तु भवतो न घटत इत्याह यस्मादिति ॥ अन्यतो वलिभुजपूजा ॥ अपि ब्रह्मादयोपि सैभवतेवलिंहरंति तस्य न
वेश्वरस्य भवतो दरिद्रतामघटत इत्यर्थः ॥ निष्किंचनाः प्रियाइत्यत्र तत्सुहृषेल्पद्रुः श्री हिरण्यवानिं दास्यादिति स्वयम
प्युभयथास्तीति ॥ प्रेष्ठो भवानिति ॥ वलिभुजां ब्रह्मादीनां लोकेश्वराणां त्वं प्रेष्टस्ति पितुभ्यं तवेति ॥ तस्मात्प्रायेण न
ह्याढ्या मां भजंत्यस्योत्तरं ॥ न त्वाविदंतीति ॥ आढ्यतयांधात्वात्वामंतकं न विदंति पंतस्योत्तरं ॥ अप्रस्तवेव

नवपंचाशिकावृत्तिः पत्रं ४९ ॥

भा० द० उ० यच्चोक्तं यथात्मनोऽनुरूपामिति तत्राह । कान्यमिति श्लोकद्वयेन । गुणानामालयस्य तव सरोजगंधं जनतापवर्गं
४६ मोक्षरूपं । लक्ष्म्यालयं तत्सेव्यं सद्भिर्मुखरितं वर्णितं आघ्राय । अविगणय्य मर्त्यो मरणधर्मा कः सदा उरुभयं
यस्य तमन्यं का स्त्री श्रयेत सेवेत । अर्थे विविक्ता दृष्टिर्यस्याः । गुणालयस्येत्यनेन गुणैर्हीनाय यदुक्तं तदपास्तं ॥४२॥

विरः

कान्यं श्रयेत तव पादसरोजगंधमाघ्राय सन्मुखरितं जनतापवर्गं । लक्ष्म्यालयं त्वविग-
णय्य गुणालयस्य मर्त्या सदोरुभयमर्थविविक्तदृष्टिः ॥४२॥ तत्त्वानुरूपमभजं ज- रा
गतामधीशमात्मानमत्र च परत्र च कामपूरं । स्यान्मे तवांघ्रिररणं सृतिभिर्भ्रमंत्या यो वै
भजंतमुपयात्यनृतापवर्गः ॥४३॥

अतस्त्वामेवाहमभजमित्याह । तत्त्वेति । प्रार्थयते स्यादिति । अरणं शरणं । सृतिभिर्देवतिर्यगा-
दिभिर्जन्मभिः । पाठांतरे त्वर्थवादवत्कुत्सकर्मभ्रमणैरित्यर्थः । कथंभूतः कथंभूतस्य तव । यस्त्वं अन-
तस्य संसारस्यापवर्गो नाशो यस्मात्सः । भजंतमुपयाति । आत्मसात्करोतीति । तस्य तवांघ्रिरिति भी-
तस्य शरणे रक्षानुरूपभजनयोग्य । अतस्त्वामहमभजमित्यर्थः ॥४३॥ ॥ ऽऽ ॥ ॥ऽऽ ॥ ॥ऽऽ ॥ ४६

अ ४

स्वाज्ञानं परिहृत्य पुरुषांतरगामित्वेन प्रदीप्तकोपसंरंभेण तस्मिन्नेवाज्ञानं मा पादयतिजाड्यमिति ॥ सिंहो यथा पश्
न् विद्राव्य स्वबलिं हरति ॥ तथा शार्ङ्गधनुर्निनादेनैव जरासंधादीन् विद्राव्य मां स्वमार्गाश्रयं स्वभागं हृतवानसि ॥ तस्यानु
वर्णनं भोभयादुदधिं प्रपन्न इत्ययं चाभाषणं तज्जाड्यं मां चेन न्यदृतं इत्यर्थः ॥ ३३ ॥ यत्रान्यदस्यैष्टवर्त्मनामित्यादि
ना ॥ अपीत्वा मं जनं सीदंतीति वसादनं श्रमावहत्वमुक्तं तदपि भवेत्याह ॥ यद्वा छायेति यस्य ते वभजनं वां छयान्द पो

जाड्यं व च स्तव गदाग्रजयस्तु भूपान् विद्राव्य शार्ङ्गनिनदेन जहर्थ मां त्वं ॥ सिंहो यथा स्वबले
मीश्च पशून्स्व भामं तेभ्यो भयादुदधिशरणं प्रपन्नः ॥ ३ ॥ यद्वा छयानु पशि खाम णायो ऽग
वैण्य जायंत नाहुषगायाद्य एकपत्य ॥ राज्यानुसृज्य विविश्रवनमंबुजाक्ष सीदंति तेनु प
दवीं तद्ध स्थितांकिं ॥ ३४ ॥ चेन्य तद्धं न तु निनिर्गदितानुगतेव श्रोत्रं गरदस्व जगतां निति द्रैमे सूत
ति हित्वा भवद्भवद्भरित कालवेग ध्वस्ता प्रियां शु मनवेनाकपतीनकृतान्ने

त्वमाः ॥ अंगो वेण्य पिता वैण्य ॥ रघु ॥ जायंतो भरतः ॥ नाहुषो ययातिः ॥ गयस्त्वादिर्यस्यांते ॥ यस्ते तवपद
वीमार्गमाश्रिताः ते किं सीदंत्येव ॥ अपि तु त्वत्पदं प्राप्ता इत्यर्थः ॥ एवं च कोपावेशेनावसादनस्य परिहारो
स्पष्टवर्त्मनामित्येतदानंतर्यं विहायात्रोत्कर्षः ॥ ३४ ॥

भा०द०उ० तदेव तदुक्तं सर्वं प्रतिव्याख्याय प्रसन्नचित्तं मंत्रमुपदिशंस्त्याह द्वाभ्यां नैवेति ॥ आत्मनो रूपमित्यादि
४७ वचः अलीकं मिथ्येति नैव मन्ये ॥ यतो लोके कन्याया एव क्वचिद्रतिर्भवति यथा काशिराजकन्यानां अं
बांबिकांबालिकानां तिसृणां मध्ये अंबायाः कन्याया एव साल्वे रतिर्जाता तद्वत् व्यूढायाः परिणी

नैवालीकमहं मन्ये वचस्ते मधुसूदन ॥ अंबाया एव हि प्रायः कन्यायाः स्याद्रतिः क्वचित् ॥ व्यू
ढायाश्चापि पुंश्चल्या मनोऽभ्येति नवं नवं ॥ बुधोऽसतीं न बिभृयात्तां बिभ्रदुभयच्युतः ॥४०॥ श्री
भगवानुवाच ॥ साध्व्येतच्छ्रोतुकामैस्त्वं राजपुत्री प्रलंभिता ॥ मयोदितं यदन्वात्थ सर्वं तत्सत्य
मेव हि ॥४१॥ यान्यान्कामयसे कामान्मय्यकामाय भामिनि ॥ संति ह्येकांतभक्तायास्तव क
ल्याणि नित्यदा ॥४२॥ उपलब्धं पतिप्रेम पातिव्रत्यं च तेऽनघे ॥ यद्वाक्यैश्चाल्यमानाया न धीर्मय्य
पकर्षिता ॥४३॥

तायाः अपीति उभयस्मात् इहपरलोकद्वयाच्चभ्रष्टः इति ॥४०॥ प्रलंभिता उपह
संत्येव अ कामा २ सितासि ॥ अन्वात्थ अन्वाख्यातवती ॥४१॥ मयि एकांतभक्तायास्ते कामाय कामनिवृत्तये मोक्षपर्यवसा
यिन इत्यर्थः ॥४२॥ अनुवादेन वरानुदत्वा तामभिनंदति उपलब्धमिति यत् यस्मात् मयि वर्त्तमाना धी
नीपकर्षिता नान्यविषया जाता ॥४३॥ रामराम रामराम रामराम ॥ ४७

ये चोक्ता एतां वहन्वो गुणाः॥ राजपुत्री स्मिताभ्रूपैर्लोकपालविभूतिभिरित्यादिना तत्र सेर्षसंतापं संगुलिभंगं चा
हहाभ्यां॥ तस्याः स्युरिति॥ खरइव केवलं भारवाहः॥ गावो बलीवर्दा इव नित्यं व्यापारक्लिष्टाः॥ श्वान इवावमताः॥ विडाल
इव कृपणा हिंस्राश्च भृत्या इव किंकराः॥ न पातस्यादुर्भगायाः पतयः स्युः॥ यस्याः त्वत्कथा न प्राप्नुयादिति॥ ३७॥
तपाहितेपदांबुमकरंदमभिजिघ्रती सती या स्त्री विमूढा सा कांतोयमिति मतिर्यस्याः सा कांतमतिः॥ जीवन्नेव भजेति

तस्याः स्युर्च्युतनृपाभवतोपरे द्याः स्त्रीलिंगहेषु खरगोश्वविडालभृत्याः॥ यत्कर्णमूलम
रिकर्णनोपयापा दुष्पत्कथामदविरस्यसभासुगीता॥ ३७॥ त्वत्कुष्मश्रुरोमनखकेशपिनद्ध
मंतर्मांसास्थिरक्तकृमिविट्कफपित्तवातं॥ जीवन्नेव भजते कांतमतिर्विमूढा या ते पदा
बुमकरंदमजिघ्रती स्त्री॥ ३८॥ अस्त्वंबुजाहमनतेचरणानुरागश्रात्मन्नतस्य मयि चानतिरिक्त
हष्टेः॥ यद्यस्य वृद्धय उपात्तरजोतिमात्रो मामीचतस्ते दुहनः परमानुकंपा॥ ३९॥

त्वगादिभिः बहिर्दिमि॥ त्वगादिभिः बहिः पिनद्धं॥ अंतर्मांसादिमयमिति॥ ३८॥ यदुक्तमुदासीनावयमि
त्यादि तत्राह॥ अस्त्विति॥ यद्यपि त्वं निरपेक्षस्तथापि मम ते चरणानुरागोऽस्तु॥ मयि च मय्यपि न अतिरिक्ता
अतिशयवती दृष्टिर्यस्य तत्॥ आत्मन्॥ आत्मन्येव रतस्य॥ तर्हि तेन तव को लाभः॥ किंच॥ यर्हि अस्य विश्वस्य वृद्ध
ये उपात्तरजः सोऽतिमात्रा अत्कं गयेन सः॥ तथाभूतस्सन्मामीत्तं उरवार्थे॥ हहर्षे तरेवेन परमानुकंपा

भा॰द॰उ॰ प्रोद्वाहपर्वणि अनिरुद्धविवाहे ॥ अक्षगोष्ठ्यां ॥ द्यूतसभायां तस्य भ्राता तु वैधंतस्मिन्न् काले कालांतरे च तदनुस्मरण
९८ तः पुनः पुनः समुत्थं दुःखम् अस्माभिः योगो वियोगः संगीत्यात्र सह [illegible] इव वत्यसि ॥ अनेनैव अनि
रुद्धविवाहानंतर्यम् अस्य ज्ञातव्यं ॥ ६८ ॥ अपि दूत इति ॥ आत्मल [illegible] भने भवत्प्रार्थन ॥ मयि चिराय
भ्राता तु विरूपकरण युधि निर्जितस्य प्रोद्वाहपर्वणि च तत्र च अथ मत्तगोष्ठ्यां ॥ दुःखं समुत्थ
म सह्यो ऽस्मद्योगभीत्या नैवाब्रवीः किमपि ते नसर्वं जितास्ते ॥ ६९ ॥ दूत त्वया मलभ
ने सुविचित्र मंत्रः प्रस्थापितो मयि चिरायति मूल्यमेतत् ॥ मत्वा जिहासद इदं मंगमन
न्ययोग्यं इति छेत्तु नत्वयि वयं प्रतिनंदयामः ॥ ६९ ॥ तिस्त्रो भाविनि विवाहे ॥ आगंतव्यम् इति कृत
समये कथंचिद् अप्राप्यवति सति ॥ एतद्धि स्वं श्लिष्यं मत्वा ॥ इदम् अनन्ययोग्यम् अंगं जिहासे ॥ त्यक्तुम् इच्छामीति
वदूतं प्रस्थापितः ॥ तथा ह्युक्तं त्वया ॥ यद्यनुज्ञां न लभे प्रभवत्प्रसादं जह्याम सत्त्वं व्रतेन कृशानुशात
जन्मभिः स्याद् इति ॥ यद्वा ॥ अजितः इति छेदः ॥ त्यक्तुम् इच्छ इत्यर्थः ॥ ततव कुमत्त्वय्येव तत् छेत् ॥ नतव
प्रतिकर्तुं सक्यम् इत्यर्थः ॥ किंतु केवलं त्वां प्रतिनंदयामः ॥ हर्षयामः इत्यर्थः ॥ ६९ ॥ ऽऽ ॥ ऽऽ ९८

सुखा १

एकांतभक्तिमभिनंद्य तामेव दृढीकर्तुं सकामान्भक्तान्निंदति॥ ये मामिति॥ दांपत्ये दंपत्युपभोगार्थे॥ ४४॥ मायामोहितत्वमेवोपपादयति॥ मां प्राप्येति॥ अपवर्गस्य सह संपदो यस्मिंस्तं मां प्राप्य केवलसंपदस्व विषयान्वांछंति न तु मां सत्यपतिं तासां संपदामपि योऽहमेव पतिस्तं॥ ये विषया निरयेपि अतिनिकृष्टयोनावपि स्युस्तान्॥ किंच॥ तेषां मात्रात्मकत्वात् विषयात्मकत्वान्निरयः सुसंगम एव स्यात्॥ अतो मंदभाग्या इत्यर्थः॥ ४५॥

ये मां भजंति दांपत्ये तपसा व्रतचर्यया॥ कामात्मानोपवर्गेशं मोहिता माययाहि मे॥ ४४॥ मां प्रा
प्य मानिन्यपवर्गसंपदं वांछंति ये संपद एव तत्पतिं॥ ते मंदभागा निरयेपि ये [illegible] नृणां मा
त्रात्मकत्वान्निरयः सुसंगमः॥ ४५॥ दिष्ट्या गृहेश्वर्यसकृन्मयि त्वया कृतानुवृत्तिर्भवमोचनी ख
लैः॥ सुदुष्करासौ सुतरां दुराशिषो ह्यसुंभराया निकृतिंजुषः स्त्रियाः॥ ४६॥ न त्वादृशीं प्रणयिनीं गृहिणीं गृ
हेषु पश्यामि मानिनि यया स्वविवाहकाले॥ प्राप्तान्नृपान्न विगणय्य रहोहरो मे प्रस्थापि
तो द्विज उपश्रुतसत्कथस्य॥ ४७॥

हे गृहेश्वरि त्वया मयि भवमोचनी निष्कामानुवृत्तिः॥ कृता एतद्दिष्ट्या भद्रं॥ कथंभूता॥ खलैः सुदुष्करा आशिषो दुरभिप्रायायाः॥ अतः अ[illegible] असुंभरायाः [illegible] प्राणतर्पणपरायाः निकृतिंजुषः वंचनपरायाः स्त्रियास्तु तरामसावनुवृत्तिः सुदुष्करेति॥ ४६॥ किंच॥ सति निष्कामाः प्रेत्यैव मय्यनुवर्तमाना वह्व्यः॥ किंतु त्वया सदृशी कापि

दु.रा.७

भा० द० उ० आत्मारामत्वं व्यनक्ति द्वयेन ॥ चार्विति ॥ चार्व्ब्जकोशवदनं च आयतनानि बाहू नेत्राणि च सप्रेमहा
६५ सरसेन वीक्षितानि च वल्गुजल्पाश्च भगवतस्तैः संमोहिता धर्षिता वनिताः स्वैरनेकैर्विभ्रमैस्तस्य
मनो विजेतुं हर्तुं न समशकन् ॥ शक्ता बभूवुः विभूम्नः परिपूर्णस्य ॥ ३ ॥ तासां विभ्रमानन्वयेनेति द्वयेन

चार्व्ब्जकोशवदनायतबाहुनेत्रसप्रेमहासरसवीक्षितवल्गुजल्पैः ॥ संमोहिता
भगवतो न मनो विजेतुं स्वैर्विभ्रमैः समशकन्वनिता विभूम्नः ॥ ३ ॥ स्मायावलोकल
वदर्शितभावहारिभ्रूमंडलप्रहितसौरतमंत्रशौंडैः ॥ पत्न्यस्तु षोडशसहस्रमनंगबा
णैर्यस्येंद्रियं विमथितुं करणैर्न शेकुः ॥ ४ ॥ इत्थं रमापतिमवाप्य पतिं स्त्रियस्ता ब्रह्मादयो
पि न विदुः पदवीं यदीयां ॥ भेजुर्मुदाविरतमेधितयानुरागहासावलोकनवसंगमलालसा

ति ॥ स्मायेति ॥ स्मयो मंदहसितं तद्युक्तः ॥ अवलोकलवः कटाक्षस्तेन दर्शितः सूचितो भावोऽभिप्रायः ते घ्नेम ॥ ५ ॥
न हारि मनोहरं च भ्रूलीलं यत्तत् भ्रूमंडलं तेन प्रहिताः प्रस्थापिता ये सौरतमंत्रास्तेषु शौंडैः प्रगल्भैः ॥ अनंगस्य
बाणैः शरैः ॥ अन्यैश्च करणैः कामशास्त्रप्रसिद्धैः ॥ यस्येंद्रियं मनो विमथितुं क्षोभयितुं षोडशसहस्रमपि प
त्न्यो न शेकुरिति ॥ ४ ॥ अनुरागेण हासोऽवलोकश्च नवसंगमे लालसा उत्सुकं च तैराद्यं यस्य विभ्रमक

देवस्य तं भेजुः ॥ अनुरागहासावलोकनवसंगमलालसाद्यं भेजुः ॥ तस्य मनो विजेतुं न शेकुरिति वा ॥ ५ ॥

६५

सैारतसंलापैः सुरतनर्मगोष्टिभिः ॥ ५० ॥ ५१ इति श्री दशमे षष्टितमः ६० एकषष्टितमे शौरेः पुत्रपौ
त्रादिसंततिः ॥ अनिरुद्धविवाहे च रुक्मिणो रामतो वधः ॥ अष्टाधिकशतद्व्यष्टसहस्रस्त्रीसमुद्भवान् ॥ कोटि
शः पुत्रपौत्रादीन् हरिर्दारैरयोजयत् ॥ तदेव वक्तुमाह ॥ एकैकश इति ॥ कृष्णस्यत्रैवलाभार्याः सर्वाः यास्ता

श्रीशुक उवाच ॥ एवं सौरतसंलापैर्भगवान् देवकीसुतः ॥ स्वरतो रमयारेमेनरलोकं विडंब
यन् ५७ अथान्यासामपि विभुर्गृहे षु गृहवानिव ॥ आस्थितो गृहमेधीयान् धर्मान् लोक
गुरुर्हरिः ॥ ५१ इति श्रीमद्भागवते महापुराणे दशमस्कंधे भगवद्रुक्मिणीसंवादे ष
ष्टितमोऽध्यायः ॥ ६० श्री शुक उवाच ॥ एकैकशस्ताः कृष्णस्य पुत्रान् दशदशावलाः ॥ अजि
जनन्न वमानं पितुः सर्वात्मसंपदा ॥ १ गृहादनपगं वीक्ष्य राजपुत्र्योऽच्युतं स्थितं ॥ प्रेष्ठं न्यमं
सतस्वं स्वं न तत्त्वविदुः स्त्रियः २ ॥

त्मनि संपत् ॥ तया पितुः शाकाशादनवमान् १ प्रेष्ठं न्यमंसत ॥ अच्युतस्य प्रियतमं प्रत्येकम
स्वं स्वं मे निरे ॥ न तस्य ~~प्रियतमो~~ तत्त्वमात्मारामत्वं विदं तिताः २ रामरामरामराम राम राम राम ॥

भा० द० उ० माद्र्या लक्ष्मणायाः॥१३॥ क्षुधिश्च दशमः॥ एते मित्रविंदात्मजाः॥१४॥ संग्रामजित्प्रमुखाः सत्यकांता भद्रायाः सुताः शै
५० व्या नामापि सैव॥१५॥ रोहिण्याः सुतानामुक्तिरन्यासामुपलक्षणार्थम्॥१६॥१७॥ एतेषां चेति॥ अन्येषामपि श्रीकृष्ण
पुत्राणां शतसंख्यस्त्रीषु पुत्राः पौत्राश्च कोटिशो बभूवुः॥ तत्र हेतुत्वेन श्रीकृष्णपत्नीनां बाहुल्यमनुस्मारयति

प्रद्योतो गात्रवान्सिंहो बलः प्रबल ऊर्द्धगः॥ माद्र्याः पुत्रा महाशक्तिः सह ओजोऽपराजितः॥१३॥
वृको हर्षोऽनिलो गृध्रो वर्द्धनोन्नाद एव च॥ महांसः पावको वह्निर्मित्रविंदात्मजाः क्षुधिः॥
१४॥ संग्रामजिद्बृहत्सेनः शूरः प्रहरणोऽरिजित्॥ जयः सुभद्रो भद्राया वाम आयुश्च सत्यकः॥१५॥
दीप्तिमांस्ताम्रतप्ताद्या रोहिण्यास्तनया हरेः॥ प्रद्युम्नाच्चानिरुद्धोऽभूद्रुक्मवत्यां महाबलः॥ पु
त्र्यां तु रुक्मिणो राजन्नाम्ना भोजकटे पुरे॥१७॥ एतेषां पुत्रपौत्राश्च बभूवुः कोटिशो नृप॥ मातरः
कृष्णजातीनां सहस्राणि च षोडश॥१८॥ राजोवाच॥ कथं रुक्म्यरिपुत्राय प्रादाद्दुहितरं यु
धि॥ कृष्णेन परिभूतस्तं हंतुं रंध्रं प्रतीक्षते॥ एतदाख्याहि मे विद्वन्द्विषोर्वैवाहिकं मिथः॥१९॥

मातरः कृष्णजातीनामिति॥ चशब्देनाधिकाश्चेत्युक्तम्॥१८॥ यः कृष्णं हंतुं रंध्रं प्रतीक्षते॥ स कथ
म् प्रादादिति॥ वैवाहिकम्॥ विवाहनिमित्तम्॥१९॥ रामरामरामरामरामराम॥ ऽऽ॥ ऽऽ ५०

प्रत्युद्गमासनवरार्हणपादशौचतांबूलविश्रमणवीजनगंधमाल्यैः केशप्रसाधशयनस्नपनोपहार्यैर्दासीशता अपि विभोर्विदधुः स्म दास्यं ॥ ६ ॥ ९०

मू० १ किंतु प्रत्युद्गमादिभिर्विभोस्ताद्दास्यं नित्यं विदधुरिति प्रौढभावेपि नवसंगमाद्यभिधानं ॥ अयं तत्सारत्वेनौत्सुक्ये
नचतथाप्रतीतेः ॥ एतेषामेवश्लोकानां प्रस्तावांतरे पुनःपुनरावृत्तिरनितिसौंदर्यात् ॥ ६ ॥ प्रासंगिकमुक्त्वा प्रस्तुत
माह ॥ दशादशपुत्राया सां मध्ये ॥ अष्टौ महिष्योयाः प्रागुक्तास्तत्पुत्राणां नामानि ॥ ७ ॥ ८ ॥ ९ ॥ १० ॥ श्रीम

तासां या दशपुत्राणां कृत्स्नस्त्रीणां पुरोदिताः ॥ अष्टौ महिष्यस्तत्पुत्रान् प्रद्युम्नादीन् गणयामि ते ॥ ७ ॥
चारुदेष्णः सुदेष्णश्च चारुदेहश्च वीर्यवान् ॥ सुचारुश्चारुगुप्तश्च भद्रचारुस्तथापरः ॥ चारुचंद्रो
विचारुश्च चारुश्च दशमो हरेः ॥ प्रद्युम्नप्रमुखा जाता रुक्मिण्यां नावमाः पितुः ॥ ८ ॥ भानुः सुभानुः ख३
स्वर्भानुः प्रभानुर्भानुमांस्तथा ॥ चंद्रभानुर्बृहद्भानुरतिभानुस्तथाष्टमः ॥ श्रीभानुः प्रतिभानु
श्च सत्यभामात्मजा दश ॥ ९ ॥ सांबः सुमित्रः पुरुजिच्छतजिच्च सहस्रजित् ॥ विजयश्चित्रकेतुश्च
वसुमान्द्रविडः क्रतुः ॥ जांबवत्याः सुता ह्येते सांबाद्याः पितृसंमताः ॥ १० ॥ वीरश्चंद्रोश्वसेनश्च चि
त्रगुर्वेगवान्वृषः ॥ आमः शंकुर्वसुः श्रीमान् कुंतिर्नाग्नजितीसुताः ॥ ११ ॥ श्रुतः कविर्वृषो वी
रः सुबाहुर्भद्र एकलः ॥ शांतिर्दर्शः पूर्णमासः कालिंद्याः सोमकोवरः ॥ १२ ॥

निति वसोः कुंतेर्वा विशेषणं ॥ ११ ॥ भद्रो नाम एकलः एकः सोमकश्चावरः कनीयान् एते कालिंद्याः सु

भा० द० उ० २६॥ अक्षैर्दीव्यत्तत्क्रीडितवान् ॥२७॥२८॥ निष्काणां लक्षं ग्लहं पणं॥ कृतवान् कैतवं कपटं॥२९॥ न्यर्बुदं

५१ तस्मिन्निवृत्तउद्वाहेकालिंगप्रमुखान्नृपाः॥दृप्तास्तेरुक्मिणंप्रोचुर्वलमक्षैर्विनिर्जय
अनक्षज्ञोह्ययंराजन्नपितद्व्यसनंमहत्॥२६॥इत्युक्तोवलमाहूयतेनाक्षैरुक्म्यदीव्य
त॥२७॥शतंसहस्रमयुतंरामस्तत्राददेपणं॥ततस्तुरुक्म्यजयत्तत्रकालिंगःप्राहसद्वलं
दंतान्संदर्शयन्नुच्चैर्नामृष्यत्तद्धलायुधः॥२८॥ततोलक्षंरुक्म्यगृह्णाद्ग्लहंतत्राजयद्वलः
जितवानहमित्याहरुक्मीकैतवमाश्रितः॥२९॥मन्युनाक्षुभितःश्रीमान्समुद्रइवपर्व
णि॥जात्यारुणाक्षोतिरुषान्यर्वुदंग्लहमाददे॥३०॥तंचापिजितवान्रामोधर्मेणछलमा
श्रितः॥रुक्मीजितंमयात्रेमेवदंतुप्राश्निकाइति॥३१॥तदाब्रवीन्नभोवाणीवलेनैवजितो
ग्लहः॥धर्मतोवचनेनैवरुक्मीवदतिवैमृषा॥३२॥तामनादृत्यवैदर्भोदुष्टराजन्यचोदि
तः॥संकर्षणंपरिहसन्वभाषेकालचोदितः॥३३॥

दशकोटिग्लहंमन्युक्षुभितोराम आददे॥३०॥ छलमाश्रितोरुक्मीमयाजितवानित्याह॥३१॥३२॥३३॥ ५१

द्रियं इं १

ननु रुक्मिणोभिप्रायं कथं जानीमः इति चेत् तत्राह अनागतमिति ॥ अतींद्रियागोचरं ॥ विप्रकृष्टं दूरस्थं
व्यवहितं कुड्याद्यंतरितम् ॥२०॥ तत्रोत्तरं ॥ स्वयंवरे एकरथत्या वृतः सन् राज्ञो निर्जित्य जहारेति ॥२१॥ यद्यपि श्री
कृष्णावमानितः तथापि वैरमनुस्मरन्नपि व्यतरत् प्रादात् ॥ अन्यमोदनत इत्यर्थः ॥२२॥ सर्वासामप्येकैका कन्या तत्सर्वं

अनागतमतीतं च वर्त्तमानमतींद्रियं ॥ विप्रकृष्टं व्यवहितं सम्यक् पश्यंति योगिनः ॥२०॥ श्रीशुक उवा
च ॥ ऋतः स्वयंवरे साक्षादनंगोऽंगयुतस्तया ॥ राज्ञः समेतान्निर्जित्य जहारैकरथो युधि ॥२१॥ यद्यप्य
नुस्मरन्वैरं रुक्मी कृष्णावमानितः ॥ व्यतरद्भागिनेयाय सुतां कुर्वन्स्वसुः प्रियं ॥२२॥ रुक्मिण्यास्तन
यां राजन् कृतवर्मसुतो बली ॥ उपयेमे विशालाक्षीं कन्यां चारुमतीं किल ॥२३॥ दौहित्रायानिरु
द्धाय पौत्रीं रुक्म्याददाद्धरेः ॥ रोचनां बद्धवैरोपि स्वसुः प्रियचिकीर्षया ॥ जानन्नधर्मं तद्यौनं स्नेहपा
शानुबंधनः ॥२४॥ तस्मिन्नभ्युदये राजन् रुक्मिणी रामकेशवौ ॥ पुरं भोजकटं जग्मुः सांबप्रद्युम्नकादयः
॥२५॥

विवाहोपलक्षणार्थं ज्येष्ठकन्याविवाहमाह रुक्मिण्या इति ॥२३॥ हरेः पौत्राय अनिरुद्धाय यौनं विवाहः
तद्यौनं अधर्मं जानन्निति ॥ द्विषदन्नं न भोक्तव्यं द्विषंतं नैव भोजयेदित्यादिलोकविरोधात् ॥ अस्वर्ग्यं लोकविद्वि
षं धर्ममप्याचरेत् न त्विति निषेधाच्चेत्यर्थः ॥२४॥ लोकविरुद्धाचरणफलं वक्तुमाह तस्मिन्निति ॥२५॥

पुराधिपं पुरपालकं ॥२॥३॥ कामान्पूरयतीति कामपूरः स चासौ वमरांघ्रिपः कल्पवृक्षस्तं त्वां ॥४॥५॥ हेत्राद्यनिर्भर्तैः

भगवान्सर्वभूतेशः शरण्यो भक्तवत्सलः ॥ वरेणच्छंदयामास स तं वव्रे पुराधिपं ॥२॥ स एकदाह गिरि
शं पार्श्वस्थं वीर्यदुर्मदः ॥ किरीटेनार्कवर्णेन संस्पृशंस्तत्पदांबुजं ॥३॥ नमस्ये त्वां महादे
व लोकानां गुरुमीश्वरं ॥ पुंसामपूर्णकामानां कामपूरामरांघ्रिपं ॥४॥ दोःसहस्रं त्वया दत्तं परं भा
राय मेऽभवत् ॥ त्रिलोक्यां प्रतियोद्धारं न लभे त्वदृते समं ॥५॥ कंडूत्या निभृतैर्दोर्भिर्युयुत्सुर्दि
ग्गजानहं ॥ आद्यायां चूर्णयन्नद्रीन्भीतास्तेऽपि प्रदुद्रुवुः ॥६॥ तच्छ्रुत्वा भगवान्क्रुद्धः केतु
स्ते भज्यते यदा ॥ त्वद्दर्पघ्नं भवेन्मूढ संयुगं मत्समेन ते ॥७॥ इत्युक्तः कुमतिर्हृष्टः स्वगृहं प्रावि
शन्नृप ॥ प्रतीक्षन्गिरिशादेशं स्ववीर्यनशनं कुधीः ॥८॥ तस्योषा नाम दुहिता स्वप्ने प्राद्युम्नि
ना रतिं ॥ कन्यालभत कांतेन प्रागदृष्टश्रुतेन सा ॥९॥ सा तत्र तमपश्यंती क्वासि कांतेति
वादिनी ॥ सखीनां मध्य उत्तस्थौ विह्वला व्रीडिता भृशं ॥१०॥
नेरितैर्दोर्भिरद्रींश्चूर्णयन् ॥ श्रेयांस्त्र
गछं ॥६॥७॥ स्ववीर्यस्य नशनं नाशं केतुभंगं प्रतीक्षणः ॥८॥ श्रीमहेशादिष्टसंग्रामस्य प्रसंगमाह ॥ यस्योषेति

वी१ मा१

३४॥नृम्णासंसंदिमिगतस्सभायां॥३५॥३६॥३७॥३८॥सूर्य्येयानवोढया॥सिद्धाअखिलार्थोअभ्युदयाःशत्रुवधादयो
नैवाक्षकोविदावयंगोपालावनगोचराः॥अक्षैर्दीव्यंतिराजानोबाणैश्चनभवादृशाः॥३४॥रुक्मि
णैवमधिक्षिप्तोराजभिश्चोपहासितः॥क्रुद्धःपरिघमुद्यम्यजघ्नेतंनृम्णसंसदि॥३५॥कलिंगराजंतत
न३ रसागृहीत्वादशमेपदे॥दंतानपातयत्क्रुद्धोयोऽहसद्विवृतैर्द्विजैः॥३६॥अन्येनिर्भिन्नबाहूरुशिर
सोरुधिरोक्षिताः॥राजानोदुद्रुवुर्भीताबलेनपरिघार्दिताः॥३७॥निहतेरुक्मिणिश्यालेनाब्रवी
त्साध्वसाधुवा॥रुक्मिणीबलयोराजन्स्नेहभंगभयाद्धरिः॥३८॥ततोऽनिरुद्धंसहसूर्य्ययावरं
रथंसमारोप्यययुःकुशस्थलीं॥रामादयोभोजकटाद्दशार्हाःसिद्धाऽखिलार्थामधुसूदना
श्रयाः॥३९॥इतिश्रीमद्भागवतेमहापुराणेदशमस्कंधेरुक्मिवधएकषष्टितमोऽध्यायः॥६१॥
श्रीशुकउवाच॥बाणःपुत्रशतज्येष्ठोबलेरासीन्महात्मनः॥सहस्रबाहुर्वाद्येनतांडवेतोष
यन्मृडं॥१॥
येषांते॥३९॥इतिदशमेएकषष्टितमः॥६१॥द्विषष्टितमेप्रोक्तमनिरुद्धस्यरोधनं॥कन्ययारममाणस्यबाणे
नबद्धबाहुना॥अनिरुद्धोऽहंहेसिन्वोण्यादवसंयुगे॥श्रीकृष्णःश्रीहरंजित्वाबा

न १

भा.द.उ. शोणितपुरं नीत्वा ॥१९॥ पुंभिर्दुष्प्रेक्ष्ये मशकैरपीति ॥२०॥ स च परार्ध्यैरमूल्यैर्वासःस्रगादिभिः शुश्रूषणपूर्वकम्
५३ अर्चितः सन् ॥ तयापहृतेन्द्रियः अहर्गणान् दिनसमूहान् न बुबुधे ॥२१॥ आप्रीतां अतिहृष्टां दुरवच्छदैः छा

के१ तत्र सुप्तं सुपर्य्यंके प्राद्युम्निं योगमास्थिता ॥ गृहीत्वा शोणितपुरं सख्यै प्रियमदर्शयत् ॥१९॥ सा च तं
सुंदरवरं विलोक्य मुदितानना ॥ दुष्प्रेक्ष्ये स्वगृहे पुंभी रेमे प्राद्युम्निना समं ॥२०॥ परार्ध्यवासः
स्रग्गंधधूपदीपासनादिभिः ॥ पानभोजनभक्ष्यैश्च वाक्यैः शुश्रूषणार्च्चितः ॥ गूढः कन्यापु
रे शश्वत्प्रवृद्धस्नेहया तया ॥ नाहर्गणान्स बुबुधे ऊषयापहृतेंद्रियः ॥२१॥ तां तथा यदुवीरे
ण भुज्यमानां हतव्रतां ॥ हेतुभिर्लक्षयांचक्रुराप्रीतां दुरवच्छदैः ॥२२॥ भटा आवेद
यांचक्रू राजंस्ते दुहितुर्वयं ॥ विचेष्टितं लक्षयाम कन्यायाः कुलदूषणं ॥२३॥ अनपायि
भिरस्माभिर्गुप्तायाश्च गृहे प्रभो ॥ कन्याया दूषणं पुंभिर्दुष्प्रेक्ष्याया न विद्महे ॥२४॥

दयितुमशक्यैः ॥२२॥ विचेष्टितं विहरणं चरणं ॥२३॥ अनपायिभिः अपायः अपसर्पणं प्रमादो वा
तद्रहितैः ॥ पाठांतरे दुष्टाप्रेष्यासखी यस्याः ॥ पुंभिर्दूषणं कृतो वेति न जानीमह इति ॥२४॥ ॥ ॥ऽऽ॥ ५३

ततः किं वृत्तं तदाह ॥ बाणस्येति ॥ ११ ॥ हस्तग्राहं भर्त्तारं ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ त्वया दृष्ट एषां मध्ये को वा भवेदिति ॥ देवा
बाणस्य मंत्री कुंभांडश्चित्रलेखा च तत्सुता ॥ सख्य पृच्छत्सखीमूषां कौतूहलसमन्विता ॥ ११ ॥ कं त्वं मृ
गयसे सुभ्रु कीदृशस्ते मनोरथः ॥ हस्तग्राहं न तेद्यापि राजपुत्र्युपलक्षये ॥ १२ ॥ ऊषोवाच ॥ दृष्टः क
श्चिन्नरः स्वप्ने श्यामः कमललोचनः ॥ पीतवासा बृहद्बाहुर्योषितां हृदयंगमः ॥ १३ ॥ तमहं मृ
गये कांतं पाययित्वाधरं मधु ॥ क्वापि यातः स्पृहयंतीं क्षिप्त्वा मां वृजिनार्णवे ॥ १४ ॥ चित्रलेखोवा
च ॥ व्यसनं ते पकर्षामि त्रिलोक्यां यदि भाव्यते ॥ तमानेष्ये नरं यस्ते मनोहर्त्ता तमादिश ॥ १५ ॥ इ
त्युक्त्वा देवगंधर्वसिद्धचारणपन्नगान् ॥ दैत्यविद्याधरान्यक्षान्मनुजांश्च तथालिखत् ॥ १६ ॥
मनुजेषु च सा वृष्णीन् शूरमानकदुंदुभिं ॥ व्यलिखद्रामकृष्णौ च प्रद्युम्नं वीक्ष्य लज्जिता ॥ १७
अनिरुद्धं विलिखितं वीक्ष्योषावाङ्मुखी ह्रिया ॥ सोऽसावसाविति प्राह स्मयमाना महीपते
चित्रलेखा तमाज्ञाय पौत्रं कृष्णस्य योगिनी ॥ ययौ विहायसा राजन्द्वारकां कृष्णपालितां ॥ १८ ॥
हीन यथावत् ॥ पटेऽलिखत् ॥ १६ ॥ प्रद्युम्नप्रतिमां वीक्ष्य श्वशुरोयमिति लज्जिता ॥ १७ ॥ १८ ॥ राम राम ॥

भा० द० उ० इति दशमे द्विषष्टितमः ॥ ६२ ॥ त्रिषष्टितमे चाथ बाणयादवसंयुगे स्तुतिर्ज्वरेण रुद्रेण बाणबाहुभिदो हरेः ॥ १ ॥
५४ कर्म च युद्धादिकं ॥ २ ॥ रामकृष्णानुवर्तिन इति तेऽपुरतो निर्गता इत्यर्थः ॥ सर्वतो दिशमित्युत्तरेणान्वयः ॥ ४ ॥ भज्यमा

इति श्रीमद्भागवते महापुराणे दशमस्कंधे द्विषष्टितमोऽध्यायः ॥ ६२ ॥ श्रीशुक उवाच ॥ अ
पश्यतां चानिरुद्धं तद्बन्धूनां च भारत ॥ चत्वारो वार्षिका मासा व्यतीयुरनुशोचतां ॥ १ ॥ नारदा
त्तदुपाकर्ण्य वार्त्तां बद्धस्य कर्म च ॥ प्रययुः शोणितपुरं वृष्णयः कृष्णदेवताः ॥ २ ॥ प्रद्यु
म्नो युयुधानश्च गदः सांबोऽथ सारणः ॥ नंदोपनंदभद्राद्या रामकृष्णानुवर्तिनः ॥ ३ ॥ अक्षौ
हिणीभिर्द्वादशभिः समेताः सर्वतो दिशं ॥ रुरुधुर्बाणनगरं समंतात्सात्वतर्षभाः ॥
४ भज्यमानपुरोद्यानप्राकाराट्टालगोपुरं ॥ प्रेक्ष्य बाणो रुषाविष्टस्तुल्यसैन्योऽभिनि
र्ययौ ॥ ५ ॥ बाणार्थे भगवान्रुद्रः ससुतः प्रमथैर्वृतः ॥ आरुह्य नंदिवृषभं युयुधे रामकृ
ष्णयोः ॥ ६ ॥

नानि पुरोद्यानादीनि इदं हैक्यवद्भावः ॥ अट्टालाः प्राकारादुपरितनानि उन्नतस्थानानि ॥ अभिनिर्ययौ बाणः
॥ ५ ॥ ससुतः स्कंदः तत्सहितैः प्रमथैर्गणैः रामकृष्णाभ्यां युयुधे ॥ ६ ॥ ५४

२५॥कामस्यात्मनोऽह्लाज्ज्ञातं॥अभिरमणयासर्वमंगल्ययात्तस्या अंगसंगेन स्तनकुंकुमंयस्यां स्त्रजितां वाह्लको
मेघोऽर्द्धानं मल्लिकावसंतभवामल्लिका॥तदाश्रिता तस्या अग्रइत्यायेषेसंधिः॥तस्या अग्रेइत्यर्थः॥२६॥आततायि
ततः प्रव्यथितो बाणेन दुहितुः श्रुतद्रूपणः॥चरितं कन्यकागारं प्रविवेशद्वारी घटूहहं॥२५॥का
मात्मजं त्रिभुवनैकसुंदरं शयानं पुष्पशयनांबरमंबुजेक्षणं॥बृहद्भुजं कुंडलकुंतलत्विषा स्मिता
म३ वलोकेन च मंडिताननं॥दीव्यंतं दैहेः प्रियया अभिरमणयातदंगसंगस्तनकुंकुमस्त्रजं॥वाह्लको
द्धानं मधुमल्लिकाश्रितां तस्याग्र आसीनमवेक्ष्य विस्मितः॥२६॥स तं प्रविष्टं वृतमाततायि
भिर्भटैरनेकैरवलोक्य माधवः॥उद्यम्य मौर्वं परिघं व्यवस्थितो यथान्तको दंडधरो जि
घांसया॥२७॥जिघृक्षया तान्परितः प्रसर्पतः शुनो यथा शूकरयूथपोऽहनत्॥ते हन्यमाना भ
वनाद्विनिर्गता निर्भिन्नमूर्धोरुभुजाः प्रदुद्रुवुः॥२८॥तं नागपाशैर्बलिनंदनो बली घ्नंतं स्व
सैन्यं कुपितो बबंध ह॥ऊषा भृशं शोकविषादविह्वला बद्धं निशम्याश्रुकलाक्ष्यरौदिषीत्॥
॥२९॥
भिरुद्यतशस्त्रैः माधवोऽनिरुद्धो मौर्वं मुरुत्तोह विशेषस्तान्निर्मितः॥२७॥२८॥शोकविषादाभ्यां विह्वला॥अश्रुवेशस्रअ

ग्रं कलाविदग्धो ययोस्ते अग्रिमश्रीर्यस्याः सा कामाशत्कम
ते दुःखं स्त्रीसंगेन भवेद् इति व्यापयितुं लोके पीनाहरण
मुच्यते ॥२९॥

भा०द०३ री

१५॥१६॥१७॥१८॥ अनिर्द्दह्यमाणस्तिर्यङ्मुखो बभूवेति॥१९॥ २०॥ ज्वरस्तु तं योद्धुमभ्यधावदिति ना

५५ विशीर्यमाणं स्वबलं दृष्ट्वा बाणोऽतिमर्षितः॥ कृष्णमभ्यद्रवत्संख्ये रथी हित्वैव सात्यकिं॥१५॥

धनूंष्याकृष्य युगपद्बाणः पंचशतानि वै॥ एकैकस्मिन्शरौ द्वौ द्वौ संदधे रणदुर्मदः॥१६॥

तानि चिच्छेद भगवान्धनूंषि युगपद्धरिः॥ सारथिं रथमश्वांश्च हत्वा शंखमपूरयत्॥१७॥

तन्माता कोटरा नाम नग्ना मुक्तशिरोरुहा॥ पुरोऽवतस्थे कृष्णस्य पुत्रप्राणरिरक्षया॥१८॥

ततस्तिर्यङ्मुखो नग्नामनिरीक्षन्गदाग्रजः॥ बाणश्च तावद्विरथश्छिन्नधन्वाविशत्पुरं॥१९॥ विद्राविते भूतगणे ज्वरस्तु त्रिशिरास्त्रिपात्॥ अभ्यधावत दाशार्हं दहन्निव दिशो दश॥२०॥ अथ नारायणो देवस्तं दृष्ट्वा व्यसृजज्ज्वरं॥ माहेश्वरो वैष्णवश्च युयुधाते ज्वरावुभौ॥२१॥ माहेश्वरः समाक्रंदन्वैष्णवेन बलार्दितः॥२२॥ अलब्ध्वाभयमन्यत्र भीतो माहेश्वरो

ज्वरः॥ शरणार्थी हृषीकेशं तुष्टाव प्रयतांजलिः॥२३॥

रायणः शीतज्वरमसृजत्॥२१॥ माहेश्वरः समाक्रंदन्नयुयुधे॥२२॥ २३॥ रामरामरामरामरामरा॥ ५५

[illegible] ९ ॥ १० ॥ प्रत्यस्त्राण्येवाह ॥ ब्रह्मास्त्रस्येति ॥ नैजं नारायणास्त्रं ॥ ११ ॥ १२ ॥ शिखिना मयूरेण वाहनेन ॥ १३ ॥

आसीत्सुतुमुलं युद्धमद्भुतं रोमहर्षणं ॥ कृष्णशंकरयो राजन्प्रद्युम्नगुहयोरपि ॥ ६ ॥ कुंभांडकूपक
र्णाभ्यां बलेन सह संयुगः ॥ सांबस्य बाणपुत्रेण बाणेन सह सात्यकेः ॥ ७ ॥ ब्रह्मादयः सुराधीशा मु
नयः सिद्धचारणाः ॥ गंधर्वाप्सरसो यक्षा विमानैर्द्रष्टुमागमन् ॥ ८ ॥ शंकरानुचराञ्छौरिर्भूत
प्रमथगुह्यकान् ॥ डाकिनीर्यातुधानांश्च वेतालान्सविनायकान् ॥ प्रेतमातृपिशाचांश्च कुष्मांडा
न्ब्रह्मराक्षसान् ॥ द्रावयामास तीक्ष्णाग्रैः शरैः शार्ङ्गधनुश्च्युतैः ॥ ९ ॥ पृथग्विधानि प्रायुंक्त पिना
क्यस्त्राणि शार्ङ्गिणे ॥ प्रत्यस्त्रैः शमयामास शार्ङ्गपाणिरविस्मितः ॥ १० ॥ ब्रह्मास्त्रस्य च ब्रह्मास्त्रं वा
यव्यस्य च पार्वतं ॥ आग्नेयस्य च पार्जन्यं नैजं पाशुपतस्य च ॥ ११ ॥ मोहयित्वा तु गिरिशं जृंभ
णास्त्रेण जृंभितं ॥ बाणस्य पृतनां शौरिर्जघानासिगदेषुभिः ॥ १२ ॥ स्कंदः प्रद्युम्नबाणौ
घैरर्द्यमानः समंततः ॥ असृग्विमुंचन्गात्रेभ्यः शिखिनापाक्रमद्रणात् ॥ १३ ॥ कुंभांडः कू
पकर्णश्च पेततुर्मुसलार्दितौ ॥ दुद्रुवुस्तदनीकानि हतनाथानि सर्वतः ॥ १४ ॥

तयोरनीकानि ॥ हतो नाथो येषां तानि ॥ १४ ॥

भा॰द॰उ॰ ननु देवकीतनयस्य मे कथमेवंभूतत्वं तत्राह ॥ नानाभावैरिति ॥ सर्वोपाधिविनिर्मुक्त एव त्वं यथा लीलया
५६ श्री कृतैर्मत्स्याद्यवतारैर्देवान्बिभर्षि पालयसि ॥ तदर्थं लोकसेतून् एव वर्णाश्रमधर्मान् ॥ तदर्थं तदनुष्ठा
तॄन्साधून् ॥ तदंगत्वेन उन्मार्गान्दैत्यादीन् हंसि संहरसि ॥ एवमेतदपि तव जन्म भूमेर्भारावतारणाय ली
लया वर्तते ॥ न कस्यापि त्वं तनय इत्यर्थः ॥ २६ ॥ अज्ञोऽज्ञानतस्त्वदभिभवे प्रवृत्तं मां तत्त्वं रक्षेत्याशयेनाह ॥ त

नानाभावैर्लीलयोपपन्नैर्देवान्साधून्लोकसेतून्बिभर्षि ॥ हंस्युन्मार्गान्हिंसया वर्तमानान्
जन्मैतत्ते भारहाराय भूमेः ॥ २६ ॥ तप्तोऽहं ते तेजसा दुःसहेन शांतोग्रेणात्युल्बणेन ज्वरेण ॥
तावत्तापो देहिनां तेंऽघ्रिमूलं नो सेवेरन्यावदाशानुबद्धः ॥ २७ ॥ श्रीभगवानुवाच ॥ त्रिशिरस्ते
प्रसन्नोऽहं व्येतु ते मज्ज्वराद्भयं ॥ यो नौ स्मरति संवादं तस्य त्वन्नो भवेद्भयं ॥ २८ ॥

तप्तोऽहमिति ॥ तेजसा त्वत्सृष्टेन ज्वरेण ॥ शांतोग्रेण ॥ शीतोग्रेणेति तज्ज्वरेण परसंतापकस्य युक्त एव ताप इति
चेत्तत्राह ॥ तावदिति सेवायां प्रवृत्तानामनुचित इति भावः ॥ २७ ॥ हे त्रिशिरः व्येतु अपगच्छतु मदाज्ञापालकः
सन् सुखं विचर ॥ कासानवाक्तां तामाह ॥ य इति नौ आवयोः इमं संवादं यः स्मरेत् ॥ तस्य त्वत् त्वत्तः भयं न भवेत्
त्वया भयं नोत्पादनीयमित्यर्थः ॥ २८ ॥ ५६

आत्मानं परमशक्तिमंतं मन्यमानः श्रीकृष्णं संतापयितुं प्रवृत्तः स्वयमेव तत्प्रसन्नं तं परमेश्वरं ज्ञात्वा स्तुवन्नमस्करोति नमामीति ॥ त्वां त्वामनंतशक्तिं नमामि कुतः परेशं ब्रह्मादीनामीशं ॥ तत्र हेतुः सर्वात्मानं सर्वस्यात्मानं चेतयितारं ॥ तत्कुतः केवलं शुद्धं ज्ञप्तिमात्रं चैतन्यघनं तदेवं सर्वचेतयितृत्वेन परमेश्वरत्वमुक्तं ॥ किं

ति ४ च विश्वसृष्ट्यादिहेतुत्वादपीत्याह विश्वोत्पत्तौ ॥ नन्वेवंभूतं ब्रह्म प्रसिद्धं नाहमिति तत्राह तद्ब्रह्म तदेव त्वमित्यर्थः किं तद्ब्रह्मेत्यत्राह ब्रह्मलिंगं ब्रह्मणा वेदेन लिंग्यते द्योत्यत इति तत्कुतः प्रशांतं स

ज्वर उवाच ॥ नमामि त्वानंतशक्तिं परेशं सर्वात्मानं केवलं ज्ञप्तिमात्रं ॥ विश्वोत्पत्तिस्थानसंरो

अः २ धहेतुं यत्तद्ब्रह्म ब्रह्मलिंगं प्रशांतं ॥ २४ कालो दैवं कर्म जीवः स्वभावो द्रव्यं क्षेत्रं प्राण आत्मा विकारः ॥

य १ तत्संघातो बीजरोहप्रवाहस्त्वन्मायैषा तन्निषेधं प्रपद्ये ॥ २५ ॥

विक्रियारहितत्वात् ॥ न साक्षाद्वाच्यमिति भावः ॥ २४ ॥ किंच ॥ यावत्सविशेषं वस्तु तत्र वयं प्रभवामः ॥ त्वयि तु सर्वविशेषातीते न कस्यापि प्रभुत्वं ॥ किंतु त्वमेव सर्वप्रभुरिति ज्ञप्तिमात्रत्वविवृत एव नश्यतीति ॥ काल इति ॥ कालः क्षोभकः कर्मनिमित्तं ॥ तदेव फलाभिमुखमभिव्यक्तं दैवं स्वभावस्तत्संस्कारः जीवस्तद्वान् ॥ द्रव्यं भूतसूक्ष्माणि क्षेत्रं प्रकृतिः ॥ प्राणः सूत्रं आत्मा अहंकारः विकारा एकादशेंद्रियाणि ॥ महाभूतानि चेति षोडशकः ॥ तत्संघातो देहः ॥ एतस्य च वीजरोहवत्प्रवाहः ॥ देहादंकुरः देहाद्बीजरूपं कर्म ॥ ततोंऽकुररूपो देहः ततः पुनरेवमिति प्रवाहः ॥ एषा त्वन्माया ॥ तस्या निषेधः अपोहो यस्मिन् तं तन्निषेधावधिभूतं ॥ प्रपद्ये भजे इति ॥ २५ ॥

भा०द०३·
५७

औषधयो रोमाणि ॥ यच्छब्दानुवृत्तिः स्पष्टनार्थं ॥ अंबुवाहाः केशाः ॥ विरिंचो धिषणा बुद्धिः ॥ प्रजापतिर्विसर्गो मेढ्रं ॥ धर्मो हृदयं ॥ लोकैः कल्प्यत इति लोककल्पः ॥ ३४ ॥ ननु प्रादेशिकशरीरस्य कथं नभोनाभित्वादित्याह ॥ तवेति ॥ हे अकुंठधामन् ॥ अप्रच्युतस्वरूप भवायाभ्युदयाय ॥ न केवलमेतावत् ॥ किंत्वस्मदनुग्रहार्थमपीत्याह ॥ वयं चेति ॥ सर्वे लोकपालास्त्वया पालिताः ॥ संतोपि भवनानि पालयाम इति ॥ ३५ ॥ ननु यदि विभावयितारो यूयं विभाव्यानि भुवनानि संति तर्हि कथ

रोमाणि यस्यौषधयोऽंबुवाहाः केशा विरिंचो धिषणा विसर्गः ॥ प्रजापतिर्हृदयं यस्य धर्मः स वै भवान् पु
रुषो लोककल्पः ॥ ३४ ॥ तवावतारोयमकुंठधामन् धर्मस्य गुप्त्यै जगतो भवाय ॥ वयं च सर्वे भवतानुभावि
ता विभावयामो भुवनानि सप्त ॥ ३५ ॥ त्वमेक आद्यः पुरुषो द्वितीयस्तुर्यः स्वदृग्घेतुरहेतुरीशः ॥ प्रतीयसे
ऽथापि यथा विकारं स्वमायया सर्वगुणप्रसिद्ध्यै ॥ ३६ ॥

मुक्तं त्वं हि ब्रह्मेति ॥ न हि ब्रह्मत्वे मम सजातीयभेदः संभवतीति अत आह ॥ त्वमिति ॥ एकः सजातीयरहितः ॥ कुतः आद्यः ॥ पुरुषाणामवस्थात्रयवतामाद्यः प्रकृतिभेत्तः पुरुषः ॥ कुतः ॥ तुरीयः शुद्ध इत्यर्थः ॥ तदपि कुतः स्वदृक् स्वप्रकाशज्ञानरूपः ॥ शुद्धादेव ह्युपाधियोगाज्जीवा जायंते ॥ यथाग्नेः ॥ क्षुद्रा विस्फुलिंगा व्युच्चरंत्येवमेवास्मादात्मनः सर्व एव आत्मानो व्युच्चरंतीति श्रुतेः अतः सजातीयभेदरहितः ॥ किं च ॥ अद्वितीयः ॥ विजातीयरहितोपि कुतः ॥ हेतुः सर्वस्य तथापि स्वयं हेतुरहितश्चेति ॥ कथं तर्हि प्रतिशरीरं जीवभेदः प्रतीयते अत आह ॥ प्रतीयसे इ

ति सर्वगुणप्रसिद्ध्यै सर्वविषयप्रकाशनाय ॥ ३६ ॥

२९ ३० ३१ ३२ भक्तरक्षार्थं श्रीरुद्रो भगवंतं स्तौति । त्वं हीति । अयमर्थः । त्वां अज्ञात्वा ऽयं युद्धत इति न चित्रं । यत
स्त्वं वाङ्मये ब्रह्मण्यपि गूढं । अविद्याविषयत्वात् । कुतः परं ज्योतिः । ज्योतिषामपि प्रकाशकत्वाद् विषय इत्यर्थः ।
कथं तर्हि प्रतीतिरत आह । यमिति । अमलात्मना स्वतः प्रकाश इत्यर्थः । ३३ आस्तां तावन्निर्गुणस्य तव ज्ञानं । लीलया

इत्युक्त्वाच्युतमानम्य गतो माहेश्वरो ज्वरः । बाणस्तु रथमारूढः प्रागाद्योत्स्यन् जनार्द्दनं । २९ ततो बाहु
सहस्रेण नानायुधधरोऽसुरः । मुमोच परमक्रुद्धो बाणांश्चक्रायुधे नृप । ३० तस्यास्यतोऽस्त्राण्यसकृच्च
क्रेण क्षुरनेमिना । चिच्छेद भगवान्बाहून् शाखा इव वनस्पतेः ३१ बाहुषु छिद्यमानेषु बाण
स्य भगवान्भवः । भक्तानुकंप्युपव्रज्य चक्रायुधमभाषत । ३२ रुद्र उवाच । त्वं हि ब्रह्म परं ज्योतिर्गू
ढं ब्रह्मणि वाङ्मये । यं पश्यंत्यमलात्मान आकाशमिव केवलं । ३३ नाभिर्नभोऽग्निर्मुखमंबुरेतो
द्यौः शीर्षमाशाः श्रुतिरंघ्रिरुर्वी । चंद्रो मनो यस्य दृगर्क आत्मा अहं समुद्रो जठरं भुजेंद्रः ॥

धिष्ठितस्त्वया ऽयं विराड्विग्रहः सोपि न ज्ञायसे । उदुंबरफलांतर्वर्त्तिमशकैरिवोदुंबरफलमित्याशयेन विराट्रूपेण स्तौ
ति द्वाभ्यां । नाभिरिति । यस्य नभआदयो नाभ्याद्यवयवाः स भवान् लोककल्पः पुरुष इत्युत्तरेणान्वयः । नभो यस्य ना
भिः । अग्निर्मुखं । अंबु रेतः । द्यौः शीर्षं । आशा दिशः । श्रुतिः श्रवणेंद्रियं । उर्वी अंघ्रिः । चंद्रो मनः । अर्को दृक् । अहं शिवः आ

भा०१०उ० अहमन्ये च सुहृन्मनसस्त्वामेव भजाम इत्याह ॥ अहमिति ॥४१॥ भगवतो भजनत्वे हेतून्वदंस्तद्भक्तिं प्रार्थयते
५८ तं त्वेति समत्वे हेतुः ॥ प्रशांतमिति सुसेव्यत्वमाह ॥ सुहृदात्मदैवं ॥ सुहृद्बुद्धिप्रवर्तकत्वात् ॥ आत्मा च सर्वात्मकत्वा
त् ॥ एवंभूतं देवमीश्वरं त्वां न चान्यो भजनीयोऽस्तीत्याह ॥ अनन्यमेकं ॥ समानासमानजातीयरहितं ॥ तत्कुतः जग

अहं ब्रह्माथ विबुधा मुनयश्चामलाशयाः ॥ सर्वात्मना प्रपन्नास्त्वामात्मानं प्रेष्ठमीश्वरं ॥४१॥ तं त्वा
जगत्स्थित्युदयान्तहेतुं समं प्रशान्तं सुहृदात्मदैवं ॥ अनन्यमेकं जगदात्मकेतं भवापवर्गाय भ
जाम देव ॥४२॥ अयं ममेष्टो दयितोऽनुवर्ती मयाभयं दत्तममुष्य देव ॥ संपाद्यतां तद्भवतः प्र
सादो यथा हि ते दैत्यपतौ प्रसादः ॥४३॥ श्रीभगवानुवाच ॥ यथात्थ भगवंस्त्वं नः करवाम प्रि
यं तव ॥ भवतो यद्व्यवसितं तन्मे साध्वनुमोदितं ॥४४॥ अवध्योऽपि मयाप्येष वैरोचनिसुतोऽ
सुरः ॥ प्रह्लादाय वरो दत्तो न वध्यो मे तवान्वयः ॥४५॥ दर्पोपशमनायास्य प्रवृक्णा बाहवो मया ॥
सूदितं च मया भूरि यच्च भारायितं भुवः ॥४६॥

तामात्मना च केतमधिष्ठानं ॥४२॥ स्वयं भक्तिमाशास्य स्वभक्तस्याभीष्टमाशास्ते ॥ अयमिति दैत्यपतौ प्र
ह्लादे ॥४३॥४४॥ वैरोचनिर्बलिर्मद्भक्तस्तत्सुतत्वात् ॥ अवध्यस्तावत् ॥ किंच प्रह्लादायेति ॥ अन्वयो वंशः ॥४५॥

स्य २

५८

तर्हि किमहमेव संसारीत्युच्यते ॥ नहि नहीति सदृष्टांतमाह ॥ यथैवेति ॥ हे भूमन् स्वया छायया मेघलक्षणया परदृष्ट्या पिहितः छादितोपि सूर्यः छायां मेघं च रूपाणि च मेघांतरितान् घटादीनपि संचकाशयति ॥ एवं गुणेनाहंकारेण स्वकार्येण जीवावरकेणात्तदृष्ट्यापिहितोपि गुणान् सत्वादीनुपाधीन् ॥ गुणिनश्च उपहितान् जीवानपि त्वं चकास्सि प्रकाशयसि यत आत्मप्रदीपः स्वप्रकाशः ॥ अतः सर्वसाक्षिणस्तव न संसार इत्यर्थः ॥ ३७ ॥ किंच ॥ मायाश्रयस्यान्यान्मोहयतस्तव कुतः

यथैव सूर्यः पिहितः स्वछायया छायां च रूपाणि च संचकास्ति ॥ एवं गुणेनापिहितो गुणांस्त्वमात्मप्रदीपो गुणिनश्च भूमन् ॥ ३७ ॥ यन्मायामोहितधियः पुत्रदारगृहादिषु ॥ उन्मज्जंति निमज्जंति प्रसक्ता वृजिनार्णवे ॥ ३८ ॥ देवदत्तमिमं लब्ध्वा नृलोकमजितेंद्रियः ॥ यो नाद्रियेत त्वत्पादौ स शोच्यो ह्यात्मवंचकः ॥ ३९ ॥ यस्त्वां विसृजते मर्त्य आत्मानं प्रियमीश्वरं ॥ विपर्ययेंद्रियार्थार्थं विषमत्त्यमृतं त्यजन् ॥ ४० ॥

संसृतिरित्याशयेनाह ॥ पुत्रादिषु प्रसक्ता वृजिनार्णवे दुःखसागरे उन्मज्जंति देवादियोनिषु निमज्जंति स्थावरादियोनिषु ॥ तदुक्तं वायवीये ॥ विपर्ययश्च भवति ब्रह्मत्वस्थावरत्वयोरिति ॥ ३८ ॥ एवं जीवेश्वरव्यवस्थां निरूप्येशानीश्वभजंतं निंदति द्वाभ्यां ॥ देवेति ॥ देवेन त्वया धर्माध्यक्षेण दत्तं नृदेहमिमं लब्ध्वापीति ॥ ३९ ॥ शोच्यत्वे हेतुः ॥ यस्त्वामिति ॥ विपर्यया विपरीता अनात्माप्रियानीश्वराये इंद्रियार्थाः पुत्रादयस्तदर्थं ॥ ४० ॥

॥२॥

भा०द०उ० पिपासिता॥ तृषितैः॥ जलं विचिन्वंतः॥ स तं जीवं॥ तं च कृकलासं वीक्ष्य॥३॥ चर्मभिः॥ चर्ममयैः पाशैः॥ तांतवैः॥ तंतुमयैः

पू९ क्रीडित्वा सुचिरं तत्र विचिन्वंतः पिपासिताः॥ जलं निरुदके कूपे ददृशुः सत्वमद्भुतं॥२॥ कृकलासं गिरि

निभं वीक्ष्य विस्मितमानसाः॥ तस्य चोद्धरणे यत्नं चक्रुस्ते कृपयान्विताः॥३॥ चर्मभिस्तांतवैः पाशैर्बद्ध्वा

पतितमर्भकाः॥ नाशक्नुवन्समुद्धर्तुं कृष्णायाचख्युरुत्सुकाः॥४॥ तत्रागत्यारविंदाक्षो भगवान्

विश्वभावनः॥ वीक्ष्योज्जहार वामेन तं करेण स लीलया॥५॥ स उत्तमश्लोककराभिमृष्टो विहा

य सद्यः कृकलासरूपं॥ संतप्तचामीकरचारुवर्णः स्वर्ग्यद्भुतालंकरणांबरस्रक्॥६॥ पप्रच्छ वि

द्वानपि तन्निदानं जनेषु विख्यापयितुं मुकुंदः॥७॥ कस्त्वं महाभाग वरेण्यरूपो देवोत्तमं त्वां

गणयामि नूनं॥ दशामिमां वा कतमेन कर्मणा संप्रापितोऽस्यतदर्हः सुभद्र॥८॥ आत्मानमा

ख्याहि विवित्सतां नो यन्मन्यसे नः क्षममत्र वक्तुं॥९॥ श्रीशुक उवाच॥ इति स्म राजा संपृष्टः कृष्णे

नानंतमूर्तिना॥ माधवं प्रणिपत्याह किरीटेनार्कवर्चसा॥१०॥

पाशैश्च॥४॥५॥ संतप्तं चामीकरं सुवर्णं

तद्वद्वर्णो यस्य सः॥ अद्भुतालंकरणांबरस्रजो यस्य स्वर्गी देवो बभूवेति॥६॥७॥ च॥ यतस्त्वं दित्समयोग्यं ॥०४॥

पू९

त्रनुग्रहात्तिचत्वारइति ॥४७॥ सवध्वाउषयासह ॥४८॥ रुद्रानुमोदितइति ॥ तदभिप्रेतस्यैव वाणभुजभंगस्य कृत
त्वात् ॥४९॥ पौरादिभिरभ्युद्यतः ॥ अभिगतमागत्यसत्कृतः ॥५०॥५१॥ इति दशमेत्रिषष्टितमः ॥६३॥ चतुःषष्टितमेऽ

चत्वारोस्यभुजाः शिष्टाभविष्यत्यजरामरः ॥ पार्षदमुख्योभवतोनकुतश्चिद्भयोसुरः ॥४९॥ इतिलब्ध्वा
भयंकृष्णंप्रणम्यशिरसासुरः ॥ प्राद्युम्निंरथमारोप्यसवध्वासमुपानयत् ॥५०॥ अक्षौहिण्यापरिवृतंसु
वासःसमलंकृतं ॥ सपत्नीकंपुरस्कृत्यययौरुद्रानुमोदितः ॥५१॥ स्वराजधानींसमलंकृतांध्वजैःसतो
रणैरुक्षितमार्गचत्वरां ॥ विवेशशंखानकदुंदुभिस्वनैरभ्युद्यतःपौरसुहृद्द्विजातिभिः ॥५२॥ यएवंकृ
ष्णविजयंशंकरेणचसंयुगं ॥ संस्मरेत्प्रातरुत्थायनतस्यस्यात्पराजयः ॥५३॥ इतिश्रीमद्भागवतेमहा
पुराणेदशमस्कंधेवाणबाहुकृंतनंत्रिषष्टितमोध्यायः ॥६३॥ श्रीशुकउवाच ॥ एकदोपवनंराजन्ज
ग्मुर्यदुकुमारकाः ॥ विहर्तुंसांबप्रद्युम्नचारुभानुगदादयः ॥१॥

सोन्तगंपापादमोचयत् ॥ ब्रह्मस्वहा
रिदोषोक्त्याराज्ञोदृष्टान्शिक्षयन् ॥ विभूतिभोग्यभोगादिमहोन्नद्धमनोरथान् ॥ स्वंचशासयदृनेकसोन्तगो

[illegible] ॥१॥

भा०द०उ० एवं वर्त्तमानस्य मम संकटं ॥ किंचिदापन्नं शृणु इत्याह ॥ कस्यचिदिति द्विजमुख्यस्य प्रतिग्रहानिवृत्तस्य संपृक्ता मि-
६० लिता ॥ अविदुषा अज्ञानता स्वीयमिति अजानता ॥ १७ ॥ १८ प्रतिग्राहिणे को दातेति ॥ स्वामिनो क्रमेणापहर्त्तेति ॥ अभव ।

कस्यचिद्द्विजमुख्यस्य भ्रष्टा गौर्मम गोधने ॥ संपृक्ताविदुषा सा च मया दत्ता द्विजातये ॥ १७ ॥ तां नीयमानां त-
त्स्वामी दृष्ट्वोवाच ममेति तं ॥ ममेति प्रतिग्राह्याह नृगो मे दत्तवानिति ॥ १८ ॥ विप्रौ विवदमानौ मामूचतुः
स्वार्थसाधकौ ॥ भवान्दातापहर्त्तेति तच्छ्रुत्वा मेऽभवद्भ्रमः ॥ १९ ॥ अनुनीतावुभौ विप्रौ धर्मकृच्छ्रगतेन
वै ॥ गवां लक्षं प्रकृष्टानां दास्याम्येषा प्रदीयतां ॥ २० ॥ भवंतावनुगृह्णीतां किंकरस्याविजानतः ॥ समुद्ध-
रतं मां कृच्छ्रात्पतंतं निरयेऽशुचौ ॥ २१ ॥ नाहं प्रतीच्छे वै राजन्नित्युक्त्वा स्वाम्यपाक्रमत् ॥ नान्यद्गवा-
मप्ययुतमिच्छामीत्यपरो ययौ ॥ २२ ॥ एतस्मिन्नंतरे याम्यैर्दूतैर्नीतो यमक्षयं ॥ यमेन पृष्टस्तत्राहं
देवदेव जगत्पते ॥ २३ ॥ पूर्वं त्वमशुभं भुंक्ष उताहो नृपते शुभं ॥ नांतं दानस्य धर्मस्य पश्ये लो-
कस्य भास्वतः ॥ २४ ॥

भ्रमः ॥ अकुलीभव इत्यर्थः ॥ १९ ॥ तदा उभावपि प्रत्येकमनुनीतौ ॥ प्रार्थितौ कथं तदाह ॥ गवामिति सार्द्धेन ॥ २० ॥ २१ ॥ अपरः
प्रतिग्राही दुराग्रहः ॥ यल्लक्षं त्वयोक्तं ॥ अन्यदपि गवामयुतं यदि तदपि मा विहाय नेच्छामीत्युक्त्वा पयावित्यर्थः ॥ २२ ॥ एत-
स्मिन्नंतर इति ॥ इतः पूर्वं पापाभोक्तुमसमर्थैरिति भावः ॥ २३ ॥ उताहो इत्येकं चापदं ॥ अथवा पूर्वं शुभमिति ॥ नांत

वी१ ६०

यदि ते कर्णमस्पृशमिति ॥ असंदेहे संदेहवचनं यदि वेदाः प्रमाणं स्युरितिवत् ॥ कर्णपथं नतं ॥ प्राप्तं स्यामित्य
र्थः ॥ ११ ॥ किंच ॥ किंन्विति ॥ सर्वेषां भूतानामात्मनो बुद्धेः साक्षिणस्ते ऽविदितं किंतु न किंचित् ॥ १२ ॥ १३ ॥ १४ ॥ ऋत

नृग उवाच ॥ नृगो नाम नरेंद्रोहमिक्ष्वाकुतनयः प्रभो ॥ दानिष्वाख्यायमानेषु यदि ते कर्णमस्पृशं ॥ ११ ॥
किं नु ते ऽविदितं नाथ सर्वभूतात्मसाक्षिणः ॥ कालेनाव्याहतदृशो वक्ष्येथापि तवाज्ञया ॥ १२ ॥ यावत्यः
सिकता भूमेर्यावत्यो दिवि तारकाः ॥ यावत्यो वर्षधाराश्च तावतीरददां स्म गाः ॥ १३ ॥ पयस्विनीस्तरुणीः
शीलरूपगुणोपपन्नाः कपिला हेमशृंगीः ॥ न्यायार्जिता रूप्यखुराः सवत्सा दुकूलमालाभरणा ददा
वहं ॥ १४ ॥ स्वलंकृतेभ्यो गुणशीलवद्भ्यः सीदत्कुटुंबेभ्य ऋतव्रतेभ्यः ॥ तपःश्रुतब्रह्मवदान्यसद्भ्यः
प्रादां युवभ्यो द्विजपुंगवेभ्यः ॥ १५ ॥ गोभूहिरण्यायतनाश्वहस्तिनः कन्याः सदासीस्तिलरूप्यश
य्याः ॥ वासांसि रत्नानि परिच्छदान्रथानिष्टं च यज्ञैश्चरितं च पूर्तम् ॥ १६ ॥ ॥

व्रतेभ्यः ॥ अदंभाचारेभ्यः ॥ तपसा श्रुताः ॥ प्रख्याताश्च ते ब्रह्मणि वदान्याः ॥ अत्युदाराः ॥ अध्यायनशीलाः ॥
श्च ॥ ते संतश्च तेभ्यः ॥ १५ ॥ पूर्तं वापीकूपतडागादि चरितं कृतम् ॥ १६ ॥ रामराम रामराम रामराम रामराम

भा०द०उ० प्राप्स्यन्नमस्यति॥ नमइति॥ सर्वभावाय सर्वस्य भावो जन्म येन तस्मै॥ ब्रह्मणे कर्तृत्वेप्यविकाराय॥ कृतः अ
६१ नंतशक्तये॥ अनंता मायाख्या शक्तिर्यस्य तस्मै वासुदेवाय सर्वभूताश्रयायेत्युपादानत्वमुक्तं॥ श्रीकृष्णाय
सदानंदरूपायेति पुरुषार्थत्वमुक्तं॥ कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः॥ तयोरैक्यं परं ब्रह्म

नमस्ते सर्वभावाय ब्रह्मणेनंतशक्तये॥ कृष्णाय वासुदेवाय योगानां पतये नमः॥२९॥ इत्युक्त्वा तं
परिक्रम्य पादौ स्पृष्ट्वा स्वमौलिना॥ अनुज्ञातो विमानाग्र्यमारुहत्पश्यतां नृणां॥३०॥ कृष्णः परिजनं
प्राह भगवान्देवकीसुतः॥ ब्रह्मण्यदेवो धर्मात्मा राजन्याननुशिक्षयन्॥३१॥ दुर्जरं वत ब्रह्मस्वं भुक्त
मग्नेर्मनागपि॥ तेजीयसोपि किमुत राज्ञामीश्वरमानिनां॥३२॥ नाहं हालाहलं मन्ये वि
षं यस्य प्रतिक्रिया॥ ब्रह्मस्वं हि विषं प्रोक्तं नास्य प्रतिविधिर्भुवि॥३३॥

कृष्ण इत्यभिधीयत इति स्मृतेः॥ किंच॥ योगानाम् इष्टपूर्तादिकर्मणां पतये फलदात्रे॥ अयं भावः
एवंभूतं त्वां विहाय गंतुमनिच्छुरपि गमिष्यामि त्वद्दत्तकर्मफलभोगायेति॥२९॥३०॥३१॥ मनागी
षदपि भुक्तं सत् अग्नेः अग्निसदृशस्य तेजीयसः अतितेजस्विनोपि दुर्जरम्॥३२॥३३॥ ६१

म

हे देव यम स्पूर्वं सुभं भुंजे इत्ति मयोक्ते स यमः पतेति प्राह ॥ २५ ॥ २६ ॥ दुर्घटेन श्रीहरुस्य दर्शनेन विस्मितः सन् ॥ आ
त्मनो भाग्यमभिनंदति ॥ सत्वमिति ॥ हे विभो स त्वं मम अत्र पथः सन् कथं साक्षात्प्रत्यक्षोसीत्यर्थः ॥ किमत्राश्चार्यं
तदाह ॥ पर आत्मा अत एव योगेश्वरैरपि श्रुतिदृशा उपनिषच्चक्षुषा ॥ अमले हृदि विभाव्यः ॥ चिंत्यः ॥ अतोऽधोक्षजः ॥ अ

पूर्वं दिवा सुभं भुंजे इति प्राह पतेति सः ॥ तावद्दृष्ट्वात्मनात्मानं हेकल्लाशं पतन्नभो ॥ २५ ॥ ब्रह्मण्यस्य सदान्य
स्य तव दासस्य केशव ॥ स्मृतिर्नाद्यापि विध्वस्ता भवत्संदर्शनार्थिनः ॥ २६ ॥ स त्वं कथं मम विभोऽक्षिपथः
परात्मा योगेश्वरैः श्रुतिदृशामलहृद्विभाव्यः ॥ साक्षादधोक्षज उरुव्यसनांधबुद्धेः स्यान्मेनुदृश्य इह
यस्य भवापवर्गः ॥ २७ ॥ देवदेव जगन्नाथ गोविंद पुरुषोत्तम नारायण हृषीकेश पुण्यश्लोका
च्युताव्यय ॥ अनुजानीहि मां कृष्ण यांतं देवगतिं विभो ॥ यत्र क्वापि सतश्चेतो भूयान्मे त्वत्पदास्पदं ॥ २८ ॥

न्नजमैंद्रियकं ज्ञानं तत्त्वे अधः अर्वागेव यस्मात्सः ॥ यस्येह भवापवर्गो भवेत् तस्य भवाननुदृश्यः स्यात् ॥ उरुव्यस
नेन कुकलासभवदुःखेनांधबुद्धेस्तु मे एतच्चित्रमित्यर्थः ॥ २७ ॥ उद्रिक्तभक्तिर्वेकुधा संबोधयन्ननुज्ञापय
ति ॥ अनुजानीहीति ॥ देवलोके वर्तमानस्यात्मनो मनसा संनिधिं प्रार्थयते ॥ यत्र क्वापीति ॥ त्वत्पदमास्प
दं विषयो यस्य तथा भक्तं भूयादिति ॥ २८ ॥

भा॰ द॰ ग्र॰ ६२ ४० प्रसन्नमेनमामि ॥ ४१ ॥ न केवलमर्थवादविभीषिकेयं ॥ किंतु प्रत्यक्षमित्याह ब्राह्मणार्थ इति ॥ ४२ ॥ ४३
इति दशमे चतुःषष्टितमः ॥ ६४ ॥ पंचषष्टितमे रामश्चक्रे गोकुलमागतः रममाणस्तु गोपीभिः कालिंद्याः क
विप्रं कृतागसमपि नैव द्रुह्यत मामकाः ॥ घ्नंतं बहु शपंतं वा नमस्कुरुत नित्यशः ॥ ४० ॥ यथाहं प्रणमे
विप्राननुकालं समाहितः ॥ तथा नमत यूयं च योन्यथा मे स दंडभाक् ॥ ४१ ॥ ब्राह्मणार्थो ह्यपहृतो ह
र्तारं पातयत्यधः ॥ अजानंतमपि ह्येनं नृगं ब्राह्मणगौरिव ॥ ४२ ॥ एवं विश्राव्य भगवान्मुकुंदो द्वा
रकौकसः ॥ पावनः सर्वलोकानां विवेश निजमंदिरं ॥ ४३ ॥ इति श्रीमद्भागवते महापुराणे द
शमस्कंधे नृगचरित्रे चतुष्षष्टितमोऽध्यायः ॥ ६४ ॥ श्रीबादरायणिरुवाच ॥ बलभद्रः कुरुश्रे
ष्ठ भगवान्रथमास्थितः ॥ सुहृद्दिदृक्षुरुत्कंठः प्रययौ नंदगोकुलं ॥ १ ॥ परिष्वक्तश्चिरोत्कं
ठैर्गोपैर्गोपीभिरेव च ॥ रामोभिवाद्य पितरावाशीर्भिरभिनंदितः ॥ २ ॥ चिरं नः पाहि दाशार्ह
सानुजो जगदीश्वर ॥ इत्यारोप्यांकमालिंग्य नेत्रैः सिषिचतुर्जलैः ॥ ३ ॥

ते
षंणमदो रामस्य चरितं चित्रं कालिंद्याः कर्षणादि यत् ॥ पौंड्रकांतादिकं स्पष्टं पृथगुक्तमतः परं ॥ १ ॥

आशीर्भिरभिवंदितो बभूव ॥ २ ॥ तदाह चिरमिति ॥ ३ ॥

६२

किंच ॥ विषादप्यधिघोरतरमित्याह ॥ हिनस्तीति ॥ संसर्गि ॥ संसर्गेण मारकत्वादग्नितुल्यतास्यात् ॥ तदपि नेत्या
ह ॥ दाह्निरिति ॥ अपि च समूलमिति ॥ वह्निर्मूलान्यवशेषयति ॥ ब्रह्मस्वलक्षणारणिजः पापपावकस्तु कुलं ॥ त

हिनस्ति विषमन्त्रास्वह्निरद्भिः प्रशाम्यति ॥ कुलं समूलं दहति ब्रह्मस्वारणिपावकः ॥ ३४ ॥ ब्रह्म
स्वं दुरनुज्ञातं भुक्तं हन्ति त्रिपुरुषं ॥ प्रसह्य तु बलाद्भुक्तं दश पूर्वान् दशापरान् ॥ ३५ ॥ राजानो राजे
कुल्याश्च नात्मपातं प्रचक्षते ॥ निरयं येऽभिमन्यन्ते ब्रह्मस्वं साधु बालिशाः ॥ ३६ ॥ गृह्णंति याव
तः पांशून् रुदतामश्रुबिंदवः ॥ विप्राणां हृतवृत्तीनां वदान्यानां कुटुंबिनां ॥ राजानो राजकुल्या
श्च तावंतोऽब्दान्निरंकुशाः ॥ कुंभीपाकेषु पच्यंते ब्रह्मदायापहारिणः ॥ ३७ ॥ स्वदत्तां परदत्तां वा
ब्रह्मवृत्तिं हरेत्तु यः ॥ षष्टिं वर्षसहस्राणि विष्ठायां जायते कृमिः ॥ ३८ ॥ न मे ब्रह्मधनं भूयाद्यद्गृ
ध्वाल्पायुषो नराः ॥ पराजिताश्च्युता राज्याद्भवंत्युद्वेजिनोऽहयः ॥ ३९ ॥

हे पि समूलमिति ॥ ३४ ॥ दुरनुज्ञातं त्रिपुरुषं ॥ कुलं स्वपुत्रपौत्रं च प्रसह्य हठात् ॥ बलाद्राजाद्याश्च पततः ॥ ३५ ॥
ये ब्रह्मस्वमभिमन्यन्ते ॥ अतो बालिशा अज्ञाः ॥ आत्मपातं न विचक्षते इति ॥ ३६ ॥ अपि च गृह्णंतीति

भा०द०उ० ६२

तर्हि तद्गमने युष्माभिः प्रतिबंधः किं न कृतः॥ तद्वाक्यविश्वासादिति चेत्तर्हि विश्वासः किमिति कृतस्तत्रा
हुः॥ कथं न्विति॥ वक्तृवदुत्वान्नानाविधानि वाक्यानि॥११॥ तत्रान्या ऊचुः॥ गृह्णंति वा इति॥ चित्रकथस्य चि
त्राकथाकथनकोविदस्य॥ किंच सुंदरं स्मितं यस्मिंस्तेनावलोकनेन उच्छ्वसितः॥ त्तुभितो यः स्मरस्तेनातुराः
कथं न स्त्राह रंस्त्रीभिर्न श्रद्धीयेत भाषितं॥११॥ कथं नु गृह्णंत्यनवस्थितात्मनो वचः कृतघ्नस्य बुधाः
पुरः स्त्रियः॥ गृह्णंति वै चित्रकथस्य सुंदरस्मितावलोकोच्छ्वसितस्मरातुराः॥१२॥ किं नस्तत्कथया
गोप्यः कथाः कथयतापराः॥ यात्यस्माभिर्विना कालो यदि तस्य तथैव नः॥१३॥ इति प्रहसितं शौरेर्जल्पि
तं चारुवीक्षितं॥ गतिं प्रेमपरिष्वंगं स्मरंत्यो रुरुदुः स्त्रियः॥१४॥ संकर्षणस्ताः कृष्णस्य संदेशैर्हृदयंग
मैः॥ सांत्वयामास भगवान्नानानुनयकोविदः॥१५॥ द्वौ मासौ तत्र चावात्सीन्मधुं माधवमेव च॥ रामः
क्षपासु भगवान्गोपीनां रतिमावहन्॥१६॥

१३॥ अपराः ऊचुः॥ किं न इति॥ कालस्तावत्तस्य चास्माकं च यात्येव॥ किंतु तस्य सुखेनास्माकं तु दुःखेनेत्येता
वानेव विशेष इति ध्वनितं॥१३॥१४॥ नानाविधेष्वनुनयेषु कोविदः॥१५॥ मधुश्चैत्रं॥ माधवो वैशाख एव म
गोपीनां रतिमिति॥ श्रीकृष्णक्रीडासमयेऽनुत्पन्नानामतिबालानां चान्यासामित्यभियुक्तः प्रसिद्धः॥१६॥ ६२

येपरूढांश्च विधिवदभिवंद्य पविष्टैरभिवंदितो वभूवेत्यर्थः ॥४॥ अपि च यथावयद इति ॥ ते च सर्वे स्वेषु य

गोपवृद्धांश्च विधिवद्यविष्ठैश्चाभिवंदितः ॥४॥ यथावयो यथासख्यं यथासंबंधमात्मनः ॥ समुपेत्या
थगोपालान् हास्यहस्तग्रहादिभिः ॥ विश्रांतं सुखमासीनं पप्रच्छुः पर्युपागताः ॥ पृष्टाश्चानाम
यं स्वेषु प्रेमगद्गदया गिरा ॥ कृष्णे कमलपत्राक्षे संन्यस्ताखिलराधसः ॥५॥ कच्चिन्नो बांधवा राम
सर्वे कुशलमासते ॥ कच्चित्स्मरथ नो राम यूयं दारसुतान्विताः ॥६॥ दिष्ट्या कंसो हतः पापो दिष्ट्या
मुक्ताः सुहृज्जनाः ॥ निहत्य निर्जित्यारीन् दिष्ट्या दुर्गं समाश्रिताः ॥७॥ गोप्यो हसंत्यः पप्रच्छू
रामसंदर्शनादृताः ॥ कच्चिदास्ते सुखं कृष्णः पुरस्त्रीजनवल्लभः ॥८॥ कच्चित्स्मरति वा बंधून्पि
तरं मातरं च सः ॥ अपि वा स्मरतेऽस्माकमनुसेवां महाभुजः ॥९॥ मातरं पितरं भ्रातॄन्पतीन्पुत्रा
न्स्वसॄरपि ॥ यदर्थे जहिम दाशार्ह दुस्त्यजान्स्वजनान्प्रभो ॥ ता नः सद्यः परित्यज्य गतः संछिन्नसौ
हृदः ॥१०॥

द्वेषु तं रामं ॥ अनामयमारोग्यं पप्रच्छुः ॥ ते च तेन दृष्टा इति कृष्णे कमलपत्राक्षे संन्यस्ताखिलराधसः ॥ त्यक्त

न१

भा०द०उ० एकांशेन शेषाख्येन ॥२४॥ २५॥ विजगाह ॥ अवगाहनं कृतवान् ॥२६॥ उत्तीर्णाय निर्गताय ॥ असितांबरादीनि कां
६४ ति र्ददौ कांतिर्लक्ष्मीः यथा कृष्णे वै सेवे ॥ वरुणप्रहितां चास्मै मालामम्लानपंकजां ॥ समुद्राभेत्तथा बस्त्रेनी

रामराम महाबाहो न जाने तव विक्रमं ॥ यस्यैकांशेन विधृता जगती जगतःपते ॥२४॥ परंभावो भ
गवतो भगवन्मामजानती ॥ मोक्तुमर्हसि विश्वात्मन्प्रपन्नां भक्तवत्सल ॥२५॥ ततो व्यमुंचद्य
मुनां याचितो भगवान्बलः ॥ विजगाह जलं स्त्रीभिः करेणुभिरिवेभराट् ॥२६॥ कामं विहृत्य
ह४ सलिलादुत्तीर्णायासितांबरे ॥ भूषणानि महार्हाणि ददौ कांतिः शुभां स्रजे ॥२७॥ वसित्वा वास
सी नीले मालामामुच्य कांचनीं ॥ रेजे स्वलंकृतो लिप्तो माहेंद्र इव वारणः ॥२८॥ अद्यापि दृश्य
ते राजन्यमुनाकृष्टवर्त्मना ॥ बलस्यानंतवीर्यस्य वीर्यं सूचयती व हि ॥२९॥ एवं सर्वा निशा
याता एकेव रमतो व्रजे ॥ रामस्याक्षिप्तचित्तस्य माधुर्यैर्व्रजयोषिताम् ॥३०॥

लिलक्ष्मीः प्रपंछन्नेति ॥ हरिवंशेच बलं प्रति लक्ष्मीवाक्यं ॥ जातरूपमयं चैकं कुंडलं वज्रभूषणं ॥ आदि
पद्मं च पद्माख्यं दिव्यं श्रवणभूषणं ॥ देवेमां प्रगृह्णीष्व पौराणीं भूषणक्रियामित्यादि ॥२७॥ वसित्वा परि
धाय ॥ आमुच्य कंठे निधाय ॥ चंदनादिभिर्लिप्तः ॥२८॥ २९॥ एकेव सैव निशा यथा तथा माधुर्यैर्वि ६४

पूर्णचंद्रस्य कलाभिर्मरीचिभिरामृष्टे उज्ज्वले। कौमुदीगंधवायुना। कुमुद्वतीनां गंधवाते सेविते। यद्वा। कौ
मुदीशब्देन तद्विकासितानि कुंदानि लक्ष्यंते कुमुदगंधवायुनेत्यर्थः॥१७॥ वारुणी सुधया सह त्वत्रामदिरा

पूर्णचंद्रकलामृष्टे कौमुदीगंधवायुना। यमुनोपवने रेमे सेविते स्त्रीगणैर्वृतः॥१७॥ वरुणः प्रेसिता देवी वा
रुणी वृक्षकोटरात्। पतंती तद्वनं सर्वं स्वगंधेनाध्यवासयत्॥१८॥ तं गंधं मधुधाराया वायुनोपहृतं बलः।
आघ्रायोपगतस्तत्र ललनाभिः पपौ समं॥१९॥ उपगीयमानश्चरितो वनिताभिर्हलायुधः। वनेषु व्य
चरत् क्षीवो मदविह्वललोचनः॥२०॥ स्रग्व्येककुंडलो मत्तो वैजयंत्या च मालया। बिभ्रत्स्मितमुखांभो
जं स्वेदप्रालेयभूषितं। स आजुहाव यमुनां जलक्रीडार्थमीश्वरः॥२१॥ निजं वाक्यमनादृत्य मत्त इत्याप
गां बलः। अनागतां हलाग्रेण कुपितो विचकर्ष ह॥२२॥ पापे त्वं मामवज्ञाय यन्नायासि मयाहुता। नेष्ये
त्वां लांगलाग्रेण शतधा कामचारिणीं। एवं निर्भर्त्सिता भीता यमुना यदुनंदनं। उवाच चकिता वा
चं पतिता पादयोर्नृप॥२३॥

१८॥ १९॥ क्षीवो मत्तः॥२०॥ स्वेद एव प्रालेयं हिमं भूषितं॥२१॥
मत्तोयमिति नागतामापगां नदीं॥२२॥ आहुता आहूता। यद्यस्मान्नागच्छसि। नेष्ये गमयिष्यामि। चकिताकं

पिता ६९

भा० द० उ० मांशरणमेहीत्यस्योत्तरं ॥ मुखमिति ॥ वटाः कंकादिवत्पक्षिविशेषाः ॥ तत्रतदाश्वनांशरणमाश्रयोभवितासि ॥ ९ ॥

६५ मुखंतदपिधायाज्ञकंकगृध्रैर्वटैर्वृतः ॥ शयिष्यसेहतस्तत्रभविताशरणंशुनां ॥ ९ ॥ इतिदूतस्त
दाक्षेपंस्वामिनेसर्वमाहरत ॥ कृष्णोपिरथमास्थायकाशीमुपजगामह ॥ १० ॥ पौंड्रकोऽपितदु
द्योगमुपलभ्यमहारथः ॥ अक्षौहिणीभिस्तिसृभिरपश्यत्पौंड्रकंहरिः ॥ शंखार्यसिगदा
शार्ङ्गः श्रीवत्साद्युपलक्षितम् ॥ बिभ्राणंकौस्तुभमणिंवनमालाविभूषितं ॥ कौशेयवास
सीपीतेवसानंगरुडध्वजं ॥ अमुल्यमौल्याभरणंस्फुरन्मकरकुंडलम् ॥ १३ ॥ दृष्ट्वातमा
त्मनस्तुल्यंवेषंकृत्रिममास्थितं ॥ यथानटंरंगगतंविजहासभृशंहरिः ॥ १४ ॥ शूलैर्ग
दाभिःपरिघैःशक्त्यृष्टिप्रासतोमरैः ॥ असिभिःपट्टिशैर्बाणैःप्राहरन्नरयोहरिम् ॥ १५ ॥

५ मूः अक्षौहिणीभ्यांसंयुक्तोनिश्चक्रामपुराद्द्रुतं ॥ ११ ॥ तस्यकाशीपतिर्मित्रंपार्ष्णिग्राहोन्वयान्नृप ॥ १२ ॥

काशीमिति ॥ पौंड्रकस्यापितदामित्रपुरेवस्थानात् ॥ १० ॥ ११ ॥ पार्ष्णिग्राहः पृष्ठतोरक्षकः ॥ १२ ॥ गरुडः कृत्रिमो
ध्वजेयस्यतं ॥ अमुल्यान्यर्घ्यामौलिराभरणंयस्यतम् ॥ १३ ॥ १४ ॥ १५ ॥ ६५

इतिदशमेपंचषष्टितमः॥६५॥ षट्पुकूषष्टितमेकाशींगत्वाहन्नृपौंड्रकंहरिः॥ तन्मित्रंचततोवृत्तंसु
दक्षिणएवधादिकं॥१॥ प्रस्तोभितः स्तुत्याप्रोत्साहितः॥ वालैरज्ञैः॥ म॥ वोलायावालेक्षेतानृपः॥ वालेनृपत्वेनक्री

इतिश्रीमद्भागवतेमहापुराणेदशमस्कंधेवलदेवविजयेयमुनाकर्षणंपंचषष्टितमोध्यायः॥६५॥
श्रीवादरायणिरुवाच॥ नंदव्रजंगतेरामेकरूषाधिपतिर्नृप॥ वासुदेवोहमित्यज्ञोदूतंकृष्णायप्राहि
णोत्॥१॥ त्वंवासुदेवोभगवानवतीर्णोजगत्पतिः॥ इतिप्रस्तोभितोवालैर्मेनआत्मानमच्युतम्॥२॥ दू
तंचप्राहिणोन्मंदः कृष्णायाव्यक्तवर्त्मने॥ द्वारकायांयथावालोनृपोवालकृतोवुधः॥३॥ दूतस्तुद्वारका
मा ५ मेत्यसभायामास्थितंप्रभुं॥ कृष्णंकमलपत्राक्षंराजसंदेशमव्रवीत्॥४॥ वासुदेवोवतीर्णोएकोहमेकए
वनचापरः॥ भूतानामनुकंपार्थंत्वंतुमिथ्याभिधांत्यज॥५॥ यानित्वमस्मच्चिह्नानिमौढ्याद्विभर्षि
सात्वत॥ त्यक्त्वैहिमांत्वंशरणंनोचेद्देहिममाहवं॥६॥ श्रीशुकउवाच॥ कत्थनंतदुपाकर्ण्यपौंड्रकस्या
ल्पमेधसः॥ उग्रसेनादयःसभ्याउच्चकैर्जहसुस्तदा॥७॥ उवाचदूतंभगवान्परिहासकथामनु॥ उत्स्र
क्ष्येमूढचिह्नानियैस्त्वमेवंविकत्थसे॥८॥
उयांपरिकल्पितः॥३॥४॥५॥६॥७॥ हेमूढउत्स्रक्ष्येत्वयिप्रक्षेप्स्यामियैःसहत्वमेवंकत्थसेतेषपीत्यर्थः॥ यद्वा
यैः॥ कृत्रिमैःसुदर्शनादिभिस्त्वमेवंश्लाघसेतानिउत्स्र॥
क्ष्ये॥ त्याजयिष्यामीत्यर्थः॥८॥

भा०द०उ०२३ ॥ प्रथमं किमिति ॥ पश्चाद्वृत्तमिति ॥ विभाव्यः कस्य चेति संशिशियिरे ॥ संशयं कृतवंत इति ॥ २४ ॥ २५ ॥ संस्था
६६ विधिं उत्तरक्रियां ॥ अपचितिं निष्कृतिं ॥ आत्मनाभिसंधाय बुद्ध्या व्यवस्य ॥ सुदक्षिणं ॥ अत्युदारः ॥ २६ ॥ वरमदा

स नित्यं भगवद्ध्यान प्रध्वस्ताखिलबंधनः ॥ विभ्राणश्च हरे राजन्स्वरूपं तन्मयोऽभवत् ॥ २३ ॥
शिरः पतितमालोक्य राजद्वारि सकुंडलं ॥ किमिदं कस्य वा वक्त्रमिति संशिशियिरे जनाः ॥ २४ ॥ रा
ज्ञः काशिपतेर्ज्ञात्वा महिष्यः पुत्र बांधवाः ॥ पौराश्च हा हता राजन्नाथ नाथेति प्रारुदन् ॥ २५ ॥
सुदक्षिणस्तस्य सुतः कृत्वा संस्थाविधिं पितुः ॥ निहत्य पितृहंतारं यास्याम्यपचितिं पितुः ॥
२६ ॥ इत्यात्मनाभिसंधाय सोपाध्यायो महेश्वरं ॥ सुदक्षिणोऽर्चयामास परमेण समाधिना ॥ २७ ॥ २४ ॥ संपश्यतितलतिलतिक
प्रीतोऽविमुक्तो भगवांस्तस्मै वरमदाद्विभुः ॥ पितृहंतुर्वधोपायं स वव्रे वरमीप्सितं ॥ दक्षि
णाग्निं परिचर ब्राह्मणैः सममृत्विजं ॥ अभिचारविधानेन स चाग्निः प्रमथैर्वृतः ॥ साधयि
ष्यति संकल्पमब्रह्मण्ये प्रयोजितः ॥ इत्यादिष्टस्तथा चक्रे कृष्णायाभिचरन्व्रती ॥ २८ ॥

त्वं वृणीष्वेति उक्तवानित्यर्थः ॥ २७ ॥ ऋत्विजं ऋत्विजमिव स्वयोगकारिणं ॥ यज्ञस्य देवमृत्विजमिति श्रुतेः ॥ अ
ब्रह्मण्ये प्रयोजित इति ॥ श्रीकृष्णे तु प्रयोजितो विपरीतो भविष्यतीति सूचितं ॥ अभिचरन् ॥ अभिचारं कुर्वन् ॥ ६६

गजस्यंदनादिचतुरंगबलमर्द्दितवान् ॥ पृथक्प्रजाः चतुर्विधभूतग्रामं ॥ यथायुगांतानिरिति ॥ १६ ॥ आयोधनम्
रणस्थानं ॥ अरिणाचक्रेणचितं ॥ आकीर्णं ॥ आक्रीडनमिव ॥ कल्पांते रुद्रस्यक्रीडास्थानमिव ॥ १७ ॥ १८ ॥ १९

कृष्णस्तु तत्पौंड्रककाशिराजयोर्बलं गजस्यंदनवाजिपत्तिमत् ॥ गदासिचक्रेषुभिरार्द्दय
द्भृशं यथायुगांते हुतभुक्पृथक्प्रजाः ॥ १६ ॥ आयोधनं तद्रथवाजिकुंजरद्विपत्खरो
ष्ट्रैररिणावखंडितैः ॥ बभौ चितं मोदवहं मनस्विनामाक्रीडनं भूतपतेरिवोल्बणम् ॥ १७
अथाह पौंड्रकं शौरिर्भो भो पौंड्रक यद्भवान् ॥ दूतवाक्येन मामाह तान्यस्त्राण्युत्सृजामि ते ॥ १८
त्याजयिष्येऽभिधानं मे यत्त्वयाज्ञ मृषा धृतं ॥ व्रजामि शरणं तेऽद्य यदि नेच्छामि संयुगं ॥ १९ ॥ इति
क्षिप्त्वा शितैर्बाणैर्विरथीकृत्य पौंड्रकं ॥ शिरोवृश्चद्रथांगेन वज्रेणेंद्रो यथा गिरेः ॥ २० ॥ ततः
काशिपतेः कायाच्छिर उत्कृत्य पत्रिभिः ॥ न्यपातयत्काशिपुर्यां पद्मकोशमिवानिलः ॥ २१
एवं मत्सरिणं हत्वा पौंड्रकं ससखं हरिः ॥ द्वारकामाविशत्सिद्धैर्गीयमानकथामृतः ॥ २२ ॥

गिरेः शृंगं यथेति ॥ २० ॥ २१ ॥ २२ ॥ रामरामरामराम ॥ ॥ २२ ॥ रामरामरामराम ॥ २४ ॥ रामरा

भा०द०उ० अर्द्दितो ऽग्निर्यत्कृतवान् ॥ तदाह कृत्यानलइति ॥ सह ऋत्विग्भिर्जनैश्च वर्तमानं ॥ अभिचर्यते ऽनेनेत्यभिचारः कृ-
६७ त्यानलः ॥ अट्टादिसहितां ॥ अट्टा मंचाः ॥ लीलया व्यधमत् ॥ कृत्यानलं मंचचक्रेण केशवः ॥ रक्षन्पित्वा जनं तस्मात्तु
दक्षिणमथादहत् ॥ ३६ ॥ इति श्रीमेषट्षष्टितमः ॥ ६६ ॥ सप्तषष्टितमे रामो गिरौ रैवतके मदात् ॥ स्वैरं युवतिभिः क्री-

कृत्यानलः प्रतिहतः स रथांगपाणेरस्त्रौजसा नृप विभग्नमुखो निवृत्तः ॥ वाराणसीं प्रतिसमेत्य सुद-
क्षिणं तं सर्त्विग्जनं समदहत्स्वकृतो ऽभिचारः ॥ चक्रं च विष्णोस्तदनुप्रविष्टं वाराणसीं साट्टसभालया-
पणां ॥ सगोपुराट्टालककोष्ठसंकुलां सकोशहस्त्यश्वरथान्नशालिनीं ॥ ३२ ॥ दग्ध्वा वाराणसीं सर्वां
विष्णुचक्रं सुदर्शनं ॥ भूयः पार्श्वमुपातिष्ठत्कृष्णस्याक्लिष्टकर्मणः ॥ ३३ ॥ य एनं श्रावयेन्मर्त्य उत्त-
मश्लोकविक्रमं ॥ समाहितो वा शृणुयात्सर्वपापैः प्रमुच्यते ॥ ३४ ॥ इति श्रीमद्भागवते महापुराणे द-
शमस्कंधे पौंड्रककाशिराजवधः षट्षष्टितमो ऽध्यायः ॥ ६६ ॥ राजोवाच ॥ भूयो ऽहं श्रोतुमिच्छामि रा-
मस्याद्भुतकर्मणः ॥ अनंतस्याप्रमेयस्य यदन्यत्कृतवान् विभुः ॥ १ ॥

इन्नवधी द्विविदं बलः ॥ कालिंदीविदारणानंतरं रामचरितं द्विविदवधादि संगतमप्यनुक्तो तत्सर्वभावित्वेन पौंड्रक-
स्यवधादिनिरूप्येदानीं तदेव प्रस्तौति ॥ भूयो ऽहमित्यादिना रामचरितश्रवणेच्छायामद्भुतकर्मत्वे हेतुः ॥ तत्र चानंतत्वं ६७

तप्तताम्रमिवशिखाश्मश्रूणियस्यसः॥अंगारोद्गारिणीलोचनेयस्यसः॥दंष्ट्राभिरुग्रैर्भ्रुकुटीदंडैश्च॥कठोरंक्रूरमास्यंयस्य
सः॥त्रिशिखंत्रिशूलं॥२९॥दिशःप्रदहन्॥३०॥३१॥त्राहित्राहीत्याद्युक्तिरितिशेषः॥३२॥अहमविताऽस्मिरक्षितास्मीतिशेषः॥३३॥३४॥

२९ ततोग्निरुत्थितःकुंडान्मूर्तिमानतिभीषणः॥तप्तताम्रशिखाश्मश्रुरंगारोद्गारिलोचनः॥दंष्ट्रोग्रभ्रुकुटीदंडक
ठोरास्यस्वजिह्वया॥आलिहन्सृक्किणीनग्नोविधुन्वंस्त्रिशिखंज्वलत्॥२९॥पद्भ्यांतालप्रमाणा
भ्यांकंपयन्नवनीतलं॥सोऽभ्यधावद्वृतोभूतैर्द्वारकांप्रदहन्दिशः॥३०॥तमाभिचारदहन
मायांतंद्वारकौकसः॥विलोक्यतत्रसुःसर्वेवनदाहेयथामृगाः॥३१॥अक्षैःसभायांक्रीडंतंभ
गवंतंभयातुराः॥त्राहित्राहित्रिलोकेशवह्नेःप्रदहतःपुरं॥३२॥श्रुत्वातज्जनवैक्लव्यंदृष्ट्वा
स्वानांचसाध्वसं॥शरण्यःसंप्रहस्याहमाभैष्टेत्यवितास्म्यहं॥३३॥सर्वस्यांतर्बहिःसाक्षीकृत्यांमा
हेश्वरींविभुः॥विज्ञायतद्विघातार्थंपार्श्वस्थंचक्रमादिशत्॥३४॥तत्सूर्यकोटिप्रतिमंसुदर्शनं
जाज्वल्यमानंप्रलयानलप्रभं॥स्वतेजसाखंककुभोथरोदसीचक्रंमुकुंदास्त्रमथाग्निमार्दयत्॥३५॥

रोदसीप्रकाशयदितिशेषः॥यद्वा॥स्वतेजसाखादीन्प्रतिजाज्वल्यमानंअत्यर्थंप्रकाशमानमित्यर्थः॥आर्दयत्

भा० द० उ०
६८

च प्रभिन्नं मत्तं ॥ ९ ॥ १० ॥ जात्या स्वभावेनैव चापल्यं यासां ताः ॥ ११ ॥ हेलयामास अवजज्ञे ॥ निरीक्षितो निरीक्षमाणस्य

एवं देशान्विप्रकुर्वन्दूषयंश्च कुलस्त्रियः ॥ श्रुत्वा सुललितं गीतं गिरिं रैवतकं ययौ ॥ ७ ॥ तत्रापश्यद्यदुपतिं रामं पुष्करमालिनं ॥ सुदर्शनीयसर्वांगं ललनायूथमध्यगं ॥ गायंतं वारुणीं पीत्वा मदविह्वललोचनम् ॥ विभ्राजमानं वपुषा प्रभिन्नमिव वारणं ॥ ९ ॥ दुष्टः शाखामृगः शाखामारूढः कंपयन्द्रुमान् ॥ चक्रे किलकिलाशब्दमात्मानं संप्रदर्शयन् ॥ १० ॥ तस्य धार्ष्ट्यं कपेर्वीक्ष्य तरुण्यो जातिचापलाः ॥ हास्यप्रिया विजहसुर्बलदेवपरिग्रहाः ॥ ११ ॥ ता हेलयामास कपिर्भ्रूक्षेपैः संमुखादिभिः ॥ दर्शयन्स्वगुदं तासां रामस्य च निरीक्षितः ॥ १२ ॥ तं ग्राव्णा प्राहरत्क्रुद्धो बलः प्रहरतां वरः ॥ १३ ॥ स वंचयित्वा ग्रावाणं मदिराकलशं कपिः ॥ गृहीत्वा हेलयामास धूर्तस्तं कोपयन्हसन् ॥ १४ ॥ निर्भिद्य कलशं धृष्टो वासांस्यास्फालयद्बलं ॥ कदर्थीकृत्य बलवान् विप्रचक्रे मदोद्धतः ॥ १५ ॥

तमनादृत्येत्यर्थः ॥ १२ ॥ १३ ॥ १४ ॥ आस्फालयत् योषितां वासांसि आस्फालयत् आकृष्य पाटितवान् ॥ विप्रचक्रे

६८

नरकस्यसखेतिहरिणावैरेकारणं॥सुग्रीवस्यसचिवइतितस्यमंत्रबलं॥मैंद्रस्यभ्रातेतिरामायणेऽतिप्रसिद्धत्वेन
वीर्यस्याधिक्यमुक्तमिति॥२॥सख्युर्नरकस्यअपचितिंआनृण्यं॥राष्ट्रस्यविप्लवोनाशोयथाभवतितथापुरादीनद
हदिति॥३॥किंच॥क्वचिदिति॥कदाचित्सद्विविदः॥मित्रहासखिहंता॥४॥तस्यसमुद्रस्यजलंबाहुभ्यामुत्क्षि

श्रीशुकउवाच॥नरकस्यसखाकश्चिद्द्विविदोनामवानरः॥सुग्रीवसचिवःसोऽथभ्रातामैंदस्यवीर्यवा
न्॥२॥सख्युःसोपचितिंकुर्वन्वानरोराष्ट्रविप्लवं॥पुरग्रामाकरान्घोषानदहद्वह्निमुत्सृजन्॥३॥क्व
चित्सशैलानुत्पाट्यतैर्देशान्समचूर्णयत्॥आनर्त्तान्सुतरामेवयत्रास्तेमित्रहाहरिः॥४॥क्वचित्स
मुद्रमध्यस्थोदोर्भ्यामुत्क्षिप्यतज्जलं॥देशान्नागायुतप्राणोवेलाकूलेन्यमज्जयत्॥५॥आश्रमानृ
षिमुख्यानांकृत्वाभग्नवनस्पतीन्॥अदूषयच्छकृन्मूत्रैरग्नीन्वैतानिकान्खलः॥६॥पुरुषान्योषि
तोदृप्तःक्ष्माभृद्द्रोणीगुहासुसः॥निक्षिप्यचाप्यधाच्छैलैःपेशस्कारीवकीटकं॥७॥

प्य॥वेलायाःकूलेवर्त्तमानान्॥देशान्॥झावयामासेति॥५॥आश्रमेस्थान्वनस्पतीन्भंक्त्वा॥आहवनीया
द्यग्निषु॥मूत्रादिकृतवान्॥६॥अप्यधात्पिदधे॥पेशस्कारीभ्रमरः॥७॥॥

भा० द० ६७ टंकाः सतोयविवराणि तत्सहितः ॥ २५ ॥ २६ ॥ जगतो व्यतिकरं नाशमावहतीति तथा तं ॥ २७ ॥ इति दशमे सप्त
६९ षष्टितमः ॥ ६७ ॥ अष्टषष्टितमे सांबे निबद्धे कौरवैर्युधि ॥ तद्विमोक्षाय रामेण गजाह्वयमकर्षणं ॥ श्रीरामचरि

चकंपे तेन पतता सटंकः सवनस्पतिः ॥ पर्वतः कुरुशार्दूल वायुना नौरिवांभसि ॥ २५ ॥ जयश
ब्दो नमःशब्दः साधु साध्विति चांबरे ॥ सुरसिद्धमुनींद्राणामासीत्कुसुमवर्षिणां ॥ २६ ॥ एवं
निहत्य द्विविदं जगद्व्यतिकरावहं ॥ संस्तूयमानो भगवान् जनैः स्वपुरमाविशत् ॥
॥ २७ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे द्विविदवधः सप्तषष्टितमोऽध्यायः ॥ ६७ ॥ श्री
शुक उवाच ॥ दुर्योधनसुतां राजन् लक्ष्मणां समितिंजयः ॥ स्वयंवरस्थामहरत्सांबो जां यं
बवतीसुतः ॥ १ ॥ कौरवाः कुपिता ऊचुर्दुर्विनीतोयमर्भकः ॥ कदर्थीकृत्य नः कन्यामका
मामहरद्बलात् ॥ २ ॥ बध्नीतेमं दुर्विनीतं किं करिष्यंति वृष्णयः ॥ येऽस्मत्प्रसादोपचितां दत्तां
नो भुंजते महीम् ॥ ३ ॥

त्तं निरूपयितुमेतदाह ॥ दुर्योधनसुतामिति समितिंजयः संग्रामजित् ॥ १ ॥ २ ॥ नोऽस्माकं महीमस्मा ॥
भिर्दत्ताम् ॥ न तेभ्रूमिपः इति भावः ॥ ३ ॥ ॥ ऽऽ ॥ ६९

१६ ॥ शालवृक्षम् ॥ १७ ॥ सुनंदेनमुसलेनाहनत् ॥ अहन्नित्यर्थः तंवानरं ॥ १८ ॥ मस्तिष्कं ॥ मस्तकवयवविशेषः ॥ यै
तंतस्याविनयंदृष्ट्वादेशांश्चतदुपद्रुतान् ॥ क्रुद्धोमुसलमादत्तहलंचारिजिघांसया ॥ १६ ॥ द्विवि
दोपिमहावीर्यःशालमुत्पाद्यपाणिना ॥ अभ्येत्यतरसातेनवलंमूर्द्धन्यताडयत् ॥ १७ ॥ तंतुसं
कर्षणोमूर्द्धिपतंतमचलंयथा ॥ प्रतिजग्राहभगवान्सुनंदेनाहनच्चतं ॥ १८ ॥ मुषलाहत
मस्तिष्कोविरेजेरक्तधारया ॥ गिरिर्यथागैरिकयाप्रहारंनानुचिंतयन् ॥ पुनरन्यंसमुत्क्षिप्यकृ
त्वानिष्पत्रमोजसा ॥ तेनाहनत्सुसंक्रुद्धस्तंवलःशतधाछिनत् ॥ १९ ॥ ततोन्येनरुषाजघ्नेतंचा
पिशतधाछिनत् ॥ २० ॥ एवंयुध्यन्भगवताभिन्नेभिन्नेपुनःपुनः ॥ आकृष्यसर्वतोवृक्षान्निर्वृक्ष
मकरोद्वनं ॥ २१ ॥ ततोमुंचच्छिलावर्षंवलस्योपर्यमर्षितः ॥ तत्सर्वंचूर्णयामासलीलयामु
सलायुधः ॥ २२ ॥ सवाहूतालसंकाशौमुष्टीकृत्यकपीश्वरः ॥ आसाद्यरोहिणीपुत्रंताभ्यांवक्ष
स्यरूरुजत् ॥ २३ ॥ यादवेंद्रोपितंदोर्भ्यांत्यक्त्वामुसललांगले ॥ जत्रावभ्यर्दयत्क्रुद्धःसोपतद्रुधिरं
वमन् ॥ २४ ॥
रिकयालोहितधातुनाननुचिंतयत् ॥ अगणयत् ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ अरूरुजत् ताडयामास ॥ २३ ॥ जत्रौकं

भा०द०उ० स्वस्यदुर्योधनस्यकन्यांनीत्वेतिशेषः॥११॥१२॥यतःकलिंनैछत्अतःसांत्वयित्वाजगामेति॥१३॥धृतराष्ट्रंप्रतिबु

७० तंवक्त्वाविरथीकृत्यकृच्छ्रेणकुरवोयुधि॥कुमारंस्वस्यकन्यांचस्वपुरंजयिनोविशन्॥११॥तच्छ्रु
त्वानारदोक्तेनराजन्संजातमन्यवः॥कुरून्प्रत्युद्यमंचक्रुरुग्रसेनप्रचोदिताः॥१२॥सांत्वयि
त्वातुतान्रामःसन्नद्धान्वृष्णिपुंगवान्॥नैछत्कुरूणांवृष्णीनांकलिंकलिमलापहः॥जगा
महास्तिनपुरंरथेनादित्यवर्चसा॥ब्राह्मणैःकुलवृद्धैश्चवृतश्चंद्रइवग्रहैः॥१३॥गत्वागजा
ह्वयंरामोबाह्योपवनमास्थितः॥उद्धवंप्रेषयामासधृतराष्ट्रंबुभुत्सया॥१४॥सोभिवंद्यां
बिकापुत्रंभीष्मंद्रोणंचबाह्लिकं॥दुर्योधनंचविधिवद्राममागतमब्रवीत्॥१५॥तेतिप्री
तास्तमाकर्ण्यप्राप्तंरामंसुहृत्तमं॥तमर्चयित्वाभिययुःसर्वेमंगलपाणयः॥१६॥तंसंग
म्ययथान्यायंगामर्घ्यंचन्यवेदयन्॥तेषांयेतत्प्रभावज्ञाःप्रणेमुःशिरसाबलं॥१७॥

बुभुत्सयेति॥अभिप्रायजिज्ञासयेत्यर्थः॥१४॥विधिवदभिवंद्य॥१५॥तमुद्धवमर्चयित्वासत्कृत्य॥मंग
लपाणयः॥उपायनहस्ताः॥१६॥तत्प्रभावज्ञा अपिप्रणेमुः॥१७॥ ७०

यांतियास्यंति ॥ प्राणाइंद्रियाणीव ॥ सुसंयत्ताः ॥ प्राणायामादिभिर्दमिताः ॥ ४ ॥ कुरुवृद्धः भीष्मः ॥ तेनानुमोदिताः ॥
तत्संहिताःस्पष्टं एतेइत्यर्थः ॥ ५ ॥ ६ ॥ कर्णोऽग्रणीर्येषां ते ॥ ७ ॥ नामृष्यत् नासहत ॥ अचिंतस्य अभावतोऽर्भकस्येतिवा

निग्रहीतं सुतं श्रुत्वा यदेष्यंतीह स्मयः ॥ भग्नदर्पाः शमं यांति प्राणा इव सुसंयताः ॥ ४ ॥ इति कर्णः
प्रलोभ्यैरीयत्तकेतुः सुयोधनः ॥ सोऽकुमारैरभिरेव वृतः कुरुवृद्धानुमोदिताः ॥ ५ ॥ दृष्ट्वानुधावतः सांबो धा
र्त्तराष्ट्रान्महारथः ॥ प्रगृह्य रुचिरं चापं तस्थौ सिंह इवाचलः ॥ ६ ॥ ते तं जिघृक्षवः क्रुद्धास्तिष्ठति

ति

ष्ठेति भाषिणः ॥ आसाद्य धन्विनो बाणैः कर्णाग्रण्यः समाकिरन् ॥ ७ ॥ सोऽपविद्धः कुरुश्रेष्ठः कुरुभिर्य
दुनंदनः ॥ नामृष्यत्तदचिंत्यार्भः सिंहः क्षुद्रमृगैरिव ॥ ८ ॥ विस्फूर्ज्य रुचिरं चापं सर्वान्विव्याध
सायकैः ॥ कर्णादीन् षड्रथान्वीरस्तावद्भिर्युगपत्पृथक् ॥ चतुर्भिश्चतुरो वाहानेकैकेन च सा
रथीन् ॥ रथिनश्च महेष्वासांस्तस्य तत्तेऽभ्यपूजयन् ॥ ९ ॥ तं तु ते विरथं चक्रुश्चत्वारश्चतुरो हया
न् ॥ एकस्तु सारथिं जघ्ने चिच्छेदान्यः शरासनम् ॥ १० ॥

२ ॥ तत्र पंचयतिं चतुर्भिश्चतुर इत्यत्र वीप्सानुसंधेया ॥ तत्कर्म ते षां मानितवंतः ॥ ९ ॥ १० ॥ राम राम

भा० द० ३० अलमिति॥ अतः परं तान्युपहरिष्याम इत्यर्थः॥२४॥ अवरुंधीत स्वीकुर्य्यात्॥ उग्रसेनेषु॥२६॥ जन्मनावंधुभिः
७१ श्रीपलक्षितया श्रिया उन्नद्धउत्करोम दीर्घषांतैर्दुर्वाच्यं परुषवाक्यं॥ असभ्याः दुर्जनाः॥२७॥२८॥ नानाधना

अलंयदूनांनरदेवलांछनैर्दत्तप्रतीपैः फणिनामिवामृतं॥ येनःप्रसादोपचिता हियादवा
आज्ञापयंत्यद्यगतत्रपाबत॥२५॥ कथमिंद्रोपि कुरुभिर्भीष्मद्रोणार्जुनादिभिः॥ अद
त्तमवरुंधीत सिंहग्रस्तमिवोरणः॥२६॥ श्रीबादरायणिरुवाच॥ जन्मबंधुश्रियोन्नद्धम
दास्तेभरतर्षभ॥ आश्राव्यरामंदुर्वाच्यमसभ्याःपुरमाविशन्॥२७॥ दृष्ट्वाकुरूणांदौःशी
ल्यंश्रुत्वावाच्यानिचाच्युतः॥ अवोचत्कोपसंरब्धोदुष्प्रेक्ष्यःप्रहसन्मुहुः॥२८॥ नूनं
नानामदोन्नद्धाः शांतिंनेच्छंत्यसाधवः॥ तेषांहिप्रशमोदंडःपशूनांलगुडोयथा॥२९॥
अहोयदून्सुसंरब्धान्कृष्णंचकुपितंशनैः॥ सांत्वयित्वाहमेतेषांशममिच्छन्निहागतः॥
३०॥ तइमेमंदमतयःकलहाभिरताःखलाः॥ तंमामवज्ञायमुहुर्दुर्भाषान्मानिनोऽब्रुवन्॥ ३१

भिजनादिमदैरुन्नद्धाः दंड एव प्रशमः प्रकर्षेण शमयतीति तथा॥ पथा लकुटो दंडः॥२९॥३०॥ दुर्भो
षान्श्रवाच्यान्श्रावयन्॥३१॥
७१

२८ ॥ १९ ॥ पद्य्यामित्युग्रसेनस्य वाक्यं ॥ मृष्ये ॥ सेहे अर्थामुमानीय समर्प्पयतइति शेषः ॥ २० ॥ वीर्य्यं प्रभावः शौर्य्य
मुत्साहः बलं सत्वं ॥ तैरुन्नद्धमुच्छ्रंखलम् ॥ कथं आत्मनः शक्तेः समं अनुरूपं ॥ २१ ॥ उपानत् पादरक्षा शिरः आरो

वंधनं कुशलिनः अक्लिष्टं शिवमनामयं ॥ परस्य रमथो रामो वभाषे विक्लवं वचः ॥ १८ ॥ उ
ग्रसेनः क्षितीशोऽयं आज्ञापयति प्रभुः ॥ तद्वचोग्रधियः श्रुत्वा कुरु [illegible] माविलंवितं ॥ १९ ॥ पद्य
पं वहत्वस्त्वेकं जित्वा धर्म्मेण धार्म्मिकं ॥ अवधीता यतन्मृष्ये वंधनामैक्यकाम्यया ॥ २० ॥ वी
र्य्यशौर्य्यबलोन्नद्धमात्मशक्तिसमं वचः ॥ कुरवो बलदेवस्य निशम्योचुः प्रकुपिताः ॥ २१ ॥ अ
हो महच्चित्रमिदं कालगत्या [illegible]दुरत्यया ॥ आरुरुक्षत्युपानद्धि शिरोमुकुटसेवितं ॥ २२ ॥
एते यौनेन संबद्धाः सहशय्यासनाशनाः ॥ वृष्णयस्तुल्यतां नीता अस्मद्दत्तनृपासनाः ॥ २३ ॥
चामरव्यजने शंखमातपत्रं च पांडुरं ॥ किरीटमासनं शय्यां भुंजंत्यस्मदुपेक्षया ॥ २४ ॥

ढुमिच्छति ॥ हीनात्र अस्मानाज्ञापयंतीत्यर्थः ॥ २२ ॥ अस्यैव प्रपंचः ॥ एतइति चतुर्भिः यौनेन पृथ्या विवाहेन ॥ २३ ॥
किंच ॥ चामरव्यजने इति ॥ भुंजंति उपभुंजत इत्यर्थः ॥ अस्मदुपेक्षया ॥ अस्माकमनाग्रहेण ॥ २४ ॥ ॥

भा०द०उ०३च ॥ लांगलाग्रेण दृप्तिरणतः प्राकारमूले निखातेन ॥ उद्विदार्य उत्पाट्य ॥ ३९ ॥ जिजीविषवहेत्यद्र राघि

७२ अद्य निष्कौरवीं पृथ्वीं करिष्यामीत्यमर्षितः ॥ गृहीत्वा हलमुत्तस्थौ दहन्निव जगत्त्रयं ॥ ३८ ॥ लांग

लाग्रेण नगरमुद्विदार्य गजाह्वयं ॥ विचकर्ष स गंगायां प्रहरिष्यन्नमर्षितः ॥ ३९ ॥ जलयानमि

वाघूर्णं गंगायां नगरं पतत् ॥ आकृष्यमाणमालोक्य कौरवाः जातसंभ्रमाः ॥ तमेव शरणं जग्मुः स

कुटुंबा जिजीविषवः ॥ लक्ष्मणं पुरस्कृत्य साम्बं प्रांजलयः प्रभुं ॥ ४० ॥ राम रामाखिलाधार

प्रभावं न विदाम ते ॥ मूढानां नः कुबुद्धीनां क्षंतुमर्हस्यधीश्वर ॥ ४१ ॥ स्थित्युत्पत्त्यप्ययानां त्व

मेको हेतुर्निराश्रयः ॥ लोकान् क्रीडनकानीश क्रीडतस्ते वदंति हि ॥ ४२ ॥ त्वमेव मूर्ध्नीदमनंत

लीलया भूमंडलं बिभर्षि सहस्रमूर्द्धन् ॥ अंते च यः स्वात्मनिरुद्धविश्वः शेषे द्वितीयः परिशिष्य

माणः ॥ ४३ ॥ कोपस्तेऽखिलशिक्षार्थं न द्वेषान्न च मत्सरात् ॥ बिभ्रतो भगवन् सत्त्वं स्थितिपाल

कं सोढवां ॥ ४० ॥ ४१ ॥ शेषे शयनं करोषि पर्य्यंके परिशिष्यमाणो यः स वलभद्रे वेत्ति वा ॥ ४३ ॥ नेतत्परः ॥ ४४ ॥

अस्मासु कोपश्च तवायमनुचित एवेत्याशंक्य ॥ कोपस्तेऽखिलेति स्थितिपालनतत्परः तात्पर्यवान् कोपः ॥ पाठांतरे स्थितिपालन ॥ ४४ ॥

७२

स

दुर्भाषामनुरतिषड्भिः॥ नोग्रसेन इत्यादि विभुः॥ आज्ञापयितुम समर्थः॥ ३२॥ अथ धृष्टाः श्रीकृष्णमाह एवं तु इति
कुपितस्याह॥ सुधर्मेत्यादिभिस्त्रिभिः॥३३॥३४॥ मौल्युत्तमे॥ मौलिषु उत्तमांगेषु॥ उत्तमैर्मौलिभिरितिवा

मु॰१ नोग्रसेनः किल विभुर्भोज इत्यस्य धकेश्वरः॥ शक्रादयो लोकपाला यस्यादेशानुवर्तिनः॥ ३२॥
सुधर्माक्रम्यते येन पारिजातोऽमरांघ्रिपः॥ आनीय भुज्यते सोऽसौ न किलाध्यासनार्हता॥
३३॥ यस्य पादयुगं सा दाक्षिरूपात्तेऽखिलेश्वरी॥ सनाहंति किल श्रीशोनरदेवपरिच्छदा
न॥३४॥ यस्यांघ्रिपंकजरजोऽखिललोकपालैर्मौल्युत्तमैर्धृतमुपासितं तीर्थं॥ ब्रह्माभवो तीर्थ ४
हमपि यस्य कलाः कलाया॥ श्रीश्चाहहेमचिरमस्य नृपासनं क॥३५॥ भुंजंते कुरुभिर्दि
त्तं भूखंडं वत्समयः किल॥ उपानहः किल वयं स्वयं तु कुकुरवः शिरः॥३६॥ अहो ऐश्वर्यम
त्तानां मत्तानामिव मानिनां॥ असंबद्धा गिरो रुक्षाः कः सहेतानुशासिता॥ ३७॥

उपासितानि तीर्थानि यैर्योगिभिस्तेषामपि तीर्थं॥ यद्वा उपासितं सर्वैः सेवितं तीर्थं गंगा यस्याः ती
र्थत्व निमित्तं॥ किंच ब्रह्माभवः श्रीश्च॥ अहमपि इत्यहहेम॥ कथंभूताः वयं यस्य कलाया अंशस्य कला अंशाः
३५॥३६॥ मत्तानामिव मद्यादिना रुक्षाः परुषाः॥ अनुशासिता दंडकः सन्॥३७॥

दिहत्तामेवमभिनयेनाह ॥ चित्रमिति ॥ छ्यष्टसाहस्रस्त्रीः ॥ उद्वावहत्तुपरिणीतवान् ॥ १ ॥ तां द्वारवतीम
नुवर्णयति ॥ मार्ह्वत्रयेण ॥ पुष्पितेति ॥ पुष्पिते ष्पवनेषु आरामेषु द्यानेषु च द्विजानामलीनां च कुलानि
तैर्नादितेषु व्याप्तेषु ॥ २ ॥ महामरकतैः प्रख्यापतैः प्रकाशन्तइति तथा तैः ॥ स्वर्णरजतमयाः परिच्छदापरिकराये
श्री वा द या लि ह्वा च ॥ नरकंनिहतंश्रुत्वा तथोद्धाहं च पोषितां ॥ कस्मिन्नेकेन वह्वीनां तद्धि हस्तः
स्मिनारदः ॥ १ ॥ चित्रं वतैतदेकेन वपुषा युगपत्पृथक् ॥ गृहेषु षोडशसाहस्रस्त्रिय एक उद्वोव
हत्त ॥ इत्युत्सुको द्वारवतीं देवर्षिर्द्रष्टुमागमत ॥ १ ॥ पुष्पितोपवनारामद्विजालिकुलनादि
दितां ॥ उत्फुल्लेन्दीवराम्भोजकह्लारकुमुदोत्पलैः ॥ छुरितेषु सरस्सु चैः कूजितां हंससार
सैः ॥ २ ॥ प्रासादलक्षैर्नवभिर्जुष्टां स्फाटिकराजतैः ॥ महामरकतप्रख्यैः स्वर्णरत्नपरिच्छदैः
३ ॥ विभक्तरथ्यापथचत्वरापणैः शालासभाभीरुचिरां सुरालयैः ॥ संसिक्तमार्गाङ्गणवीथि
देहलीपतत्पताकाध्वजवारितातपाम् ॥ ४ ॥ तस्यामन्तःपुरं श्रीमदर्चितं सर्वधिष्ण्यपैः ॥ ह
रेः स्वकौशलं यत्र त्वष्ट्रा कार्त्स्न्येन दर्शितम् ॥ ५ ॥
पुष्टैः ॥ ३ ॥ पतन्त्यः प्रचलन्त्यः पताका येषु तैः ॥ ध्वजैर्वारितस्त्रातपो यस्यां तां ॥ ४ ॥ तस्यां सर्वैर्धिष्ण्यपैः लोक
पालैरर्चितम् ॥ षोडशभिः सहस्रैः ॥ समलङ्कृतम् ॥ हरेरन्तःपुरविशेषण ॥ तत्रैव च तस्य श्रीहरेः पत्नीनां भवन

विश्वंकर्म्मकृत्यंयस्यसत्त्वमितिसंबोधनं॥४५॥वेपमानमयनंपुरंयेषांतैः॥४६॥तुरंगमाश्वद्वादशायुता
नि॥४७॥सुहृद्भिःकौरवैः॥४८॥मध्येसभायांसभायामध्ये॥४९॥५०॥५१॥इतिदशमेअष्टषष्टितमः॥६८॥एको
नमस्तेसर्वभूतात्मन्सर्वशक्तिधराव्यय॥विश्वकर्म्मन्नमस्तेस्तुत्वांवयंशरणंगताः॥४५॥श्रीशु
कउवाच॥एवंप्रपन्नैःसंविग्नैर्वेपमानायनैर्बलः॥प्रसादितःप्रसन्नोसौमाभैष्टेत्यभयंददौ
॥४६॥दुर्य्योधनःपारिवर्हंकुंजरान्षष्टिहायनान्॥ददौचद्वादशशतान्ययुतानितुरंगमान्॥४७॥र
थानांषट्सहस्राणिरौक्माणांसूर्यवर्चसां॥दासीनांनिष्ककंठीनांसहस्रंदुहितृवत्सलः॥
प्रतिगृह्यतुतत्सर्वंभगवान्सात्वतर्षभः॥ससुतःसस्नुषःप्रायात्सुहृद्भिरभिनंदितः॥४९॥ततः
प्रविष्टःस्वपुरींहलायुधःसमेत्यबंधूननुरक्तचेतसः॥शशंससर्वंयदुपुंगवानांमध्येसभा
यांकुरुषुस्वचेष्टितं॥५०॥अद्यापिचपुरंह्येतत्सूचयद्रामविक्रमं॥समुन्नतंदक्षिणतोगंगा
यामनुदृश्यते॥५१॥इतिश्रीमद्भागवतेमहापुराणेदशमस्कंधेअष्टषष्टितमोध्यायः॥६८॥
नसत्राजितमेगार्हस्थ्यंप्रतिमंदिरम्॥कृष्णस्यनारदोदृष्ट्वाविस्मितोभ्यागात्तंस्तुवन्॥१॥एम

श्रियः रुक्मिण्याः पर्य्यंकतः अवीविशत् उपवेशयामास ॥ १५ ॥ अविभ्रत् अभितो दधार इत्यर्थः विभ्रदिति स
त्रांतं वा तदाहुः संपूज्याभिभाष्य च प्राहेत्युत्तरेणान्वयः ॥ कथंभूतः यस्य चरणशौचं गंगा अशेषतीर्थं सः अ
तएव जगद्गुरुतरोपि सतां पतित्वादेवमकरोदित्यर्थः ॥ सतां पतित्वे हेतुः ब्रह्मण्यदेव इति यद्गुणकृतं नाम तत्तस्यैव ॥

तं संनिरीक्ष्य भगवान्सहसोत्थितः श्रीपर्य्यंकतः सकलधर्मभृतां वरिष्ठः ॥ आनम्य पादयु
गलं शिरसा किरीटजुष्टेन सांजलिरवीविशदासने स्वे ॥ १५ ॥ तस्यावनिज्य चरणौ तदपः स्व
मूर्ध्ना विभ्रज्जगद्गुरुतरोपि सतां पतिर्हि ॥ ब्रह्मण्यदेव इति यद्गुणनाम युक्तं तस्यैव यच्चरण
शौचमशेषतीर्थं ॥ १६ ॥ संपूज्य देवऋषिवर्य्यमृषिः पुराणो नारायणो नरसखो विधिनोदितेन वा
ण्याभिभाष्य मितयामृतमिष्टया तं प्राह प्रभो भगवते करवाम हे किं ॥ १७ ॥ श्रीनारद उवाच ॥ नै
४२ वाद्भुतं त्वयि विभोऽखिललोकनाथे मैत्री जनेषु सकलेषु दमः खलानां ॥ निःश्रेयसाय हि जगत्स्थितिर
क्षणाभ्यां स्वैरावतार उरुगाय विदाम सम्यक् ॥ १८ ॥ यत्तोयुक्तं समंजसं ॥ अतस्तद्धर्मप्रवर्तनाय एवमाचरणमित्यर्थः
दि अभिभाष्य इति एतावदागमनमित्यादि प्रियमुक्त्वा ॥ १७ ॥ भगवता स्वस्याहं यं मन्यमानस्तत्संभावयन्नाह ॥ नैवेति सर्व
मित्रत्वादेवमर्हणं ॥ न तु मम गौरवात् ॥ तर्हि कथं कंसादिषु मैत्री तत्राह ॥ खलानां दमश्च नैवाद्भुतमिति कुतः जग

[illegible]

यत्र स्वकौशलं त्वष्टादर्शितमित्यंतःपुरभवनयोर्विशेषणं ॥ २ ॥ तदनुवर्णयति चतुर्भिः ॥ विष्टब्धमिति ॥ वि
द्रुमस्तंभैर्विष्टब्धं ॥ विधृतं वैडूर्यमयानि ॥ स्तंभाश्रयाणि छादनानि तैः ॥ इंद्रनीलमयैः कुड्यादिभिश्चोपल

तत्र षोडशभिः सद्मसहस्रैः समलंकृतं ॥ विवेशैकतमं शौरेः पत्नीनां भवनं महत् ॥ १ ॥
विष्टब्धं विद्रुमस्तंभैर्वैडूर्यफलकोत्तमैः ॥ इंद्रनीलमयैः कुड्यैर्जगत्या चाहतत्विषा ॥ २ ॥ विता
नैर्निर्मितैस्त्वष्ट्रा मुक्तादामविलंबिभिः ॥ दांतैरासनपर्यंकैर्मण्युत्तमपरिष्कृतैः ॥ दासीभिर्निष्क
कंठीभिः सुवासोभिरलंकृतं ॥ पुंभिः सकंचुकोष्णीषसुवस्त्रमणिकुंडलैः ॥ ३ ॥ रत्नप्रदीपनिकर
द्युतिभिर्निरस्तध्वांतं विचित्रवलभीषु शिखंडिनोंऽग ॥ नृत्यंति यत्र विहितागुरुधूपमक्षैर्नि
र्यांतमीक्ष्य घनबुद्धय उन्नदंतः ॥ ४ ॥ तस्मिन्समानगुणरूपवयःसुवेषदासीसहस्रयुतया
नुसवं गृहिण्या ॥ विप्रो ददर्श चमरव्यजनेन रुक्मदंडेन सात्वतपतिं परिवीजयंत्या ॥ ५ ॥
मितं ॥ जगत्या भूमिकया चेंद्रनीलमय्या हतत्विड्यस्यास्तया ॥ २ ॥ मुक्तादाम्नाविलंबाः ॥ विविधानि लंबमानानि वि
धानि येषु तैः ॥ मण्युत्तमैः परिष्कृतैः भूषितैः ॥ ३ ॥ ईक्ष्य समीक्ष्य घनो मेघोऽयमिति बुद्धिर्येषां ते ॥ ४ ॥ अनुसवं सर्व
काले ॥ आत्मनः समानानि गुणरूपवयांसि सुष्ठु वेषोऽलंकारो यासां तेन ॥ दासीसहस्रेण युतया ॥

भा०द०उ० वित्तानाम्नीनाहवनीयादीनग्नीन्होत्रेण पंचभिर्महायज्ञैर्यजंतं ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ९ ॥ कालेन
७५ तत्रसमयविधिनात्रयापनं प्रापणे विवाहमित्यर्थः ॥ कल्पयंतम् ॥ घटयंतं ॥ विभूतिभिर्विभवैः ॥ प्रस्थापन
मुक्तं तच्चवित्तानाम्नीनूयजंतं पंचभिर्मखैः ॥ भोजयंतं द्विजान् क्वापि भुंजानमवशेषितं ॥ २ ॥ क्वापिसं
ध्यामुपासीनंजपंतंब्रह्मवाग्यतं ॥ एकत्रचासिचर्माभ्यां चरंतमसिदर्म ॥ ३ ॥ ४ ॥ अश्वैर्गजैरथैः क्वा
पिविचरंतंगदाग्रजं ॥ क्वचिच्छयानं पर्यंके स्तूयमानं च वंदिभिः ॥ ५ ॥ मंत्रयंतं च कस्मिंश्चिन्मंत्रि
भिश्चोद्धवादिभिः ॥ जलक्रीडारतं क्वापि वारमुख्यावलावृतं ॥ ६ ॥ कुत्रचिद्द्विजमुख्येभ्यो
ददंतं गाः स्वलंकृताः ॥ इतिहासपुराणानि शृण्वंतं मंगलानि च ॥ ७ ॥ हसंतं हास्यकथया क्वा
चित्प्रियया गृहे ॥ क्वापिधर्मं सेवमानमर्थकामौ च कुत्रचित् ॥ ८ ॥ ध्यायंतमेकमात्मानं पुरु
षं प्रकृतेः परं ॥ शुश्रूषंतं गुरून् क्वापि कामैर्भोगैः सपर्यया ॥ ९ ॥ कुर्वंतं विग्रहं केश्चित्संधिं चान्ये
ष्वकेशवं ॥ कुत्रापिसह रामेण चिंतयंतं सतां शिवं ॥ १० ॥ पुत्राणां दुहितॄणां च काले विध्युप
त्स१ यापनं ॥ दारैर्वरैस्तत्सदृशैः कल्पयंतं विभूतिभिः ॥ ११ ॥
दुहितृजामात्रादीनां ॥ स्वगृहात्तद्गृहं प्रतिनयनं उपानयनं ॥ तद्गृहात्पुनरानयनं तैर्महोत्सवान् ॥ ॥ ७५

ल्दमः साधुसन्मानेन च युक्तमिति भावः ॥८॥ पृष्टोऽस्मि प्रभो किं करवामेति तत्राह ॥ दृष्टमिति भक्तजनताया अपवर्गेत
अ३ पं ॥ किंच अतिविस्त्वभनतया ब्रह्मादिभिर्योगेश्वरैरपि हृदि विचिंत्यं ॥ किंच संसारकूपे पतितानां उत्तारणाय
वलंबं ध्यायन्नेव तवांघ्रियुगलं मया दृष्टं ॥ अतः कृतकृत्योस्मि ॥ तथापि तस्य स्मृतिर्यथा स्यात्तथानुगृहाण त

दृष्टं तवांघ्रियुगलं जनतापवर्गं ब्रह्मादिभिर्हृदि विचिंत्यमगाधबोधैः ॥ संसारकूपपतितोत्तर
णावलंबं ध्यायंश्चराम्यनुगृहाण यथा स्मृतिः स्यात् ॥९॥ श्रीशुक उवाच ॥ ततोऽन्यदाविशद्गे
हं कृष्णपत्न्याः स नारदः ॥ योगेश्वरेश्वरस्यांग योगमाया विवित्सया ॥१०॥ दीव्यंतमक्षैस्तत्रापि प्रि
यया चोद्धवेन च ॥ पूजितः परया भक्त्या प्रत्युत्थानासनादिभिः ॥११॥ पृष्टश्चाविदुषेवासौ क
दायातो भवानिति ॥ क्रियते किं नु पूर्णानामपूर्णैरस्मदादिभिः ॥ अथापि ब्रूहि नो ब्रह्मन्
जन्मैतत्सफलं कुरु ॥१२॥ स तु विस्मित उत्थाय तूष्णीमन्यदगाद्गृहं ॥ तत्राप्यचष्ट गोविंदं लालयंतं
सुतान् शिशून् ॥१३॥ ततोऽन्यस्मिन्गृहेऽपश्यन्मज्जनाय कृतोद्यमः ॥१४॥

नत्स्तदनुध्यायन्नेव नित्यं चरामीति ॥९॥१०॥ अचौ दीव्यंतमित्यादौ दृष्टेति ज्ञातव्यं ॥११॥१२॥१३॥१४॥

लदमः साधुसन्मानेचयुक्तमितिभावः ॥ ८ ॥ पुरोक्तेप्रभोकिंकरवामेतितत्राह ॥ दृष्टमितिभक्तोजनतायाअपवर्गोत्त
अ ३ पं ॥ किंचअतिवृत्तभक्तयाब्रह्मादिभिर्योगेश्वरैरपिहृदिविचिंत्यं ॥ किंचसंसारकूपेपतितानां ॥ उद्धारणायअ
वलंबमायनेवतवांघ्रियुगलंमयादृष्टं ॥ अतःकृतकृत्योस्मि ॥ तथापितस्यस्मृतिर्यथास्यात्तथानुग्रहाणएत

दृष्टंतवांघ्रियुगलंजनतापवर्गंब्रह्मादिभिर्हृदिविचिंत्यमगाधबोधैः ॥ संसारकूपपतितोत्तर
णावलंबंध्यायंश्चराम्यनुगृहाणयथास्मृतिःस्यात् ॥ ९ ॥ श्रीशुकउवाच ॥ ततोऽन्यदाविशद्गे
हंकृष्णपत्न्याःसनारदः ॥ योगेश्वरेश्वरस्यांगयोगमायाविवित्सया ॥ १० ॥ दीव्यंतमक्षैस्तत्रापिप्रि
यायाचोद्धवेनच ॥ पूजितःपरयाभक्त्याप्रत्युत्थानासनादिभिः ॥ ११ ॥ पृष्टश्चाविदुषेवासौके
दायातोभवानिति ॥ क्रियतेकिंनुपूर्णानामपूर्णैरस्मदादिभिः ॥ अथापिब्रूहिनोब्रह्मन्
जन्मैतत्सफलंकुरु ॥ १२ ॥ सतुविस्मितउत्थायतूष्णीमन्यदगाद्गृहं ॥ तत्राप्यचष्टगोविंदंलालयं
तंसुतान्शिशून् ॥ १३ ॥ ततोऽन्यस्मिन्गृहेपश्यन्मज्जनायकृतोद्यमः ॥ १ ॥

तत्तदनुध्यायन्नेवनित्यंचरामीति ॥ ९ ॥ १० ॥ अक्षैर्दीव्यंतमित्यादौददर्शेतिज्ञातव्यं ॥ ११ ॥ १२ ॥ १३ ॥ १ ॥

तत्तस्माल्लोकं शिक्षयन्निमं धर्म्ममास्थितः न तु तत्त्वतः ॥ अतो हे पुत्र मा खिद मा मोहं प्राप्नुहीति ॥ १८ ॥ इति एवमनुगृही
तमेव संतं ददर्शेति ॥ १९ ॥ मुहुर्मुहुर्हृष्टो जातकौतुको मुनिर्विस्मितोऽभूदिति ॥ २० ॥ अथेतः अध्यायुक्तमाम्नाय

श्रीभगवानुवाच ॥ ब्रह्मन्धर्मस्य वक्ताहं कर्त्ता तदनुमोदिता ॥ तच्छिक्षयन्लोकमिममास्थितः पुत्र
मा खिद ॥ १८ ॥ श्रीशुक उवाच ॥ इत्याचरंतं सद्धर्मान्पावनान्गृहमेधिनां ॥ तमेव सर्वगेहेषु संत
मेकं ददर्श ह ॥ १९ ॥ कृष्णस्यानंतवीर्यस्य योगमायामहोदयं ॥ मुहुर्दृष्ट्वा ऋषिरभूद्विस्मितो जात
कौतुकः ॥ २० ॥ इत्यर्थकामधर्मेषु कृष्णेन श्रद्धितात्मना ॥ सम्यक्सभाजितः प्रीतस्तमेवानुस्मरन्
ययौ ॥ २१ ॥ एवं मनुष्यपदवीमनुवर्त्तमानो नारायणोऽखिलभवाय गृहीतशक्तिः ॥ रेमेंग षो
डशसहस्रवरांगनानां सव्रीडसौहृदनिरीक्षणहासजुष्टः ॥ २२ ॥ यानीह विश्वविलयोद्भववृत्तिहेतुः
कर्माण्यनन्यविषयाणि हरिश्चकार ॥ यस्त्वंग गायति शृणोत्यनुमोदते वा भक्तिर्भवेद्भगवति ह्यप
वर्गमार्गे ॥ २३ ॥

यस्तेन ॥ २१ ॥ नारदहृष्टां श्रीकृष्णलीलां निगमयति एवमिति ॥ अखिलस्य भवाय उद्भवाय गृहीता शक्तयो नाना
मूर्त्तयो येन सः सव्रीडं च तत्सौहृदं च तेन निरीक्षणं च हासस्मृतीभ्यां जुष्टः ॥ २२ ॥ अनन्यविषयाणि असाधारणा

स

कल्पयंतं ॥ योगेश्वरस्य येषाम् अपत्यानां महोत्सवान् वीक्ष्य लोकाः सर्वे विसिस्मिरे विस्मयं चक्रुः ॥ तथाभूतान् क-
ल्पयंतं ॥ १० ॥ ११ ॥ १२ ॥ अव्यक्तलिंगं वेषांतरेण छन्नं ॥ १४ ॥ १५ ॥ हे योगेश्वरात्मन् ॥ आत्मनि मम मनसि ॥ तव स्वरूपे

प्रस्थापनोपानयनैर् अपत्यानां महोत्सवान् ॥ वीक्ष्य योगेश्वरेशस्य येषां लोका विसिस्मिरे ॥ १० ॥ यजं-
तं सकलान् देवान् क्वापि क्रतुभिर् ऊर्जितैः ॥ पूर्तयंतं क्वचिद् धर्मं कूपारामालयादिभिः ॥ ११ ॥
चरंतं मृगयां क्वापि हयम् आरुह्य सैन्धवं ॥ घ्नंतं ततः पशून् मेध्यान् परीतं यदुपुंगवैः ॥ १२ ॥ अ-
व्यक्तलिंगं प्रकृतिष्व् अंतःपुरगृहादिषु ॥ क्वचिच् चरंतं योगेशं तत्तद्भावबुभुत्सया ॥ १४ ॥ अ-
थोवाच हृषीकेशं नारदः प्रहसन्न् इव ॥ योगमायोदयं वीक्ष्य मानुषीम् ईयुषो गतिं ॥ १५ ॥ विदाम यो-
गमायास् ते दुर्दर्शा अपि योगिनां ॥ योगेश्वरात्मन् निर्भाता भवत्पादनिषेवया ॥ १६ ॥ अनुजानी-
हि मां देव लोकांस् ते यशसाप्लुतान् ॥ पर्यटामि तवोद्गायन् लीला भुवनपावनीः ॥ १७ ॥

भातिनिर्भाताः ॥ प्रतीताः ॥ तव योगमायाः केवलं विदाम ॥ विद्मः ॥ न तु तत्त्वत्यारमार्थ्यमिति भावः ॥ १६ ॥ त्वन्मा-
नुष्यनाट्येन मुह्यामि ॥ अतो मां प्रस्थापयेत्याह ॥ अनुजानीहीति ॥ १७ ॥ रामराम रामराम ॥ ॥ ऽऽ ऽऽ ॥ ॥

ईति² ³¹

नै०द०उ० कल्मषमविधायस्नातं॥ उपलब्धतम मां॥ प्रस्येति॥ विश्वस्यस्वशक्तिभिः लब्धैः लेपैः लिप्तः॥ भावस्थासौनिवृत्ति
७७ स्थभावः सत्तानिरानंदः॥ तथाहि गुणत्रयोभावात्पूर्वं सत्तामात्रयः॥ सदेव सोम्येदमग्र आसीदिति श्रुतेः॥ एष वानंदस्य
विज्ञानमानंदमित्यादिश्रुतेः॥ तं सदानंदमित्यर्थः॥ ७॥ अहितनः॥ संध्यायाउपगमउपासनादि यया भवतीति

एकं स्वरूपं ज्योतिरनन्यमव्ययं स्वसंस्थयानित्यनिरस्तकल्मषं॥ ब्रह्माख्यमस्योद्भवनाशहेतुभिः
स्वशक्तिभिर्लेपितभावनिर्वृति॥ ७॥ अथाप्लुतोऽम्भस्यमले यथाविधि क्रियाकलापं परिधाय
वाससी॥ चकार संध्योपगमादि सत्तमोऽहुतानलो ब्रह्मजजाप वाग्यतः॥ ८॥ उपस्थायार्कमुद्द्य
न्तं तर्पयित्वात्मनः कलाः॥ देवानृषीन्पितॄन्वृद्धान्विप्रानभ्यर्च्य चात्मवान्॥ धेनूनां रुक्मशृंगी
णां साध्वीनां मौक्तिकस्रजां॥ पयस्विनीनां गृष्टीनां सवत्सानां सुवाससाम्॥ ॥

यां क्रियाकलापं चकार॥ कंचिलादुदयात्पूर्वमेव कृतानलः॥ ब्रह्मगायत्रीं जजाप॥ ९॥ कलाः अंशान्॥ देवान् ऋषीनपि
तर्पयित्वा॥ गृष्टीनां प्रथमप्रसूतानां वृद्धमिति॥ हि॥ ऐपिनपरिवृतान् कुस्मान्प्रभुकरतो मगान्॥ नम्रा
रे भरतो ददाच्छतं वद्धानि सप्त चेति श्रुत्युक्तानि सप्तसप्ताने शतं वद्धान्येकीकृत्य॥ पुराणेच तद्दृश्यते॥ ॥

७७

इति दशमे एकोनसप्ततितमः ॥ [illegible] ॥ [illegible] सप्ततिमे कृष्णस्याह्निककर्मणि ॥ दूतनारदयोः कार्य्येकार्य्यमंत्रविचारणं
जगन्मंगलचारित्रमाह्निकं [illegible] ॥ नारदेन क्वचित्किंचिद्दृष्टमाद ॥ यथाक्रममित्यर्थः कामधर्मेषु कृष्णेन स्वे [illegible]
च्छितात्मनेति प्रस्तुतस्य श्रीकृष्णस्याधिकारे ॥ अथ शब्दः ॥ उपवृत्तायामासन्नायां ॥ पतिभिः श्रीकृष्णमूर्त्तौ माधव्यो माधवस्य भा

इति श्रीमद्भागवते महापुराणे दशमस्कंधे नारदस्य भगवद्योगमायादर्शने एकोनसप्ततितमोऽ
ध्यायः ॥ हरिः ॥ श्रीबादरायणिरुवाच ॥ अथोषस्युपवृत्तायां कुक्कुटान्कूजतोऽशपन् ॥ गृहीतकंठ्यः
पतिभिर्माधव्यो विरहातुराः ॥१॥ वयांस्यरोरुवन्कृष्णं बोधयंतीव वंदिनः ॥ गायत्स्वलिष्वनिद्रा
णि मंदारवनवायुभिः ॥२॥ मुहूर्त्तं तं तु वैदर्भी नामृष्यदपि शोभनम् ॥ परिरंभणविश्लेषात्प्रियबाह्वं
तरं गताः ॥३॥ ब्राह्मे मुहूर्त्त उत्थाय वार्युपस्पृश्य माधवः ॥ दध्यौ प्रसन्नकरण आत्मानं तम
सः परम् ॥४॥

योः ॥१॥ वंदिन इव श्रीकृष्णं बोधयंति संति वयांसि पक्षिणोऽरोरुवन् ॥ श्रीत्रिश्येनाकूजन् ॥ मंदारवनवायुभिः २
गायत्स्वलिष्वनिद्राणि वयांसि वैदर्भी तु पलक्षणं ॥ परिरंभणविश्लेषात् तं पर्य्यलोच्य [illegible] ॥३॥ एकमखं
डं तत्र हेतुः ॥ अनन्यं ॥ निरुपाधिं ॥ अतएव स्वव्ययं ॥ नित्यं स्वयंज्योतिः ॥ ज्योतिष्ट्वे हेतुः ॥ नित्यं निरस्तम् ॥

भा॰ द॰ उ॰ पाणी कृत्तेऽञ्जलौ गृहीत्वा ॥ १२ सव्रीडप्रेमवीक्षितैरीक्षितः ॥ दाराणं स्थितस्ताभिरेव वीक्षितैः ॥ कृच्छ्राद्विसृष्टो
७८ निरगादिति ॥ १३ ॥ सएवं सर्वगृहेभ्यः पृथक् निर्गत्यानंतरमेकरूपवसन् ॥ सुधर्मां प्राविशत् ॥ यन्निविष्टा

गृहीत्वा पाणिना पाणी सारथेस्तमथारुहत् ॥ सात्यक्युद्धवसंयुक्तः पूर्वाद्रिमिव भास्करः ॥ १२ ॥
ईक्षितोऽन्तःपुरस्त्रीणां सव्रीडप्रेमवीक्षितैः ॥ कृच्छ्राद्विसृष्टो निरगाज्जातहासो हरन्मनः ॥ १३ ॥
सुधर्माख्यां सभां सर्वैर्वृष्णिभिः परिवारितः ॥ प्राविशद्यन्निविष्टानां न संत्यंग षडूर्मयः ॥ १४ ॥ तत्रो
पविष्टः परमासने विभुर्बभौ स्वभासा ककुभोऽवभासयन् ॥ वृतो नृसिंहैर्यदुभिर्यदूत्तमो यथोडुरा
जो दिवि तारकागणैः ॥ १५ ॥ तत्रोपमंत्रिणो राजन्नानाहासरसैर्विभुम् ॥ उपतस्थुर्नटाचार्या न
र्तक्यस्तांडवैः पृथक् ॥ १६ ॥ मृदंगवीणामुरजवेणुतालदरस्वनैः ॥ ननृतुर्जगुस्तुष्टुवुश्च सूतमाग
धवंदिनः ॥ १७ ॥ तत्राहुर्ब्राह्मणाः केचिदासीना ब्रह्मवादिनः ॥ पूर्वेषां पुण्ययशसां राज्ञां चाकथयन्

न्नायत्र प्रविष्टानां ॥ १४ ॥ नृसिंहैः ॥ नरश्रेष्ठैः ॥ १५ ॥ उपमंत्रिणः परिहासकाः पृथक् स्वसमुदाये ॥ १६ ॥ कथाः ॥ १८ ॥
मृदंगादयः प्रसिद्धाः ॥ दरः ॥ शंखः सूतादयस्तुष्टुवुः ॥ १७ ॥ ब्राह्मणा ब्रह्मवेदमाहुः ॥ मंत्रान् व्याचक्षत इत्यर्थः वादिनः वच

ते
७८

नगलितानि ॥ यथोक्तं भरतमेवाधिकृत्य नवमस्कंधे ॥ न्रगान्तु शुक्लदन्तान्‌ रुक्मान्सुवर्णेन परिष्कृतान्‌ ॥ प्रादात्कर्मेलि
मस्मारे नियुतानि चतुर्दशेति ॥ तन्नश्चयं वहुसंख्याश्लोकेन संगृह्यते ॥ वनुहृद्गुणशनांल्लशाणगुणाधिकं प्रमोशकः ॥ वहुंचतु
रशीत्यग्रसहस्राणि त्रयोदशेति ॥ दिने दिने प्रतिग्रहं चेति ॥ ६ ॥ आत्मसंभृताः मंगलानि कपिलादीनि ॥ ७ ॥ नरलोक

रा१ दर्शैं प्यखुराग्राणां होमाजिनतिलैः सह ॥ अलंकृतेभ्यो विप्रेभ्यो वहुंवहुं दिने दिने ॥ ६ ॥ गोविप्र रा
देवतावृद्धगुरून्‌ भक्तानि सर्वशः ॥ नमस्कृत्वात्मसंभृतीर्मंगलानि समस्पृशत्‌ ॥ ७ ॥ आत्मानं भूषयामा
स नरलोकविभूषणं ॥ वासोभिर्भूषणैः स्वीयैर्दिव्यस्रगनुलेपनैः ॥ च ॥ अवेक्ष्याज्यं तथादर्शं गो
वृषद्विजदेवताः ॥ कामांश्च सर्ववर्णानां पौरान्तःपुरचारिणां ॥ प्रदाप्य प्रकृतीः कामैः प्रतोष्य प्रत्य
नंदत ॥ ९ ॥ संविभज्याग्रतो विप्रान्स्तक्कांबूलानुलेपनैः ॥ सुहृदः प्रकृतीर्दारा उपायुंक्त ततः स्वयं ॥ १० ॥
तावत्सूत उपानीय स्यंदनं परमाद्भुतम्‌ ॥ सुग्रीवाद्यैर्हयैर्युक्तं प्रणम्याग्रवस्थितो ग्रतः ॥ ११ ॥

स्य विभूषणरूपमात्मानं स्वीयैः ॥ पीतांवरकौस्तुभादिभिः ॥ च ॥ कामानभिलषितानर्थान्‌ ॥ ९ ॥ विप्रादीन्स्रगा
दिभिः संविभज्य ॥ तेभ्यस्तानि दत्वेत्यर्थः ॥ उपायुंक्त भोगार्थमग्रहीत्‌ ॥ १० ॥ ११ ॥ रामराम राम राम राम

भा०द०उ० सेयं लोकस्य गतिर्वैयं तत्त्वदृक्काः अतोऽस्माकं कुत एव दुःखमापन्नमित्याश्चर्येणाह ॥ लोक इति ॥ भो ईश जगतः अ
७९ ॥ ईश्वरः ईश्वरे त्वयि सद्रक्षणार्थमवतीर्णेपि चेदस्माकं दुःखं स्यात् ॥ तर्हि किमन्यः ॥ कश्चिज्जरासंधादिस्त्वदाज्ञामति
लंघयति ॥ किं वा त्वया रक्ष्यमाणोपि जनः स्वकर्मणैव दुःखं प्राप्नोत्येवेति न विद्मः ॥ चेत् उभयमपि युक्तमिति भावः ॥२७॥

लोके भवान् जगदिनः कलयावतीर्णः सद्रक्षणाय खलनिग्रहणाय चान्यः ॥ कश्चित्त्वदीय
मतियाति निदेशमीश किं वा जनः स्वकृतमृच्छति तन्न विद्मः ॥ स्व ॥ स्वप्नायितं नृप सुखं
परतंत्रमीश शश्वद्भयेन मृतकेन धुरं वहाम ॥ हित्वा तदात्मनि सुखं त्वदनीहलभ्यं
क्लिश्यामहेतिकृपणास्तव मायये ह ॥२८॥

किं दुःखं तदाहुः ॥ स्वप्नायितमिति ॥ स्वप्नवज्जातं नृप सुखं यतः परतंत्रं विषयसाध्यं ॥ किंच ॥ संप्रति शश्व
द्भयं यस्मिन् तेन मृततुल्येन शरीरेण धुरं पुत्रदारादिचिंतां केवलं वहामः ॥ अहो कष्टं ॥ न ॥ ये वयमितः पू
र्वमेव निष्कामाः संतस्त्वां नाश्रिता इत्याहुः ॥ हित्वेति ॥ त्वत्तः यत्र अनीहैर्निष्कामैर्लभ्यमात्मनि स्वतः सिद्धं सु
खं तत् हित्वा क्लिश्यामः ॥२८॥ ॥७९॥

१९॥ २०॥ गिरिव्रजे तत्संज्ञिके दुर्गे ये रुद्धा आसन् ॥ तेषां दुःखमावेदयदित्यन्वयः ॥ २१ ॥ कृष्ण कृष्णेति षट् श्लोकी राज्ञां
विज्ञप्तिः तत्र प्रथमेन शरणाश्रयणं त्रिभिर्भयानुवादः द्वाभ्यां प्रार्थनमिति ॥ २२ ॥ पृथग्दृष्टिनो लोकस्य भयं वि
वृण्वतो न मंतिलोक इति ॥ विकर्म निषिद्धं काम्यं च तस्मिन्निरतः ॥ स्वे कुशले धर्मे भगवतोऽर्चने त्वया उदि

तत्रैकः पुरुषो राजन्नागतोऽपूर्वदर्शनः ॥ विज्ञापितो भगवते प्रतिहारैः प्रवेशितः ॥ १९ ॥ स
नमस्कृत्य कृष्णाय परेशाय कृतांजलिः ॥ राज्ञामावेदयद्दुःखं जरासंधनिरोधनं ॥ २० ॥ ये च
दिग्विजये तस्य संनतिं न ययुर्नृपाः ॥ प्रसह्य रुद्धास्तेनासन्नयुते द्वे गिरिव्रजे ॥ २१ ॥ राजान ऊ
चुः ॥ कृष्ण कृष्णाप्रमेयात्मन् प्रपन्नभयभंजन ॥ वयं त्वां शरणं यामो भवभीताः पृथग्धि
यः ॥ २२ ॥ लोको विकर्मनिरतः कुशले प्रमत्तः कर्मण्ययं त्वदुदिते भवदर्चने स्वे ॥ यस्ताव
दस्य बलवानिह जीविताशां सद्यश्छिनत्त्यनिमिषाय नमोऽस्तु तस्मै ॥ २३ ॥
नेत्रके पंचरात्रे सामान्यतश्च गीतायां ॥ यत्करोषि इत्यादि ॥ प्रमत्तोऽनवहितः ॥ यावदयं लोकः ॥ तावदेवास्य
यः ॥ सद्यो जीविताशां छिनत्ति तस्मै तुभ्यमनिमिषाय कालात्मने नम इति ॥ २३ ॥ ॥ ऽऽ ॥ ॥ ॥

१२६

१ पृथग्धियः ॥ वद्गको प्रार्थनां परित्यज्य त्वत्तः पृथग्भूते स्वीयदुःखत्राणे एव धीर्येषां ते ॥ ५ ॥

भा०द०उ० २५ ॥२९॥ भयान्महाप्ररुणेस्ता भोयमस्माकं ॥ यत्सर्वलोकवर्त्तांतज्ञानमिति ॥३२॥ ईश्वराः कर्त्तारो येषां तेषु ॥३३॥
८० एवमविदुषेव सर्वज्ञेन जरासंधवधार्थं तेन पांडवचिकीर्षितं पृष्टो नारदः मायेयमिति ज्ञात्वाह ॥ दृष्टेति
त्रिभिः ॥ विश्वसृजश्च ब्रह्मणोपि मायिनः ॥ मोहकस्य ते स्वशक्तिभिर्विद्यादिभिः ॥ भूतेषु तत्तद्रूपी मिति याचरतो

ततो दृष्ट्वा भगवान्कृष्णः सर्वलोकेश्वरेश्वरः ॥ ववंदेभ्युत्थितः शीर्ष्णा ससभ्यः सानुगो मुदा ॥३०॥
सभाजयित्वा विधिवत्कृतासनपरिग्रहं ॥ बभाषे सुनृतैर्वाक्यैः श्रद्धयातर्पयन्निव ॥३१॥
अपि स्विदद्य लोकानां त्रयाणामकुतोभयं ॥ ननु भूयान्भगवतो लोकान्पर्यटतो गु
णः ॥ न हि तेविदितं किंचिल्लोकेष्वीश्वरकर्तृषु ॥ अथ पृछामहे युष्मान्पांडवानां चि
कीर्षितं ॥३३॥ नारद उवाच ॥ दृष्टा मया ते बहुशो दुरत्यया माया विभो विश्वसृजश्च मायि
नः ॥ भूतेषु भूमंश्चरतः स्वशक्तिभिर्वह्नेरिव छन्नरुचो न मेद्भुतं ॥३४॥

वर्त्तमानस्य यथाहं भूतेषु वर्त्तेत हि भूतानि मां किं न पश्यंति तत्राह ॥ वह्नेरिवछन्नरुचः ॥ इति स्वशक्ति १
भिरेव छन्ना रुक्प्रकाशो यस्य तस्य ॥ अतस्तवेदं प्रश्नादि न मेद्भुतं ॥३४॥ रामराम रामरामराम ॥ ८०

विरिव

स्त्रवीरिव

तन्मायाहृतं कर्म्मबंधं त्वमेव विनिवर्त्तयेति प्रार्थयंते ॥ तन्नइति ॥ वियुंक्ष्व विमोचय ॥ मगधो जरासंधस्तत्संस्त-
कात् कर्म्मपाशात् ॥ भवद्भिरेव विक्रम्य ततो निर्गम्य तामिति चेदुक्तं त आहुः ॥ य इति ॥ य एक एवायुतमतंगजानां वीर्यं
विभ्रत् सन् ॥ स्वभवने भूभुजोऽस्मान् रुरोध सिंहो [illegible] ॥ २६ ॥ किंच ॥ युष्मादीया वयमित्यस्मानधिकं बाधत इत्याहुः

तन्नो भवान्प्रणतशोकहरांघ्रियुग्मो बद्धान्वियुंक्ष्व मगधाह्वयकर्म्मपाशात् ॥ यो भूभुजो यु-
तमतंगजवीर्य्यमेको विभ्रद्रुरोध भवने मृगराडिवावीः ॥ २६ ॥ यो वै त्वया द्विनवकृत्व उदा-
त्तचक्र भग्नो मृधे खलु भवंतमनंतवीर्य्यं ॥ जित्वा नृलोकनिरतं सकृदूढदर्प्पो युष्मत्प्रजा रु-
जति नोऽजित तद्विधेहि ॥ २७ ॥ दूत उवाच ॥ इति मागधसंरुद्धा भवद्दर्शनकांक्षिणः ॥ प्रप-
न्नाः पादमूलं ते दीनानां शं विधीयतां ॥ २८ ॥ श्रीशुक उवाच ॥ राजदूते ब्रुवत्येवं देवर्षिः परम-
द्युतिः ॥ विभ्रत्पिंगजटाभारं प्रादुरासीद्यथा रविः ॥ २९ ॥

योवाइति हे उदात्तचक्र उत्तमसुदर्शन ॥ यो वै द्वि-
नवकृत्वः ॥ अष्टादशवारान् त्वया सह मृधे युद्धे भग्नः ॥ तत्र सकृदेकवारं ॥ त्वया खलु भवंतमपराजितं ॥ पश्चा-
दनंतवीर्यमपि नृलोके निरतं ॥ नरशरीरविनोदं भवंतं सकृज्जित्वा ऊढदर्पः ॥ प्राप्तगर्वः ॥ युष्मत्प्रजा नः ह-

स १

भा०द०उ० नचात्रैवानुमोदनंकार्य्यं ॥ किंतुतत्रागंतव्यमित्याशयेनाह ॥ तस्मिन्निति ॥ ३९ ॥ तत्रागताश्चवेंद्रदर्शनादिनाप
८१ ताभविष्यंतीत्याह ॥ श्रवणादिति ॥ अंतेवसायिनःश्वपचाअपिब्रह्ममयस्य ॥ वेदघनमूर्त्तेः ॥ ईक्षाचअभिम
र्शनंचतौविद्येतेयेषांते ॥ ४० ॥ कैमुत्यमतिशयेनाह ॥ यस्येति ॥ हेभुवनमंगलरूप दिविपाताले भूमौचप्रथि

तस्मिन्नेवक्रतुवरेभवंतंवैसुरादयः ॥ दिदृक्षवःसमेष्यंतिराजानश्चयशस्विनः ॥ ३९ ॥ श्रवणा
त्कीर्त्तनाद्ध्यानात्पूयंतेऽंतेवसायिनः ॥ तवब्रह्ममयस्येशकिमुतेक्षाभिमर्षिनः ॥ ४० ॥ य
स्यामलंदिवियशःप्रथितंरसायांभूमौचतेभुवनमंगलदिग्वितानं ॥ मंदाकिनीतिदिवि
भोगवतीतिचाधोगंगेतिचेहचरणांबुपुनातिविश्वं ॥ ४१ ॥ श्रीशुकउवाच ॥ तत्रतेष्वात्मप
क्षेष्वगृणत्सुचजिगीषया ॥ वाचःपेशैःस्मयन्भृत्यमुद्धवंप्राहकेशवः ॥ ४२ ॥

तंयस्ययशोविश्वंपुनाति ॥ कथंप्रथितंदिग्वितानं ॥ दिग्भुवनानांवितानवदलंकरणंतथाचरणांबुचप्रथितंपुनाति ॥ क
थंतत्प्रथितं ॥ दिविमंदाकिनी ॥ अधश्चभोगवतीति ॥ इहचभूमौगंगेति ॥ तस्यतवगमनात्सर्वंमंगलंपवित्रंचभविष्यती
तिभावः ॥ ४१ ॥ तत्रैवनारदेनोक्ते ॥ तेषुतत्रवर्तमानेष्वात्मीयपक्षेषुयादवेषुजरासंधस्यजिगीषयाअगृणत्सु
अमन्यमानेषुवाचःपेशैःपेशलवाग्भिरित्यर्थः ॥ ४२ ॥ ८१

इदं जगत्कथंभूतं ॥ असदेव ॥ यत्तु मायया विद्यमानात्मतयावभासते ॥ तज्जगत्सृजतः ॥ किं तु केवलं नमः नम
नमेव शक्यमित्याह ॥ तस्मै नम इति कुतः स्वेन रूपेण सर्वतो विलक्षणात्मने ॥ अचिंत्यायेत्यर्थः ॥३५॥ ननु त्वेवंभू
तस्य किं मायाचेष्टितैरित्यत आह ॥ जीवस्येति ॥ अविद्यात्तमसावृतत्वेन अनर्थप्रापकात् शरीरात् संसरतः ॥ तेनैव त

तवेहितं कोऽर्हति साधु वेदितुं स्वमाययेदं सृजतो नियच्छतः ॥ यद्विद्यमानात्मतयावभास
ते तस्मै नमस्ते स्वविलक्षणात्मने ॥३५॥ जीवस्य यः संसरतो विमोक्षणं न जानतोऽनर्थवहाच्छ
रीरतः ॥ लीलावतारैः स्वयशः प्रदीपकं प्राज्वालयत्त्वा तमहं प्रपद्ये ॥३६॥ अथाप्याश्रावये ब्र
ह्मन्नरलोकविडंबनं ॥ राज्ञः पैतृष्वसेयस्य भक्तस्य च चिकीर्षितं ॥३७॥ यक्ष्यति त्वां मखें
द्रेण राजसूयेन पांडवः ॥ पारमेष्ठ्यकामो नृपतिस्तद्भवाननुमोदतां ॥३८॥

मसात्तस्माच्छरीरात् विमोक्षोपायमजानतः ॥ प्राज्वालयत् प्रज्वालितवानुतं त्वां ॥ यशः श्रवणादिभिर्जी ज्वालि
वस्य मोक्षार्थः ॥३६॥ आश्रावये श्रावयिष्यामि ॥ नरलोकविडंबनं ब्रह्मन् त्वां ॥ प्रेक्ष्येति पाठे ॥ ब्रह्मन् परमात्म
न् नरलोकानुकारिणं त्वां श्रावयिष्यामीति ॥३७॥ ॥३८॥

भा० द० उ० ४ अत्युत्सुकतया सद्य एव जरासंधं हंतुमिच्छन्नुपायादवानालक्ष्याह स वा इति अन्येषां तु तेनोवर्त्तिनामपि सम
८२ बलत्वमेव भीमः तथापि तं भीमादेवनेत्यमत्युर्विहित इति भावः ५ ननु स्वबलस्य साम्येपि सेनाबलं तस्याधि
कमिति चेदत्राह द्वैरथ इति द्वंद्वयुद्धे शतेनाक्षौहिणीभिर्मगधोमानजेत्तव्य इत्यर्थः ६ नन्वसौ स्वसैन्यमे

अस्माकं च महानर्थो ह्येतेनैव भविष्यति यशश्च तव गोविंद राज्ञो बद्धान्विमुंचतः ४ स
वै दुर्विसहो राजा नागायुतसमो बलेः बलिनामपि चान्येषां भीमं समबलं विना ५ द्वैरथे
स तु जेतव्यो मा शताक्षौहिणीयुतः ६ ब्रह्मण्योभ्यर्थितो विप्रैर्न प्रत्याख्याति कर्हिचित् ब्रह्म
वेषधरो गत्वा तं भिक्षेत वृकोदरः हनिष्यति न संदेहो द्वैरथे तव सन्निधौ ७ निमित्तं परमीश
स्य विश्वसर्गनिरोधयोः हिरण्यगर्भः सर्वश्च कालस्यारूपिणस्तव ८

द्वयुद्धाय नियुंजीत कुतस्तेन द्वैरथे तत्राह ब्रह्मण्य इति न प्रत्याख्याति न निराकरोति भिक्षेत द्वंद्वयुद्धं याचतां तथा
पि समबलत्वात्साम्यमेव स्यादत्त आह तव सन्निधाविति ७ नन्व किंचित्कर्त्तो मम सन्निधानात्किं स्याद्दत्तत्रा
ह निमित्तमिति अयमर्थः यथा तवारूपस्य कालात्मनः विश्वसर्गे निमित्तं केवलं हिरण्यगर्भस्तथा सर्वश्च
तन्निरोधे तथात्रत्वमेव सन्निधिमात्रेण हंता भीमो निमित्तमात्रमिति ८ ॥

चक्षुष्टे हेतुः ॥ मंत्रार्थो नाम मंत्रसाध्यानां प्रयोजनानां तत्त्ववित् ॥ परिपाक वेदिता ॥ ४३ ॥ ४४ ॥ इति दशमे सप्ततितमः ॥ ७० ॥
अथैकसप्ततितमे उद्धवस्य तु मंत्रतः ॥ इंद्रप्रस्थगतेः कृष्णे पार्थानां परमोत्सवः ॥ राजसूयमिषं कृत्वा भीमदुर्योधनादिषु ॥ कलिमुत्पाद्य तत् ह्लाराम्भारमहरत्प्रभुः ॥ देवर्षेर्मतं राजसूयगमनं सभ्यानां मतं एजरत्ताकृष्णस्य तत्रभयं ॥ १ ॥ यद्यतः

श्रीभगवानुवाच ॥ त्वं हि नः परमं चक्षुः सुहृन्मंत्रार्थतत्त्ववित् ॥ अथात्र ब्रूह्यनुष्ठेयं श्रद्दध्मः करवाम तत् ॥ ४३ ॥ श्रीशुक उवाच ॥ इत्युपामंत्रितो भर्त्रा सर्वज्ञेनापि मुग्धवत् ॥ निदेशं शिरसाधाय उद्धवः प्रत्यभाषत ॥ ४४ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे भगवत्त्र श्र सप्ततितमोध्यायः ॥ ७० ॥ श्रीशुक उवाच ॥ इत्युदीरितमाकर्ण्य देवर्षेरुद्धवोऽब्रवीत् ॥ सभ्यानां मतमाज्ञाय कृष्णस्य च महामतिः ॥ १ ॥ उद्धव उवाच ॥ यदुक्तमृषिणा देव साचिव्यं यक्ष्य
त ' त्वया ॥ कार्यं पैतृष्वसेयस्य रक्षा च शरणैषिणां ॥ २ ॥ यष्टव्यं राजसूयेन दिक्चक्रजयिना विभो ॥ अतो जरासुतजय उभयार्थो मतो मम ॥ ३ ॥

यागं करिष्यतः पैतृष्वसेयस्य ॥ पितृष्वसुः पुत्रस्य साचिव्यं साहाय्यं ॥ तच्च कार्यं ॥ तथा शरणार्थिनां राज्ञां रक्षा च कार्या ॥ २ ॥ तत्र प्रथमं राजसूयार्थं गंतव्यं ततो राजरक्षा कर्तव्येत्याह ॥ यष्टव्यमित्यष्टभिः ॥ अतः दिग्विजयहेतु

दारान्

भा०द०उ० अनुज्ञाप्य अनुज्ञां प्राप्य गुरून् वसुदेवादीन् ॥१२॥ अवरोधान्निर्गमय्य प्रयाणं कारयित्वा ॥१३॥ भटाः पदातयः सादिनः अ-
८३ श्वारोहाः रथादिनायकैः करालया अतिभयया आत्मसेनया परिवृतो निराक्रमन्निरगात् कुतः स काशात् मृदंगा-

अथादिशत्प्रयाणाय भगवान्देवकीसुतः भृत्यान्दारुकजैत्रादीननुज्ञाप्य गुरून्विभुः

मर ॥१२॥ निर्गमय्यावरोधान्स्वान्ससुतान्सपरिच्छदान् ॥ संकर्षणमनुज्ञाप्य यदुराजं च शत्रुहन् ॥ सूतोपनीतं स्वरथमारुहद्गरुडध्वजं ॥१३॥ ततो रथद्विपभटसादिनायकैः करालया परिवृत आत्मसेनया ॥ मृदंगभेर्यानकशंखगोमुखैः प्रघोषघोषितककुभो निराक्रमत् ॥१४॥ नृवाजिकांचनशिबिकाभिरच्युतं सहात्मजाः पतिमनुसुव्रता ययुः ॥ वरांबराभरणविलेपनस्रजः सुसंवृता नृभिरसिचर्मपाणिभिः ॥१५॥ नरोष्ट्रगोमहिषखराश्वतर्यनः करेणुभिः परिजनवारयोषितः ॥ स्वलंकृताः कटकुटिकंबलांबराद्युपस्करा ययुरधियुज्य सर्वशः ॥१६॥

दिभिर्वाद्यैः प्रघोषेण घोषिता याः ककुभः ॥१४॥ नृवाजीति नृयानैः अश्वैः कांचनशिबिकाभिश्च अच्युतं पतिमनु
२ ता ययुः सुव्रताः ॥ वरांबरादीनि यासां ताः ॥१५॥ नरोष्ट्रादिभिर्यानैः ॥ अश्वतरीगर्दभ्यामुत्पन्नाः ॥ अनः शकटं करेणुर्गजी
ताभिः परिजनयोषितः वारयोषितश्च कटकुटयः उशीरादितृणनिर्मितागृहाः ॥ कंबलांबरादयश्च उपस्कराः कुंडादि-

अतोऽनेनोपायेन त्वया सशीघ्रं हन्तव्य इत्याशयेनाह गायन्तीति जरासंधधृतानां राज्ञां देव्यः पत्न्यः ते विशदं कर्म स्वगृहे
षु बालकलालनादौ गायन्ति किं तत्कर्म स्वशत्रोर्जरासंधस्य वधमात्मनां पतीनां विमोक्षणं च हे वत्स मारो
दीः श्रीकृष्ण एवं करिष्यतीति अत्र दृष्टान्ताः गोप्यश्चेत्यादयः यथा गोप्यः शंखचूडवधं स्वमोक्षं च गायन्ति अ
वतारान्तरगतं च कुंजरपतेर्नक्रात् जनकात्मजा याश्च रावणात् पित्रोः कंसगृहात् मोक्षं अत्र एवंभूतानां ता

गायन्ति ते विशदकर्म्म गृहेषु देव्यो राज्ञां स्वशत्रुवधमात्मविमोक्षणं च गोप्यश्च कुंजरपते
र्जनकात्मजायाः पित्रोश्च लब्धशरणा मुनयो वयं च ९ जरासंधवधः कृष्ण भूर्य्यर्थायोप
कल्पते प्रायः पाकविपाकेन तव चाभिमतः क्रतुः १० इत्युद्धववचो राजन्सर्वतोभद्रम
च्युतं देवर्षिर्यदुवृद्धाश्च कृष्णश्च प्रत्यपूजयन् ११

सां कृपया त्वयात्थैव कर्त्तव्यमिति भावः ९ किंच जरासंधवध इति भूर्य्यर्थायेति ततः शिशुपालवधादयोपि
सुखसाध्या भविष्यन्तीति भावः एतच्च सर्वं भविष्यत्येवेति भावयन्नाह प्राय इति पच्यत इति पाकः कर्म
स्य विपाकः फलं तेन नराज्ञां पुण्यविपाकेन पागांतरे जरासंधस्य पापविपाकेन तेनायं क्रतुस्तवाभिप्रे
तः तत्र गते त्वयि सर्वं भविष्यतीत्यर्थः १० अच्युतमनुपपत्त्या रहितं यदुवृद्धा इति आनकदुन्दुभ्यादयस्तथानापूज्य

प्राणाइंद्रियाणि प्राणंमुख्यप्राणमिव ॥२४॥ सस्वजेपरिरेभे ॥२५॥ रमायाआत्मलंनिर्दोषमात्तयं ॥ विस्मितोलोकविभ्रमो

तमुपागतमाकर्ण्यप्रीतोदुर्दर्शनंनृणां ॥ अजातशत्रुर्निरगात्सोपाध्यायःसुहृद्वृतः ॥२३॥ गी
तवादित्रघोषेणब्रह्मघोषेणभूयसा ॥ अभ्ययात्सहृषीकेशंप्राणाःप्राणमिवादृतः ॥२४॥
दृष्ट्वाविक्लिन्नहृदयःकृष्णंस्नेहेनपांडवः ॥ चिराद्दृष्टंप्रियतमंसस्वजेथपुनःपुनः ॥२५
दोर्भ्यांपरिष्वज्यरमामलालयंमुकुंदगात्रंनृपतिर्हताशुभः ॥ लेभेपरांनिर्वृतिमश्रुलो
चनोहृष्यत्तनुर्विस्मृतलोकविभ्रमः ॥२६॥ तंमातुलेयंपरिरभ्यनिर्वृतोभीमःस्मयन्प्रे
मजलाकुलेंद्रियः ॥ यमौकिरीटीचसुहृत्तमंमुदाप्रवृद्धबाष्पाःपरिरेभिरेच्युतं ॥२७॥
अर्जुनेनपरिष्वक्तोयमाभ्यामभिवादितः ॥२८॥ ब्राह्मणेभ्योनमस्कृत्यवृद्धेभ्यश्चय
थार्हतः ॥ मानिनोमानयामासकुरुसृंजयकैकयान् ॥२९॥ सूतमागधगंधर्वावंदिनश्चो
पमंत्रिणः ॥ मृदंगशंखपटहवीणापणवगोमुखैः ॥ ब्राह्मणाश्चारविंदाक्षंतुष्टुवुर्ननृतु
र्जगुः ॥३०॥

लोकस्यव्यवहारोयेनसः ॥२६॥ ॥२७॥ अर्जुनेनसमत्वात् ॥ परिष्वक्तएवकेवलं पादेननमस्कुर्वन्नर्जुनःश्रीकृष्णेनभुजा

भ्यांधृतइतिभावः यमाभ्यांत्वभिवादितश्चेति ॥२८॥ ॥२९॥३०॥

रवेरंशुभिस्तत्र हृलं दिवा वभौ ॥ कथंभूतं तुमुलरवमाकुलस्वनं ॥ क्षुभितैः तिमिंगिलैः ॥ ऊर्मिभिश्च ॥१७॥ मुनिर्नारदो विहा
यसा आयया विति शेषः ॥१८॥ माभैष्टेति वहुत्वं राज्ञाभिप्रायेण ॥१९॥ प्रत्यैक्षन् ॥ प्रत्यैक्षंत ॥ यद्यस्मान्मुमुक्षवः ॥२०॥ आन

वलं वृहद्ध्वजपटछत्रचामरैर्वरायुधाभरणकिरीटवर्मभिः ॥ दिवांशुभिस्तुमुलरवं वभौ र
वेर्यथार्णवः क्षुभिततिमिंगिलोर्मिभिः ॥१७॥ अथो मुनिर्यदुपतिना सभाजितः प्रणम्य तं
हृदि विदधद्विहायसा ॥ निशम्य तद्व्यवसितमाहृतार्हणो मुकुंदसंदर्शननिर्वृतेंद्रियः ॥१८
राजदूतमुवाचेदं भगवान् प्रीणयन्गिरा ॥ माभैष्ट दूत भद्रं वो घातयिष्यामि मागधं ॥१९॥
इत्युक्तः प्रस्थितो दूतो यथावदवदन्नृपान् ॥ तेपि संदर्शनं शौरेः प्रत्यैक्षन् यन्मुमुक्षवः ॥२०॥
आनर्त्तसौवीरमरूंस्तीर्त्वा विनशनं हरिः ॥ गिरीन्नदीरतीताय पुरग्रामव्रजाकरान् ॥२१॥ त
तो दृशद्वतीं तीर्त्वा मुकुंदोथ सरस्वतीं ॥ पंचालानथ मत्स्यांश्च शक्रप्रस्थमथागमत् ॥२२॥

र्त्तादयो मार्गस्था देशास्तान् ॥ तीर्त्वा अतिक्रम्य विनशनं कुरुक्षेत्रं ॥ अतीयाय अतिक्रम्य ययौ ॥२१॥ शक्रप्रस्थमिंद्रप्रस्थं ॥२२॥

भा० द० उ० उडुपसहायाः चंद्रसहचरीरित्यर्थः ॥ अस्माभिः किं पुण्यमकारि ॥ ३५ ॥ ॥ ३६ ॥ अभ्युपेतः अभिगमनेन सत्कृतः ॥ ३७ ॥ सस्नुषा द्रौ
८५ पदीसहिता ॥ ३८ ॥ कृत्यं प्रकारविशेषं ॥ प्रमोदेनोपहृतोऽभिभूतः ॥ ३९ ॥ गुरुस्त्रीणां कुंत्या द्रौपद्या भगिन्यास्सुभद्राया

ऊचुः स्त्रियः पथि निरीक्ष्य मुकुंदपत्नीस्तारा यथोडुपसहाः किमकार्यमुभिः ॥ यच्चक्षुषा पु
रुषमौलिरुदारहाससलीलावलोककलयोत्सवमातनोति ॥ ३५ ॥ तत्र तत्रोपसंगम्य पौरा
मंगलपाणयः ॥ चक्रुः सपर्यां कृष्णाय श्रेणीमुख्या हतैनसः ॥ ३६ ॥ अंतःपुरजनैः प्रीत्या मुकुं
दः फुल्ललोचनैः ॥ ससंभ्रमैरभ्युपेतः प्राविशद्राजमंदिरं ॥ ३७ ॥ पृथा विलोक्य भ्रात्रेयं कृ
ष्णं त्रिभुवनेश्वरं ॥ प्रीतात्मोत्थाय पर्यंकात्सस्नुषा परिषस्वजे ॥ ३८ ॥ गोविंदं गृहमानीय देव
देवं समादृतः ॥ पूजायां नाविदत्कृत्यं प्रमोदोपहतो नृपः ॥ ३९ ॥ पितृष्वसुर्गुरुस्त्रीणां कृष्णश्च
क्रेऽभिवादनं ॥ स्वयं च कृष्णया राजन्भगिन्या [illegible] चाभिवंदितः ॥ ४० ॥ श्वश्र्वा संचोदिता कृ
ष्णा कृष्णपत्नीश्च सर्वशः ॥ आनर्च रुक्मिणीं सत्यां भद्रां जांबवतीं तथा ॥ अन्याश्चाभ्या
गता यास्तु वासःस्रङ्मंडनादिभिः ॥ ४१ ॥

४० ॥ आनर्च ॥ अर्चितवती ॥ अन्याश्च याः कृष्णपत्न्योऽभ्यागताः ॥ [illegible] ताः अपि ॥ ४१ ॥ रामराम रामराम रामराम ८५

३१ ॥ चित्रध्वजादिभिर्विराजमानं ॥ प्रतिसद्म उद्यद्दीपावलिभिः पुष्यादिप्रकरैश्च जुष्टं ॥ जालेभ्यो गवाक्षेभ्यो निर्गतैर्धूपै
रुचिरं विलसन्त्यः पताका यस्मिन् तत्तत् ॥ मूर्द्धन्याः मूर्द्धनिभवाः हेमकलशा येषां तैः ॥ रजतमयानि उरूणि स्थूला

एवं सुहृद्भिः पर्य्यस्तः उग्रयश्लोकशिखामणिः ॥ संस्तूयमानो भगवाननुविवेशालंकृतं पुरं ॥ ३१ ॥ सं
सिक्तवर्त्म करिणां मदगंधतोयैश्चित्रध्वजैः कनकतोरणपूर्णकुंभैः ॥ मृष्टात्मभिर्नववदु
कूलविभूषणस्त्रग्गंधैर्नृभिर्युवतिभिश्च विराजमानं ॥ उद्दीप्रदीपावलिभिः प्रतिसद्म
जालनिर्य्यातधूपरुचिरं विलसत्पताकं ॥ मूर्द्धन्यहेमकलशैः रजतोरुशृंगैर्जुष्टं ददर्श भ
वनैः कुरुराजधाम ॥ ३२ ॥ प्राप्तं निशम्य नरलोचनपानपात्रमौत्सुक्यविश्लथितकेशदुकूलबं
धाः ॥ सद्यो विसृज्य गृहकर्म पतींश्च तल्पे द्रष्टुं ययुर्युवतयः स्म नरेंद्रमार्गे ॥ ३३ ॥ तस्मिन्सुसंकु
लइभाश्वरथद्विपद्भिः कृष्णं सभार्य्यमुपलभ्य गृहाधिरूढाः ॥ नार्य्यो विकीर्य्य कुसुमैर्मनसो
पगुह्य सुस्वागतं विदधुरुत्स्मयवीक्षितेन ॥ ३४ ॥ तिग्मशृंगाणि कलसा धस्तनभूमिका येषां तैर्भवनैश्च जुष्टं
कुरुराजस्य धाम पुरं ददर्श ॥ ३२ ॥ नराणां लोचनानि तेषां पानस्य सादरवीक्षणस्य पात्रं विषयं किं पुनर्नारीणामित्यर्थः
३३ ॥ सुष्ठु स्वागतं तत्प्रश्नादिकं प्रियं उत्स्मयवीक्षितेनैव विदधुः ॥ ३४ ॥ ॥ हरये नमः ॥ ॥ ऽऽ ॥ ॥ ॥ ऽऽ ॥ राम राम

भा०द०उ० विभूतीरंशान्॥२॥ एष चक्रवर्त्तिनां मनोरथः॥ कथं त्वया क्रियत इति चेदत आह॥ त्वत्पादुके इति परि ये चरं(ते)
८६ ति॥ यच्छब्दव्यवधानमार्षं ये परिचरंतीति॥ देहेन ध्यायंति मनसा अभद्रस्य नशने नाशके शरणे इति वाचा ते भ
वस्यापवर्गं मोक्षं विंदंति॥ यदि आशासते॥ तर्हि आशिषोपि त एव विंदंति॥ नान्ये चक्रवर्त्तिनोपि॥३॥ भगवतो भक्त
पक्षपातमाविष्कारयन्नाह॥ तद्देवदेवेति॥ तत्तस्मात् पश्यतु साक्षात्॥ एवं निश्चितेपि ये कर्मादिप्रधानाः केचित्कु

युधिष्ठिर उवाच॥ क्रतुराजेन गोविंद राजसूयेन पावनीः॥ यक्ष्ये विभूतीर्भवतस्तत्संपादय नः प्रभो
॥१॥ त्वत्पादुके अविरतं परि ये चरंति ध्यायंत्यभद्रनशने शुचयो गृणंति॥ विंदंति ते कमलनाभ भवा
पवर्गमाशासते यदि त आशिष ईश नान्ये॥३॥ तद्देवदेव भवतश्चरणारविंदसेवानुभावमि
ह पश्यतु लोक एषः॥ ये त्वां भजंति न भजंत्युत वोभयेषां निष्ठां प्रदर्शय विभो कुरुसृंजयानां॥४॥
न ब्रह्मणः स्वपरभेदमतिस्तव स्यात्सर्वात्मनः समदृशः स्वसुखानुभूतेः॥ संसेवतां सुरत रो
रिव ते प्रसादः सेवानुरूपमुदयो न विपर्ययोऽत्र॥५॥ कुरुसृंजया भगवद्भक्तिं न बहु मन्यंते॥ तेषां मोहनि

वृत्तये येपि त्वां भजंति तेषामुभयेषां निष्ठां स्थितिं दर्शय॥४॥ ननु रागादिरहिते मयि कथमिदं वैषम्यं स्यात्तत्राह
नेति॥ स्वः पर इति भेदमतिस्तव न स्यादेव॥ कुतः॥ ब्रह्मणो निरुपाधेः॥ किं च॥ सर्वस्यात्मनः॥ अतः स
मदृशः॥ किं च स्वसुखानुभूतेः॥ अतो रागाद्यभावः॥ तथापि संसेवमानानामिव त्वत्प्रसादो नान्येषां त

८६

प्रत्यहं नवं नवं यथा भवति तथा सुखं निवासयामास ॥ कथंभूतं ॥ यः प्रेम्णा नित्यं फाल्गुनेन संयुतः ॥ अत एव तस्य
सहायेन मता खांडवेन वह्निं तर्पयित्वा ॥ तत्र च मयं मोचयित्वा तं मयं प्रयुज्य युधिष्ठिराय दिव्या सभा कृता ॥ तं श्रीजना
र्दनं ॥ अनेन राज्ञः कृष्णोपकारानुस्मरणं दिव्यत्वात् सभायां यथामनोरथं सर्वविकाससंपादनं च दर्शितम् ॥ ४२ ॥ ४३

सुखं निवासयामास धर्मराजो जनार्दनं ॥ ससैन्यं सानुगामात्यं सभार्यं च नवं नवं ॥ ४२ ॥ उवास
कतिचिन्मासान् राज्ञः प्रियचिकीर्षया ॥ विहरन् रथमारुह्य फाल्गुनेन भटैर्वृतः ॥ ४३ ॥ इति श्री
मद्भागवते महापुराणे दशमस्कंधे उत्तरार्द्धे प्रस्थानगमनं एकसप्ततितमोध्यायः ॥ ७१ ॥ श्रीशुक उवा
च ॥ एकदा तु सभामध्ये आस्थितो मुनिभिर्वृतः ॥ ब्राह्मणैः क्षत्रियैर्वैश्यैर्भ्रातृभिश्च युधिष्ठि
रः ॥ आचार्यैः कुलवृद्धैश्च ज्ञातिसंबंधिबांधवैः ॥ शृण्वतामेव चैतेषामाभाष्येदमुवाच ह ॥ १

इति दशमे एकसप्ततितमः ॥ ७१ ॥ ततो द्विसप्ततितमे राज्ञा कार्ये निवेदिते ॥ दुर्जयं मागधं युद्धे भीमेनाघात
यद्धरिः ॥ आस्थित आसनमिति शेषः ॥ शृण्वतामेवेति ॥ यत्र सन्नः श्रीहरिः करोति न तदन्यः ॥ कश्चिद
पि कर्तुं समर्थ इति निश्चित्य सर्वानेव तानाहृत्य कृष्णमुवाचेत्यर्थः ॥ आभाष्य भो भो श्रीकृष्ण भक्तवत्सल इति

भा॰ द॰ ॥ ९ ॥

भा०द०उ० अयुंक्त नियुक्तवान् ॥ विष्णुतेजसा उपबृंहितान् ॥ संवर्द्धितान् ॥ तेजोपबृंहितानिति संधिरार्षः ॥११॥ नकुलादी
७१ नां मत्स्यादिभिः सहायैर्यथासंख्येन संबंधः ॥१२॥ कथंभूताय यक्ष्यते यागं करिष्यते ॥१३॥ आद्यो हरिः श्रीकृष्णः

श्रीशुक उवाच ॥ निशम्य भगवद्गीतं प्रीत्युत्फुल्लमुखांबुजः ॥ भ्रातॄन्दिग्विजयेऽयुंक्त विष्णुतेजो
७२ पबृंहितान् ॥११॥ सहदेवं दक्षिणस्यामादिशत्सह सृंजयैः ॥ दिशि प्रतीच्यां नकुलमुदीच्यां सव्यसा
चिनं ॥ प्राच्यां वृकोदरं मत्स्यैः केकयैः सह मद्रकैः ॥१२॥ ते विजित्य नृपान्वीरा आजह्रुर्दिग्भ्य
ओजसा ॥ अजातशत्रवे भूरि द्रविणं नृप यक्ष्यते ॥१३॥ श्रुत्वाजितं जरासंधं नृपतेर्ध्यायतो हरिः ॥
आहोपायं तमेवाद्य उद्धवो यमुवाच ह ॥१४॥ भीमसेनोऽर्जुनः कृष्णो ब्रह्मलिंगधरास्त्रयः ॥ ज
ग्मुर्गिरिव्रजं तात बृहद्रथसुतो यतः ॥१५॥ ते गत्वातिथ्यवेलायां गृहेषु गृहमेधिनं ॥ ब्रह्मण्यं
समयाचेरन्राजन्या ब्रह्मलिंगिनः ॥१६॥ राजन्विद्ध्यतिथीन्प्राप्तानर्थिनो दूरमागतान् ॥
तन्नः प्रयच्छ भद्रं ते यद्वयं कामयामहे ॥१७॥

१४ ॥ ब्रह्मलिंगधराः ब्राह्मणलिंगधारिणः ॥ यतः यत्र बृहद्रथसुतो जरासंधः ॥१५॥ गृहेषु वर्त्तमानं सम

जये १ ॥ [illegible] १८

सत्यं मद्भक्तानामेव कैवल्यादि नान्येषामित्यनुमोदमान आह ॥ सम्यगिति ॥ शत्रुकर्षणेति संबोधयन् सर्व
राजविजयशक्तिं संचारयति ॥ अनुभविष्यति ॥ ईप्स्यति ॥ सर्वलोकव्याप्ता भविष्यतीत्यर्थः ॥ ६ ॥ ७ ॥ किमत्रेम
यान्येन वा संपादनीयं न वस्तु कर एव राजसूय इत्याह ॥ विजित्येति ॥ जगतीं सर्वां पृथ्वीं संभारान् संभृत्य संपाद्य

श्रीभगवानुवाच ॥ सम्यग्व्यवसितं राजन् भवता शत्रुकर्षण ॥ कल्याणी येन ते कीर्त्तिर्लोका
ननुभविष्यति ॥ ६ ॥ ऋषीणां पितृदेवानां सुहृदामपि नः प्रभो ॥ सर्वेषामपि भूतानामीप्सितः
क्रतुराडयं ॥ ७ ॥ विजित्य नृपतीन्सर्वान्कृत्वा च जगतीं वशे ॥ संभृत्य सर्वसंभारानाहरस्व म
हाक्रतुं ॥ ८ ॥ एते ते भ्रातरो राजन्लोकपालांशसंभवाः ॥ जितोस्म्यात्मवता तेहं दुर्जयो योऽकृता
त्मभिः ॥ ९ ॥ न कश्चिन्मत्परं लोके तेजसा यशसा श्रिया ॥ विभूतिभिर्वाभिभवेद्देवोपि किमु पार्थि
वः ॥ १० ॥

आहरस्व अनुतिष्ठेत्यर्थः ॥ ८ ॥ ननु नृपतिविजयादिकं कथं शक्यं स्यादत आह ॥ एत इति ॥ किंच ॥ आत्मवता जि
तेंद्रियेण ते त्वया अहं च जितोस्मि वशीकृतोस्मि ॥ अकृतात्मभिः अजितेंद्रियैः ॥ ९ ॥ आस्तां तावद्देवं भवत
स्तव परैरभिभवशंका ॥ किंच न मापि मत्परं कोपि नाभिभवितुं प्रभवतीत्याह ॥ न कश्चिदिति ॥ तेजसा
प्रभावेन ॥ विभूतिभिः सैन्यादिसामग्रीभिः ॥ १० ॥

भा० द० उ० ॰ ज्याघातैः ॥ ज्याघातकिणांकितैः ॥ दृष्टपूर्वान् ॥ द्रौपदीस्वयंवरादिषु ॥ २१ ॥ २२ ॥ इंद्रस्य श्रियं जिहीर्षता ।
८८ विप्रव्याजेन विष्णुना भ्रंशितस्यापि बलेर्नु अहो ॥ नेति पाठे ॥ न श्रूयते किं ॥ अपि तु श्रूयत इति ॥ तं स्वाय
श्रीशुक उवाच ॥ स्वैरैराकृतिभिस्तांस्तु प्रकोष्ठैर्ज्याहतैरपि ॥ राजन्यबंधून्विज्ञाय दृष्टपूर्वा
नचिंतयत् ॥ २१ ॥ राजन्यबंधवो ह्येते ब्रह्मलिंगानि बिभ्रति ॥ ददामि भिक्षितं तेभ्य आत्मानम
पि दुस्त्यजं ॥ २२ ॥ बलेर्नु श्रूयते कीर्तिर्वितता दिक्ष्वकल्मषा ॥ ऐश्वर्याद्भ्रंशितस्यापि विप्रव्या
जेन विष्णुना ॥ श्रियं जिहीर्षतेंद्रस्य विष्णवे द्विजरूपिणे ॥ जानन्नपि महीं प्रादाद्वार्यमा
णोपि दैत्यराट् ॥ २३ ॥ जीवता ब्राह्मणार्थाय कोऽन्वर्थः क्षत्रबंधुना ॥ देहेन पतमानेन ने
हता विपुलं यशः ॥ २४ ॥ इत्युदारमतिः प्राह कृष्णार्जुनवृकोदरान् ॥ हे विप्रा व्रियतां कामो द
दाम्यात्मशिरोपि वः ॥ २५ ॥ श्रीभगवानुवाच ॥ युद्धं नो देहि राजेंद्र द्वंद्वशो यदि मन्यसे ॥ युद्धार्थि
नो वयं प्राप्ता राजन्या नान्यकांक्षिणः ॥ २६ ॥
ते विश्व इति ॥ शुक्रेणावार्यमाणोपि ॥ अयं विष्णुरिति जानन्नपि ॥ २३ ॥ पतमाने न पतता क्षत्रबंधुना दे
हेन ब्राह्मणार्थाय विपुलं यशो नेहमानेन ॥ असंपादयता कोऽन्वर्थः ॥ २४ ॥ एवं निश्चित्याह ॥ हे विप्रा इति
८८

उनं१

तन्निर्दंकामयामहइतिविशेषोनिर्दिश्यतां ॥ अन्यथायस्यपुत्रादेर्वियोगोदुःसहः ॥ कथंदेयः ॥ तथाराजमंकिरीयद्यदे
यंषतत्तद्भिक्षुभ्यः कथंदेयं ॥ तथातिरस्यरत्नाभरणादियोग्यंकथंपरस्मैदेयमितिचिंतनआह ॥ किंदुर्मर्षमित्यादि
अत्रदृष्टांतत्वेनार्थांतरमाहुः ॥ किमकार्यमिति ॥ तथासाधूनामकार्यंनास्ति ॥ तथातितिक्षूणांदुर्मर्षंदुःसहंनास्ति
वदान्यानामत्युदाराणामदेयंनास्ति ॥ समदर्शिनांपरश्चनास्ति ॥ नतःकिंविशेषःनिर्देशेनेत्यर्थः ॥ १८ ॥ किंच ॥ अर्थिनोमु
फलादिवत्प्राणत्रपिनवंचनीयाइत्याशयेनाहुः ॥ योनित्येनेति ॥ नाचिनोतिनसंपादयति वाच्यःनिंद्यः ॥ १९ ॥ [illegible]

किंदुर्मर्षंतितिक्षूणांकिमकार्यमसाधुभिः ॥ किमदेयंवदान्यानांकःपरःसमदर्शिनां ॥ १८ ॥ योऽनि
त्येनशरीरेणसतांगेयंयशोध्रुवं ॥ नाचिनोतिस्वयंकल्पःसवाच्यःशोच्यएवसः ॥ १९ ॥ हरिश्चंद्रोरं
तिदेवउंछवृत्तिःशिबिर्बलिः ॥ व्याधःकपोतोबहवोह्यध्रुवेणध्रुवंगताः ॥ २० ॥

नान्नपानायहरिश्चंद्रोभार्यात्मजादिसर्वंविक्रीयस्वयंचांडालतांप्राप्तोप्यनृणीःसहायोध्यावासिभिर्जनैः
स्वर्गंगतः ॥ रंतिदेवःसकुटुंबोऽष्टचत्वारिंशद्दिनान्यलब्धोदकोपिकथंचिल्लब्धमन्नोदकादिमर्थिभ्योदत्वाब्रह्मलो
कंगतः ॥ शिबिःशरणागतकपोतरक्षणायस्वमांसंसेनायदत्वादिवंगतः ॥ बलिःसर्वस्वंब्राह्मणवेषधारिणेहर
येदत्वात्मानमेवात्मसात्कार ॥ कपोतश्चातिथयेव्याधायकपोत्यासहआत्ममांसंदत्वाविमानेनदिवंगतः ॥ व्याधस्तु
तयोःसत्त्ववीक्ष्यस्वयमपिनिर्विण्णोमहाप्रस्थानेवनाग्निदग्धदेहोनिष्कल्मषोदिवमारुरोह ॥ एवमन्येचब
न्यै

भा० द० उ० अंसकट्याद्यीनुपेत्य शीघ्रमन्युर्ययोस्तयोर्गजयोरर्कशाखाभ्यासमं युध्यतोर्दंतिनोस्तेयथा चूर्णीभवतस्तद्वत् ॥ ३५ ॥ अ
७२ पिष्ट्यं चूर्णी चक्रतुः ॥ ३६ ॥ शिक्षा अभ्यासः बलसत्वं ओजः प्रभावः समानितानियेस्तयोः ॥ ३७ ॥ जन्मशकलरूपं मरेतिः

तेवै गदे भुजजवेन निपात्यमाने अन्योन्यतोऽंसकटिपादकरोरुजत्रून् ॥ चूर्णीवभवतु रूपेत्यय
थार्कशाखे संयुध्यतोर्द्विरदयोरिव दीप्तमन्व्योः ॥ ३४ ॥ इत्थं तयोः प्रहतयोर्गदयोर्नृवीरौ क्रुद्धौ स्व
मुष्टिभिरयः स्पर्शैरपिष्टां ॥ शब्दस्तयोः प्रहरतोरिभयोरिवासीन्निर्घातवज्रपरुषस्तलताड
नोत्थः ॥ ३५ ॥ तयोरेवं प्रहरतोः समशिक्षाबलौजसोः ॥ निर्विशेषमभूद्युद्धमक्षीणजवयोर्नृप ॥ ३
एवं तयोर्महाराज युध्यतोः सप्तविंशतिः ॥ दिनानि निरगंस्तत्र सुहृद्वन्निशि तिष्ठतोः ॥ ३८ ॥ एक
दा मातुलेयं वै प्राह राजन्वृकोदरः ॥ न शक्तोऽहं जरासंधं निर्जेतुं युधि माधव ॥ ३९ ॥ शत्रोर्जन्ममृ
८१ तौ विद्वान्जीवितं च जराकृतं ॥ पार्थमाप्याययन्स्वेन तेजसा चिन्तयद्धरिः ॥ ४० ॥ स चिंत्यारिवधो
पायं भीमस्यामोघदर्शनः ॥ दर्शयामास विटपं पाटयन्निव संज्ञया ॥ ४१ ॥
पुनः शकलीभावः ॥ तं विद्वान्जानन् जरानाम राक्षसी तत्कृतं ॥ अचिंतयत् ॥ कथमसौ शकली भवेदिति ॥ ४० ॥ विशाद
शाखां करेण गृहीत्वा हरिः ॥ भीमस्य यथाहं विटपं पाटयामि ॥ तथा त्वमेनं विपाटयेति संज्ञया संकेतेनारिवधोपायं द ७२

राजन्यतामेवप्रपंचयति ॥ असाविति ॥ २७ ॥ २८ ॥ यतोमद्भयात्समुद्रंशरणंगतः ॥ २९ ॥ वयसाप्यतुल्यः ॥ नातिसत्वः न
अतिवलश्च ॥ नचदेहेनमयासमः ॥ अतोऽर्जुनोयोद्धानभवेत् ॥ यतोममतुल्यवलः ॥ ३० ॥ प्रादायदत्वाइत्यर्थः ॥ ३१ ॥ स

असौवृकोदरःपार्थस्तस्यभ्राताऽर्जुनःस्त्वयं ॥ अनयोर्मातुलेयंमांकृष्णंजानीहितेरिपुं ॥ २७ ॥ एवमावेदितो
राजाजहासोच्चैःसमागधः ॥ आहचामर्षितोमंदायुद्धंतर्हिददामिवः ॥ २८ ॥ नत्वयाभीरुणायोत्स्ये
५३ युधिविक्लवचेतसा ॥ मथुरांस्वपुरींत्यक्त्वासमुद्रंशरणंगतः ॥ २९ ॥ अयंतुवयसातुल्योनातिसत्वो
नमेसमः ॥ अर्जुनोनभवेद्योद्धाभीमस्तुल्यवलोमम ॥ ३० ॥ इत्युक्त्वाभीमसेनायप्रादायमह
तींगदां ॥ द्वितीयांस्वयमादायनिर्जगामपुराद्वहिः ॥ ३१ ॥ ततःसमेखलेवीरौसंयुक्ताावितरेत
रौ ॥ जघ्नतुर्वज्रकल्पाभ्यांगदाभ्यांरणदुर्मदौ ॥ ३२ ॥ मंडलानिविचित्राणिसव्यंदक्षिणमेवच ॥
चरतोःशुशुभेयुद्धंनटयोरिवरंगिणोः ॥ ३३ ॥ ततश्चटचटाशब्दोवज्रनिष्पेषसन्निभः ॥ गदयोःक्षिप्तयो
राजन्दंतयोरिवदंतिनोः ॥ ३४ ॥

मेखलेसुबद्धांगले ॥ ३२ ॥ मंडलानिगदायुद्धगतिभेदान् ॥ सव्यंदक्षिणं
चयथाभवतितथा ॥ रंगिणोः रंगगतयोः नटयोरिवेतिनिर्भयत्वेनोपमा ॥ ३३ ॥ चटचटेतिशब्दोगदयोःपरस्पराघातश
ब्दानुकरणं वज्रस्यनिष्पेषः पातस्तत्सदृशः ॥ उद्धतौदंतिनोः ॥
दंतघातशब्दइवशुशुभे ॥ ३४ ॥

भा०द०उ० क्षुधा क्षामाः कृशाः संरोधेन परिकर्षिताः पीडिताः ॥ २ ॥ ३ ॥ ४ ॥ आजानु आजानुमानो वरमणिः कौस्तुभो यस्या
९० साग्रीवा यस्य तं निवीतं कंठलंबितया व्याप्तं पिबंत इवेत्यादिना हरेः पादयोः प्रणेमुरित्युत्तरेणान्वयः ॥ ५ ॥ रंभतः परि

क्षुत्क्षामाः शुष्कवदनाः संरोधपरिकर्षिताः ॥ ददृशुस्ते घनश्यामं पीतकौशेयवाससं ॥ २ ॥ श्रीवत्सां
कं चतुर्बाहुं पद्मगर्भारुणेक्षणं ॥ चारुप्रसन्नवदनं स्फुरन्मकरकुंडलं ॥ ३ ॥ पद्महस्तं गदाशंख
रथांगैरुपलक्षितं ॥ किरीटहारकटककटिसूत्रांगदांचितं ॥ ४ ॥ भ्राजद्वरमणिग्रीवं निवीतं वनमाल
या ॥ पिबंत इव चक्षुर्भ्यां लिहंत इव जिह्वया ॥ ५ ॥ जिघ्रंत इव नासाभ्यां रंभंत इव बाहुभिः ॥ प्रणेमुर्ह
तपाप्मानो मूर्द्धभिः पादयोर्हरेः ॥ ६ ॥ कृष्णसंदर्शनाह्लादध्वस्तसंरोधनक्लमाः ॥ प्रशशंसुर्हृषी
केशं गीर्भिः प्रांजलयो नृपाः ॥ ७ ॥ राजान ऊचुः ॥ नमस्ते देवदेवेश प्रपन्नार्तिहराव्यय ॥ प्रपन्नान्पा
हि नः कृष्ण निर्विण्णान्घोरसंसृतेः ॥ ८ ॥ नैनं नाथानुसूयामो मागधं मधुसूदन ॥ अनुग्रहं यद्भवतो रा
ज्ञो राज्यच्युतिर्विभो ॥ ९ ॥

रंभमाणा इव ॥ ६ ॥ कृष्णसंदर्शनाह्लादेन ध्वस्तः संरोधनक्लमो येषां ते ॥ ७ ॥ संरोधात्तरत्तिमान् अस्मान् घोरायाः संसृतेः पाहि मो
चय ॥ ८ ॥ ननु भवतो जरासंधासूया विद्यते इह मुत्रा भोगा [illegible] सक्तास्त्वकेषं संसृतेर्मोचनीया इत्याशंक्य संप्रति न वयं त
थाभूता इत्याहुः नैनमित्यष्टभिः हे नाथ वयं एनं नासूयामः न दोषदृष्ट्या पश्यामः कुतः इत्यत आहुः अनुग्रह इ ९०

६२॥ ६३॥ एकैकः पादादियंयोस्तेशकले ॥ ६४॥ ६५॥ दुर्वृत्तत्वात् ॥ असौ हतः ॥ न राज्यादिलालसैरेतिदर्शयन्त्रा
ह सहदेवमिति ॥ ६६॥ इति दशमे द्विसप्ततितमः ॥ ७२॥ ततस्त्रिसप्ततितमे मोचयित्वान्पान्हरिः ॥ राजोहृभोगैः

तद्विज्ञायमहासत्वोभीमःप्रहरतांवरः ॥ गृहीत्वापादयोःशत्रुंपातयामासभूतले ॥ ६२॥ एकंपादं
पदाक्रम्यदोर्भ्यामन्यंप्रगृह्यसः ॥ गुदतःपाटयामासशाखामिवमहागजः ॥ ६३॥ एकपादोरुवृ
षणकटिपृष्ठस्तनांसके ॥ एकबाह्वक्षिभ्रूकर्णेशकलेददृशुःप्रजाः ॥ ६४॥ हाहाकारोमहानासी
न्निहतेमगधेश्वरे ॥ पूजयामासतुर्भीमंपरिरभ्यजयाच्युतौ ॥ ६५॥ सहदेवंतत्तनयंभगवान्भूतभा
वनः ॥ अभ्यषिंचदमेयात्मामगधानांपतिंविभुः ॥ ६६॥ मोचयामासराजन्यान्संरुद्धामागधे
नये ॥ ६७॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे जरासंधवधो द्विसप्ततितमोऽध्यायः ॥
७२॥ श्रीशुक उवाच ॥ अयुतेद्वेशतान्यष्टौलीलयायुधिनिर्जिताः ॥ तेनिर्गतागिरिद्रोण्यांम
लिनामलवाससः ॥ १॥

स्थानुद्देशान्प्रस्थाप्यपुनरागमत् ॥ अत्युन्नजरासंधवधानंतदुदुभूपतीन् ॥ विमोचितकृपयाकस्मोनि
जरूपमदर्शयत् ॥ येनिर्जिताजरासंधेननिरुद्धाश्चगिरिद्रोण्यांते ततोनिर्गताःसंतोघनश्यामंददृशुरित्यु

अतएव अथो नंतरं मृगतृष्णासदृशं राज्यं शश्वत्पतता प्रतिक्षणं क्षीयमाणेन तथा रुजां रोगाणां भुवा जन्मक्षेत्रेण
देहेनोपासितव्यं॥ न स्पृहयामहे॥ प्रेत्य परलोके च क्रियाफलं स्वर्गादिफलभोगं उपासितव्यं न स्पृहामहे कथंभूतं
कर्णयोरोचनं॥ रुचिजनकमात्रं॥ तत्र गंतुर्यस्य स्पर्द्धाधिनपगमेन सुखाभावादित्यर्थः॥१४॥ यद्येवं भक्तानां यत्तर्हि मम

अथो न राज्यं मृगतृष्णिरूपितं देवेश शश्वत्पतता रुजां भुवा॥ उपासितव्यं स्पृहयामहे विभो क्रियाफ
लं प्रेत्य च कर्णरोचनं॥१४॥ तन्नः समादिशोपायं येन ते चरणाब्जयोः॥ स्मृतिर्यथा न विरमेदपि संसर
तामिह॥१५॥ कृष्णाय वासुदेवाय हरये परमात्मने॥ प्रणतक्लेशनाशाय गोविंदाय नमो नमः॥१६॥
श्रीशुक उवाच॥ संस्तूयमानो भगवान् राजभिर्मुक्तबंधनैः॥ तानाह करुणस्तात शरण्यः श्लक्ष्णया गि
रा॥१७॥ श्रीभगवानुवाच॥ अद्यप्रभृति वो भूपा मय्यात्मन्यखिलेश्वरे॥ सुदृढा जायते भक्तिर्बाढ
माशंसितं यथा॥१८॥

चरणयोः स्मरंतः॥ ततोऽनायासेन मुक्तिर्भविष्यति किमदपेक्षयेति चेदत आहुः॥ तन्न इति॥ त्वच्चरणस्मृतिरपि त्व
त्प्रसादफलमेवेत्यर्थः॥१५॥१६॥ श्लक्ष्णया मंजुलया॥१७॥ यथा भवद्भिराशंसितं तथा बाढमिति निश्चितं
वो मयि भक्तिर्जायते जायतामित्यर्थः॥१८॥

एतदेवव्यतिरेकेणोपपादयंति ॥ राज्यैश्वर्येति ॥ राज्यैश्वर्याभ्यां मदस्तेनउन्मत्तः ॥ अचंचलो नित्याश्चचलाश्च संपदो
मन्यते ॥ यद्वा ॥ अनित्या सती अचला शाश्वतीं मन्यते ॥१०॥ किंच ॥ अवस्तु वस्तुतया पश्यतीत्याह ॥ मृगतृष्णामिति वैकारि
कीं सृष्ट्यादिकारणमापन्नां ॥ अयुक्ताः ॥ अविवेकिनः ॥११॥ राज्यस्य योगवियोगयोरनर्थावहत्वमस्माभिरेव दृष्टमित्या

राज्यैश्वर्यमदोन्मत्तो न श्रेयो विंदते नृपः ॥ तन्मायामोहितो नित्या मन्यते संपदोऽचलाः ॥१०॥ मृग
तृष्णां यथा बाला मन्यंत उदकाशयं ॥ एवं वैकारिकीं मायामयुक्ता वस्तु चक्षते ॥११॥ वयं पुरा श्रीमद
नष्टदृष्टयो जिगीषयास्या इतरेतरस्पृधः ॥ घ्नंतः प्रजाः स्वा अतिनिर्घृणाः प्रभो मृत्युं पुरस्त्वाविगणय्य दु
र्मदाः ॥१२॥ त एव कृष्णद्य गभीररंहसा दुरंतवीर्येण विचालिताः श्रियः ॥ कालेन तन्वा भवतोऽनु
कंपया विनष्टदर्पाश्चरणौ स्मरामहे ॥१३॥

हुः ॥ वयमिति द्वाभ्यां ॥ श्रीमदेन नष्टा दृष्टिर्येषां ते ॥ अस्याः पृथि
व्याः इतरेतरस्पृधः परस्परस्पर्द्धमानाः ॥ पुरः पुरतस्त्वां मृत्युं अविगणय्य पुरा ये दुर्मदा वयं ॥१२॥ हे कृष्ण त एव
वयमद्य विनष्टदर्पास्ते चरणौ स्मरामहे ॥ कथंभूताः ॥ भवतस्तन्वा मूर्त्या कालेन श्रियो विचालिताः
विभ्रंशिताः ॥ अतो राज्यच्युतिर्महदनुग्रह [illegible] एवेत्यर्थः ॥१३॥ ॥ ६६ ॥ ss ॥ त्यर्थः

भा०द०उ० स्त्रियश्चतेषामज्जनकर्मणि अभ्यंगस्नानादौ नियुंक्तः॥२४॥२५सुस्नातान्॥सम्यगलंकृतान्॥गोपेश्च
६२ युक्तान्॥वरेणान्नेनभोजयित्वापुनस्तेषांसपर्य्यांसहदेवेनकारयामास॥२६॥ग्रहश्चंद्रादयोयथा॥२७॥

श्रीशुकउवाच॥इत्यादिश्यनृपान्कृष्णोभगवान्भुवनेश्वरः॥तेषांनियुंक्तपुरुषान्स्त्रि
कास्या२ योमज्जनकर्मणि॥२४॥सपर्य्यांमाससहदेवेनभारत॥नरदेवोचितैर्वस्त्रैर्भूषणैःस्र
ग्विलेपनैः॥२५॥भोजयित्वावरान्नेनसुस्नातान्समलंकृतान्॥भोगैश्चविविधैर्युक्तांस्तां
बूलादिनृपोचितैः॥२६॥तेपूजितामुकुंदेनराजानोमृष्टकुंडलाः॥विरेजुर्मोचिताःक्ले
शात्प्रावृडंतेयथाग्रहाः॥२७॥रथान्सदश्वानारोप्यमणिकांचनभूषितान्॥प्रीणय्यसुनृ
तैर्वाक्यैःस्वदेशान्प्रत्ययापयत्॥२८॥तएवंमोचिताःकृच्छ्रात्कृष्णेनसुमहात्मना॥ययुस्त
मेवध्यायंतःकृतानिचजगत्पतेः॥२९॥जगदुःप्रकृतिभ्यस्तेमहापुरुषचेष्टितं॥यथान्वशासद्भ
गवांस्तथाचक्रुरतंद्रिताः॥३०॥जरासंधंघातयित्वाभीमसेनेनकेशवः॥पार्थाभ्यांसंयुतःप्रा
यात्सहदेवेनपूजितः॥३१॥

प्रीणय्यनंदयित्वा॥२८॥२९॥जगदुःऊचुः॥३०॥३१रामरामरामराम॥रामराम॥रामरामरामराम ६२

हे भूपाः मद्भजनमेव कर्त्तव्यमितिभवद्भिर्व्यवसितं संकल्पितं दिष्ट्या भद्रं ॥ भवद्भिरुक्तं च सत्यमेवेत्याह ॥ भवंत इति
श्री ऐश्वर्यं च ताभ्यां मदस्तेनोन्माद उन्नद्धः स्वैराचार इत्यर्थः पश्यपश्यामीति ॥ १९ ॥ तदेवाह ॥ हैहय इति ॥ हैह
यः ॥ कार्त्तवीर्यश्चक्रवर्त्ती नरेश्वरः पितुः कामधेनुहरणात् परशुरामेणास्य पुत्रो हतः ॥ नहुषो देवेन्द्रतां प्राप्तः उन्मत्तः स
दिष्ट्या व्यवसितं भूपा भवंत ऋत भाषिणः ॥ श्रियैश्वर्यमदोन्नाहं पश्य उन्मादकं नृणां ॥ १९ ॥ हैहयो
नहुषो वेणो रावणो नरकोऽपरे ॥ श्रीमदाद्भ्रंशिताः स्थानाद्देवदैत्यानरेश्वराः ॥ २० ॥ भवंत एतद्विज्ञा
य देहाद्युत्पाद्यमंतवत् ॥ मां यजंतोऽध्वरैर्युक्ताः प्रजा धर्मेण रक्षथ ॥ २१ ॥ संतन्वंतः प्रजातंतून्सु
खं दुःखं भवाभवौ ॥ प्राप्तं प्राप्तं च सेवंतो मच्चित्ता विचरिष्यथ ॥ २२ ॥ उदासीनाश्च देहादावात्मारा
मा धृतव्रताः ॥ मय्यावेश्य मनः सम्यङ्मामंते ब्रह्म यास्यथ ॥ २३ ॥
द्विजसंगाय ब्राह्मणान् शिबिकां वाहयन् ॥ तैरेव त
तो भ्रंशितोऽजगरत्वमवाप ॥ वेणः पुनर्मत्तो ब्राह्मणानधिपंक्तरे वहुः हतेन हतः रावणो राक्षसेश्वरः सीतामभिल
षन् राघवेण हतः ॥ नरको दैत्येश्वरो दितिकुंडलाद्याहरणान्मयैव हतः ॥ अपरेऽपि श्रीमदात्स्थानाद्भ्रंशिताः ॥ २०
यदुत्पाद्यं देहादि तदंतवत् ॥ विज्ञाय युक्ताः अप्रमत्ताः रक्षथ रक्षिष्यथ ॥ २१ ॥ प्रजातंतून् पुत्रादि संततीः ॥
प्राप्तं प्राप्तं समत्वेन सेवमानाः ॥ २२ ॥ २३ ॥ रामराम रामराम ॥ ॥ ८८ ॥ ॥ रामराम ॥

भा० टी० उ० सभवान्परमेश्वरोऽस्माकमनुशासनं धत्ते॥ तदत्यंतविडंवनमनुकरणं॥ त्वत्तेजो हानिप्रसंगादित्यर्थः॥
९३ ॥ अथवा त्वपरिपूर्णस्याज्ञापनाज्ञो धारणाभ्यां नूतेजहानिरुद्धी॥ अतः कृपयासंगच्छेत इत्याह॥ न ह्येकस्या
द्वितीयस्येति॥ समानासमानरहितस्य॥ ब्रह्मणस्त्वबोभयंमाया॥ परमात्मेन त्त्वबोभयंमाया पूरत्मने इति स मा ३
र्वज्ञो यनियंतुस्त्वनियम्यत्वं स्तुतरां न वास्तवः॥ अतः परमात्मग्रहार्थैरेतैः कर्मभिस्त्वत्तेजो न वर्द्धते॥ न ह्ये
सभवानरविंदाक्षो दीनानामीशमानिनां॥ धत्तेनुशासनं भूमंस्तदत्यंतविडंवनं॥ ३॥ न ह्येक
स्याद्वितीयस्य ब्रह्मणः परमात्मनः॥ कर्मभिर्वर्द्धते तेजो ह्रसते च यथा रवेः॥ ४॥ न वै ते ऽजित भक्ता ते २
नाममाहमितिमाधव॥ त्वं तवेति च नानाधीः पशूनामिव वैकृती॥ ५॥ श्रीशुक उवाच॥ इत्युक्त्वा
यज्ञिये काले वव्रे युक्तान्स ऋत्विजः॥ कृष्णानुमोदितः पार्थो ब्राह्मणान्ब्रह्मवादिनः॥ ६॥
सति रवे रिवोदयादिकर्मभिरित्यर्थः॥ तथा च श्रुतिः॥ न कर्मणा वर्द्धते नो कनीयानिति॥ ननु एवमप्यहं परमेश्व
रः॥ ममेयं कर्मा योग्यमिति मनसि कथं न भवेदत आह॥ न वै इति॥ हे अजित ते त्तव भक्तानामेव ताव [illegible] ह्येयं
नानाधीभेदमतिर्नास्ति॥ यथा पशूनामस्तानां वैकृती शरीरविषया त्तव नास्तीति किं पुनर्वक्तव्यमित्यर्थः॥ ५॥ य ॥वै
ज्ञिये यज्ञोचिते वसंतादिसमये काले युक्तान्॥ अभियुक्तान्स युधिष्ठिर ऋत्विजो होतृप्रमुखान वव्रे वरत्त्ववा ॥९३॥

खांडवप्रस्थं इंद्रप्रस्थं ॥ ३२ ॥ शांतं मृतं प्राप्तमनोरथो बभूव ॥ ३३ ॥ ३४ ॥ ३५ ॥ इति दशमे त्रिसप्ततितमः ॥ ७३ ॥
चतुःसप्ततितमे राजसूयक्रिया हरेः ॥ अग्रपूजाप्रसंगेन चैद्यघातादि वर्ण्यते ॥ १ ॥ राजसूयमुखे हत्वा ज-
रासंधं तदनंतरे ॥ चैद्यं तदंते कुर्वंत बीजं कलिमिवावपत् ॥ २ ॥ कृष्णस्य चानुभावमिति ॥ चकारात्तेस्य स्वाज्ञा-

गतास्ते खांडवप्रस्थं शंखान् दध्मुर्जितारयः ॥ हर्षयंतः स्वसुहृदो दुर्हृदां चासुखावहाः ॥ ३२ ॥ त-
च्छ्रुत्वा प्रीतमनस इंद्रप्रस्थनिवासिनः ॥ मेनिरे मागधं शांतं राजा चाप्तमनोरथः ॥ ३३ ॥ अभिवंद्या-
थ राजानं भीमार्जुनजनार्दनाः ॥ सर्वमाश्रावयंचक्रुरात्मना यदनुष्ठितम् ॥ ३४ ॥ निशम्य धर्मराज-
स्तत्केशवेनानुकंपितं ॥ आनंदाश्रुकलां मुंचन् प्रेम्णा नोवाच किंचन ॥ ३५ ॥ इति श्रीमद्भागव-
ते महापुराणे दशमस्कंधे जरासंधवधस्त्रिसप्ततितमोध्यायः ॥ ७३ ॥ श्रीशुक उवाच ॥ एवं युधिष्ठिरो
राजा जरासंधवधं विभोः ॥ कृष्णस्य चानुभावं तं श्रुत्वा प्रीतस्तमब्रवीत् ॥ १ ॥ युधिष्ठिर उवाच ॥ ये
स्युस्त्रैलोक्यगुरवः सर्वे लोकमहेश्वराः ॥ वहंति दुर्लभं लब्ध्वा शिरसैवानुशासनम् ॥ २ ॥

नुविधायित्वं चालक्ष्येत्यर्थः ॥ १ ॥ तदाह ये स्युरिति ॥ ये त्रैलोक्यस्यापि गुरवः स्युः सनकादयः सर्वे लोकपाला-
श्च ते शिरसैव तवानुशासनं वहंतीति ॥ दुर्लभं लब्ध्वेति ॥ भाग्येन एतल्लब्धमिति वर्द्धमानेनेत्यर्थः ॥ २ ॥

भा०द०७४ येचराज्ञादयः॥समाहूतास्तत्रसमीयुःस्म॥तेसर्वेहकृष्णभक्तस्यराज्ञोराजसूयमविस्मिताःसंतःसूपप
९४ न्नंसुसंपन्नंमेनिरेइत्यन्वयः॥१५॥याजकाऋत्विजः॥१६॥सुत्येहनिसोमाभिसवदिने॥१७॥अथान्या

राजानश्चसमाहूताराजपत्न्यश्चसर्वशः॥राजसूयंसमीयुःस्मराज्ञःपांडुसुतस्यवै॥मेनिरेकृ
ष्णभक्तस्यसूपपन्नमविस्मिताः॥१५॥अयाजयन्महाराजंयाजकादेववर्चसः॥राजसूयेन
विधिवत्प्राचेतसमिवामराः॥१६॥सुत्येहन्यवनिपालोयाजकान्सदसस्पतीन्॥अपूजयन्म
हाभागान्यथावत्सुसमाहितः॥१७॥सदस्याग्र्यार्हणार्हंवैविमृशंतःसभासदः॥नाध्यगच्छ
न्ननैकांत्यात्सहदेवस्तदाब्रवीत्॥१८॥अर्हतिह्यच्युतःश्रेष्ठ्यंभगवान्सात्वतांपतिः॥एष
वैदेवताःसर्वादेशकालधनादयः॥१९॥यदात्मकमिदंविश्वंक्रतवश्चयदात्मकाः॥
अग्निराहुतयोमंत्राःसांख्यंयोगश्चयत्परः॥२०॥

हणम्॥अग्रपूजातस्यार्हंयोग्यम्॥अनैकां
त्यात्॥योग्यानांबहुत्वेनैकस्यानिश्चयात्॥१८॥१९॥सांख्यंज्ञानंयोगःउपासना॥२०॥ ss॥

९४

तानारद द्वैपायन इति त्रिभिः ॥७॥८॥९॥ अकृतव्रणं स्तान् ॥ एतान् ऋत्विग्पदे ह्वादिभेदेन वव्रे ॥१०॥ अन्ये चोपहूता यत्र दि
दृक्षवस्तत्रेयुरित्यन्वयः ॥११॥ देवयजनं ॥ यज्ञभूमिम् ॥ कृष्ट्वा कर्षणादिभिः ॥ संशोध्य दीक्षयांचक्रिरे ॥ दीक्षासंस्कारयुक्तम्

द्वैपायनो भरद्वाजः सुमन्तुर्गौतमोऽसितः ॥ वसिष्ठश्च्यवनः कण्वो मैत्रेयः कवषस्त्रितः ॥७॥ विश्वामित्रो वाम
देवः सुमतिर्जैमिनिः क्रतुः ॥ पैलः पराशरो गर्गो वैशंपायन एव च ॥८॥ अथर्वा कश्यपो धौम्यो रामो
भार्गव आसुरिः ॥ वीतिहोत्रो मधुच्छन्दा वीरसेनोऽकृतव्रणः ॥९॥ उपहूतास्तथा चान्ये द्रोणभीष्मकृपा
दयः ॥ धृतराष्ट्रः सहसुतो विदुरश्च महामतिः ॥१०॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा यत्र दिदृक्षवः ॥ त
त्रेयुः सर्वराजानो राज्ञां प्रकृतयो नृप ॥११॥ ततस्ते देवयजनं ब्राह्मणाः स्वर्णलांगलैः ॥ कृष्ट्वा तत्र यथा
म्नायं दीक्षयांचक्रिरे नृपं ॥१२॥ हैमाः किलोपस्करणा वरुणस्य यथा पुरा ॥ इन्द्रादयो लोकपाला
विरिंचिभवसंयुताः ॥१३॥ सगणाः सिद्धगंधर्वा विद्याधरमहोरगाः ॥ मुनयो यक्षरक्षांसि ख
गकिन्नरचारणाः ॥१४॥

कुर्वन् ॥१२॥ उपस्करणाः उपस्कराः ॥ वरुणस्य राजसूये यथा आसन्निति शेषः ॥१३॥ किंच ॥ इन्द्रादय
इति ॥ ये इन्द्रादयो देवगणाः ॥१४॥ राम राम राम राम राम ॥ ॥

मू: २ तत्पादावनेनिज्यापः शिरसा लोकपावनीः॥ सभार्यः सानुगामात्यः सकुटुंबो वहन्मुदा॥२७॥

भा० द० उ० ९५ श्रीकृष्णानुभाववित् सहदेव इत्युक्त्वा तूष्णीमभूत॥२४॥ द्विजैरितं साधुसाध्विति घोषं श्रुत्वा ह्या ईसमभिप्रायं॥२६॥२७॥

इत्युक्त्वा सहदेवोऽभूत्तूष्णीं कृष्णानुभाववित्॥ तच्छ्रुत्वा तुष्टुवुः सर्वे साधु साध्विति सत्तमाः॥२५॥ श्रु

त्वा द्विजेरितं राजा ज्ञात्वा हार्दं सभासदां॥ समर्हयत् हृषीकेशं प्रीतः प्रणयविह्वलः॥२६॥ वासोभिः

पीतकौशेयैर्भूषणैश्च महाधनैः॥ अर्हयित्वाश्रुपूर्णाक्षो नाशकत्समवेक्षितुम्॥२७॥ इत्थं सभा

जितं वीक्ष्य सर्वे प्रांजलयो जनाः॥ नमो जयेति नेमुस्तं निपेतुः पुष्पवृष्टयः॥२८॥ इत्थं निशम्य

दमघोषसुतः स्वपीठादुत्थाय कृष्णगुणवर्णनजातमन्युः॥ उत्क्षिप्य बाहुमिदमाह सदस्य

मर्षी॥ संश्रावयन्भगवते परुषाण्यभीतः॥३०॥ ईशो दुरत्ययः काल इति सत्यवती श्रुतिः॥ वृ

द्धानामपि यद्बुद्धिर्बालवाक्यैर्विभिद्यते॥३१॥ यूयं पात्रविदां श्रेष्ठा मा मध्वं बालभाषितं॥ सद

सस्पतयः सर्वे कृष्णो यत्संमतो र्हणे॥३२॥ तपोविद्याव्रतधरान्ज्ञानविध्वस्तकल्मषान्॥ परमर्षी

न्ब्रह्मनिष्ठांल्लोकपालैश्च पूजितान्॥३३॥

२८॥२९॥३०॥३१॥ हे सदसस्पतयः सर्वे बालस्य भाषितं मा मन्यध्वं मा ज्ञानीत॥ मा ग्रस्कीत॥ किं तर्हि॥ यतः कृ

कोऽहंसममतसमत॥३२॥३३॥

९५

ननु सांख्यं केवलं परं योगः सविशेषणं परत्वं तत्राह ॥ एक एवाद्वितीयो ऽसौ ॥ अतः सांख्यस्यैव तत्परत्वं युक्तं दिशे
षणभूतस्य सर्वप्रपंचस्य तन्मयत्वात् ॥ सविशेषणविषयस्य योगस्यापि युक्तमद्वितीयपरत्वमित्याह ॥ ऐतदा
त्म्यमिति ॥ एष श्रीकृष्णः आत्मा यस्य तत् ॥ एतदात्मा तस्य भावः ऐतदात्म्यं भवितव्यमेव भावनिर्देशः ॥ ऐतदात्म्यमिदं स

एक एवाद्वितीयो ऽभूदैतदात्म्यमिदं जगत् ॥ आत्मनात्माश्रयः सभ्याः सृजत्यवति हंत्यजः ॥ २१ ॥ वि
विधानीह कर्माणि जनयन्यदवेक्षया ॥ ईहते यदयं सर्वः श्रेयो धर्मादिलक्षणं ॥ २२ ॥ तस्मात्कृ
ष्णाय महते दीयतां परमार्हणं ॥ एवं चेत्सर्वभूतानामात्मनश्चार्हणं भवेत् ॥ २३ ॥ सर्वभूतात्मभू
ताय कृष्णायानन्यदर्शिने ॥ देयं शांताय पूर्णाय दत्तस्यानंत्यमिछता ॥ २४ ॥

र्वमिति श्रुतेः ॥ अत्र हेतुः ॥ आत्मनेति हे सभ्याः ॥ आत्माश्रयः ॥ अनन्यनिरपेक्षः स्वयमजः ॥ इदं जगत्सृजति ॥ अवति हं
ति चेति ॥ २१ ॥ किंच विविधानीति ॥ यस्यावेक्षया ॥ अनुग्रहेण विविधानि कर्माणि ॥ तपोयोगादीनि जनयन् कुर्वन् ॥ यत्त
यस्मादयं सर्वो ऽपि जनो धर्मादिलक्षणं श्रेयः ॥ ईहते साधयति ॥ कर्माणि च यदधीनानीत्यर्थः ॥ २२ ॥ २३ ॥ आत्मना क्रि
यमाणमर्हणमात्मनः कथं स्यात्तत्राह ॥ सर्वभूतानामात्मभूताय ॥ अनन्यदर्शिने निरस्तभेदमतये ॥ २४ ॥ ॥ ६६

भा० द० ३
६६

तथा

किंच ये राजानो दुष्टानुद्धास्यंति ते तदर्थं कीकटादिदेशानप्याश्रयंति ॥ एते तु ब्रह्मर्षिसेवितानेव देशाना
श्रित्य अब्रह्मवर्चसं समुद्रं दुर्गमपि हित्वा हापयित्वेत्यर्थः ॥ बाधंते ते यादस्य वः प्रजाः ताश्च अयमर्थः वेदस्तद्धर्मा
भियोगो ब्रह्मवर्चसं समुद्रं मुद्रा लिंगं तत्सहितं समुद्रं वेदविरुद्धलिंगधारिणं पाषंडमित्यर्थः ॥ तत्रा

ब्रह्मर्षिसेवितान्देशान्हित्वैतेऽब्रह्मवर्चसः ॥ समुद्रं दुर्गमाश्रित्य बाधंते दस्यवः प्रजाः ॥ ३७ ॥ एव
मादीन्यभद्राणि बभाषे नष्टमंगलः ॥ नोवाच किंचिद्भगवान्यथा सिंहः शिवारुतं ॥ ३८ ॥ भगवन्नि
दनं श्रुत्वा दुःसहं तत्सभासदः ॥ कर्णौ पिधाय निर्जग्मुः शपंतश्चेदिपं रुषा ॥ ३९ ॥ निंदां भगव
तः शृण्वंस्तत्परस्य जनस्य वा ॥ ततो नापैति यः सोऽपि यात्यधः सुकृताच्च्युतः ॥ ४० ॥ ततः पांडुसुताः क्रु
द्धा मत्स्यकैकेयसृंजयाः ॥ उदायुधाः समुत्तस्थुः शिशुपालजिघांसवः ॥ ४१ ॥ ततश्चैद्यस्त्वसंभ्रांतो ज
गृहे सोसिचर्मणी ॥ भर्त्सयन्कृष्णपक्षीयान्राज्ञः सदसि भारत ॥ ४२ ॥
ह्निगंत्याजपित्वा बाधंते दंडयंति

कथंभूतं दुर्गं धर्मवत्प्रतीतेरधर्मत्वयादुर्ज्ञेयमित्यर्थः ॥ तथा दस्यवः दस्यून पिप्रजा वैषेणैव वर्त्तमानोनपि
दंडयंति ॥ अतो यद्भ्योऽन्यः को नाम धार्मिकोऽस्तीति पारुष्यं तत्तानमेव ॥ ३७ ॥ शिवा फेरुः तस्याः रुतं श्रुत्वाय

थासिंहो न किंचिद्ब्रूते तद्वत् ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥

अस्यैव वास्तवार्थः ॥ सर्ववदुर्ज्ञेयः ॥ गोपाल इति ॥ वेद पृथिव्यादिपालक इत्यर्थः ॥ कुत्सितं वेदविपरीतं तत्त्वपत्तीति कुलपाः
पाषंडास्तान् अत्र सपति समार्द्ध तेतीति तथासः ॥ अकाकः ॥ कंच अकंच काके सुखदुःखे तेन विद्येते यस्य सः ॥ अकाकः ॥
आप्तकाम इत्यर्थः ॥ स यथा देवयोग्यं केवलं पुरोडाशमात्रं नार्हति ॥ अपितु सर्वस्वमपि ॥ तथायं श्रीकृष्णोपि ब्रह्मर्षियोग्यं सप
र्य्यामात्रं नार्हतीत्यर्थः ॥ ३४ ॥ वर्णाश्रमकुलेभ्योऽपेतो ब्रह्मत्वात् ॥ अनामगोत्र इति श्रुतेः ॥ अत एवानधिकारित्वात् ॥ सर्वैर्धर्मै

सदसस्पतीनतिक्रम्य गोपालः कुलपांसनः ॥ यथा काकः पुरोडाशं सपर्य्यां कथमर्हति ॥ ३४ ॥ व
र्णाश्रमकुलापेतः सर्वधर्मबहिष्कृतः ॥ स्वैरवर्ती गुणैर्हीनः सपर्य्यां कथमर्हति ॥ ३५ ॥ य
याति नैषां हि कुलं शप्तं सद्भिर्बहिष्कृतं ॥ वृथापानरतं शश्वत्सपर्य्यां कथमर्हति ॥ ३६ ॥ ६६ ॥

बहिष्कृतः ॥ स्वैरवर्ती परमेश्वरत्वात् ॥ अत एव निर्गुणः ॥ तमआदिरहितत्वात् ॥ एवंभूतो जीवानां तु कथं सपर्य्या
मात्रं कथमर्हतीत्यर्थः ॥ ३५ ॥ अपि च कथं वर्णनीयो मादृशैरेषां यदूनां महिमा यस्मादेषां कुलं ययातिना शप्तमपि किं
सद्भिर्बहिष्कृतं ॥ अपितु शिरसा धृतं किंच अस्मदादिकुलवत् ॥ किं वृथा मदिरापानरतं ॥ अपितु अतिनियता
चारमित्यर्थः ॥ अहो यदूनामेव तावदीदृशं माहात्म्यं यद्कुलं वृष्ण्यस्य ययातेः शापेन प्रादुरभूदित्यादि ॥ अ
यं तु साक्षादीश्वरः ॥ अतः सपर्य्यामात्रं कथमर्हतीत्यर्थः ॥ ३६ ॥

भा॰द॰उ॰ ५१ सुरा मानवाः खेचराः प्रमथाश्च ॥५२॥ पापं धर्मद्विषं तत्र हेतुः कलिं कलेरंशं ॥ अत एव कुरुकुलस्यामयं व्या
९७ धिनाशकं ॥५३॥ वितानयज्ञं च ॥५४॥ इति दशमे चतुःसप्ततितमः ॥७४॥ पंचयुक्सप्ततितमे यज्ञावभृथसंभ्रमः

राजसूयावभृथ्येन स्नातो राजा युधिष्ठिरः ॥ ब्रह्मक्षत्रसभामध्ये शुशुभे सुरराडिव ॥५१॥ राज्ञा स
भाजिताः सर्वे सुरमानवखेचराः ॥ क्रतुं संशंसतः स्वधामानि ययुर्मुदा ॥५२॥ दुर्योधन
मृते पापं कलिं कुरुकुलामयं ॥ यो न सेहे श्रियं स्फीतां दृष्ट्वा पांडुसुतस्य तां ॥५३॥ य इदं कीर्तयेद्विष्णोः
कर्म चैद्यवधादिकं ॥ राजमोक्षं वितानं च सर्वपापैः प्रमुच्यते ॥५४॥ इति श्रीमद्भागवते महापुरा
णे दशमस्कंधे चतुःसप्ततितमोऽध्यायः ॥७४॥ राजोवाच ॥ अजातशत्रोस्तं दृष्ट्वा राजसूयमहो
दयं ॥ सर्वे मुमुदिरे ब्रह्मन्नृदेवा ये समागताः ॥१॥ दुर्योधनं वर्जयित्वा राजानः सर्षयः सुराः ॥
इति श्रुतं नो भगवंस्तत्र कारणमुच्यतां ॥२॥ ऋषिरुवाच ॥ पितामहस्य ते यज्ञे राजसूये महात्मनः ॥ बां
धवाः परिचर्यायां तस्यासन्प्रेमबंधनाः ॥३॥

सुयोधनस्य चास्त्यानात्यामानभंगो दृष्टिभ्रमात् ॥ दुर्योधनस्य वदुःखकारणं प्रश्नमुक्तमनुवदति ॥ अजातशत्रोरिति ॥१॥ इति
श्रुतं त्वन्मुखादेवेत्यर्थः ॥२॥ दुर्योधनस्यासहकारणत्वेन यागमहोत्सवमेव पुनः सेहावलोकनेन निरूपयति पि

९७

तावदुत्थायेत्यस्यायमभिप्रायः ॥ एष मत्पार्षदो मत्तुल्यवलः सर्वानेतान्न हन्यात् ॥ अतो मयैव शीघ्रं हन्तव्य इति तत्र तत्क्षणमेवोत्था
य शिरो जहारेति ॥ ४३ ॥ ४४ ॥ ४५ ॥ नन्वेवं निंदकस्य कथं वासुदेवे प्रवेशः तत्राह ॥ जन्मत्रयेति ॥ जन्मत्रयेनुगुणितमनुवर्द्धितं यद्वै

तावदुत्थाय भगवान्स्थानान्निवार्य्य स्वयं रुषा ॥ शिरश्चुछेद चक्रेण जहारापततो रिपोः ॥ ४३ ॥ शब्दः कोलाहलो
प्यासीच्छिशुपाले हते महान् ॥ तस्यानुयायिनो भूपा दुद्रुवुर्जीवितैषिणः ॥ ४४ ॥ चैद्यदेहात्स्थितो ज्योतिर्वासु
देवमुपाविशत् ॥ पश्यतां सर्वभूतानामुल्केव भुवि खाच्युता ॥ ४५ ॥ जन्मत्रयानुगुणितवैरसंरब्धयाधि
या ॥ ध्यायंस्तन्मयतां यातो भावो हि भवकारणं ॥ ४६ ॥ ऋत्विग्भ्यः ससदस्येभ्यो दक्षिणां विपुलामदात्
सर्वान्सम्पूज्य विधिवच्चक्रे वभृथमेकराट् ॥ ४७ ॥ साधयित्वा क्रतुं राज्ञः कृष्णो योगेश्वरेश्वरः ॥ उवा
स कतिचिन्मासान्सुहृद्भिरभियाचितः ॥ ४८ ॥ ततोनुज्ञाप्य राजानमनिच्छन्तमपीश्वरः ॥ ययौ स
भार्य्यः सामात्यः स्वपुरं देवकीसुतः ॥ ४९ ॥ वर्णितं तदुपाख्यानं मया ते च कुविस्तरं ॥ वैकुंठवासिनो
जन्मविप्रशापात्पुनः पुनः ॥ ५० ॥

रं तेन संरब्धया आविष्टया तन्मयतां तत्स्वरूपतां यातः ॥ पुनः पार्षदो वभूवेत्यर्थः ॥ अत्र हेतुः ॥ भावो हि
भावो भावना ॥ अनुध्यानं ॥ भवस्य ध्येयाकारजन्मनः ॥ कारणं यश्शत्रुरिध्यानेन कीटादौ तथा दृष्टत्वादित्यर्थः

॥ वि० ॥ पु० ॥ टी० ॥ १६५ ॥

भा०द०उ० यजमानो युधिष्ठिरः पुरःपुरःसरो येषां ते ।।१२।। सदस्या ऋत्विजो ऽन्ये च द्विजश्रेष्ठाः तिर्यपुः ।।१३।। किंच गंधादिभिः स्वलंकृता नरा नार्यश्च मिथो विजह्रुः ।।१४।। रसानेवाह तैलेति ।। किंच सांद्रकुंकुमादिभिर्लिप्ताः प्रलिंपंत्यो वारयोषितश्च विजह्रुः ।।१५।। नृभिर्गुप्ताः यथा दिवि यानैर्देव्यो ऽरं जपत्यो निरगमन् ।। निरगुः ।। एतद्दुपलब्धुं विमानवरैर्दे

१९८

यदुसृंजयकांबोज कुरुकेकयकोशलाः ।। कंपयंतो भुवं सैन्यैर्यजमानपुरःसराः ।।१२।। सदस्यर्त्विग्द्विजश्रेष्ठा ब्रह्मघोषेण भूयसा ।। देवर्षिपितृगंधर्वास्तुष्टुवुः पुष्पवर्षिणः ।।१३।। स्वलंकृता नरा नार्यो गंधस्रग्भूषणांबरैः ।। विलिंपंत्योऽभिषिंचंत्यो विजह्रुर्विविधै रसैः ।।१४।। तैलगोरसगंधोदहरिद्रासांद्रकुंकुमैः ।। पुंभिर्लिप्ताः प्रलिंपंत्यो विजह्रुर्वारयोषितः ।।१५।। गुप्ता नृभिर्निरगमन्नुपलब्धुमेतद्देव्यो यथा दिवि विमानवरैर्नृदेव्यः ।। ता मातुलेयसखिभिः परिषिच्यमानाः सव्रीडहासविकसद्वदना विरेजुः ।।१६।। ता देवरानुत सखीन्सिषिचुर्दृतीभिः क्लिन्नांबरा विवृतगात्रकुचोरुमध्याः ।। औत्सुक्यमुक्तकवराश्च्यवमानमाल्याः क्षोभं दधुर्मलधियां रुचिरैर्विहारैः ।।१७।। रा३

व्योपयाता इत्त ।। मातुलेयैः सखिभिश्च परितः सिंचमानाः सव्रीडेन हासेन विकसंति वदनानि यासां ताः ।।१६।। देवरान् पतिभ्रातॄन् सखीन् पिहृतीभिः ।। उदकनोदनचर्मतंत्रैः सेचनपात्रैश्च मलधियां कामिनां ।।१७।। ऽऽ ।। ।। १९८

पूजायांसंमानने द्रव्यसाधने ॥ नानावस्तुसंपादने ॥ ४ ॥ सुश्रूषणेचंदनलेपनादौ ॥ ५ ॥ निरूपितानियुक्ताः संतो नानाकर्मसु

भीमोमहानसाध्यक्षोधनाध्यक्षः सुयोधनः ॥ सहदेवस्तु पूजायांनकुलोद्रव्यसाधने ॥ ४ ॥ गुरुसुश्रूषणेजि

ष्णुः कृष्णःपादावनेजने ॥ परिवेषणेद्रुपदजाकर्णोदानेमहामनाः ॥ ५ ॥ युयुधानोविकर्णश्च हार्दिक्योवि

दुरादयः ॥ वाह्लीकपुत्राभूर्याद्यायेचसंतर्दनादयः ॥ ६ ॥ निरूपितामहायज्ञेनानाकर्मसुतेतदा ॥ प्रवर्त्तंते

स्मराजेंद्र राज्ञःप्रियचिकीर्षया ॥ ७ ॥ ऋत्विक्सदस्यबहुवित्सुहृत्तमेषु स्विष्टेषु सुनृतसमर्हणदक्षि

णाभिः ॥ चैद्येचसात्वतपतेश्चरणंप्रविष्टेचक्रुस्ततस्त्ववभृथस्नपनंद्युनद्यां ॥ ८ ॥ मृदंगशंखपण

वधुंधुर्यानकगोमुखाः ॥ वादित्राणिविचित्राणिनेदुरावभृतोत्सवे ॥ ९ ॥ नर्त्तक्योननृतुर्हृष्टागा

यकायूथशोजगुः ॥ वीणावेणुतलोन्नादस्तेषांसदिवमस्पृशात ॥ १० ॥ चित्रध्वजपताकाग्रैरि

भेंद्रैःस्यंदनोर्वभिः ॥ स्वलंकृतैर्भटैर्भूपानिर्ययूरुक्ममालिनः ॥ ११ ॥ ॥

प्रवर्त्तंतेस्म ॥ ६ ॥ ७ ॥ ऋत्विजश्चसभासदः ॥ बहुविदश्चतेषु स्विष्टेषु ॥ सम्यक्पूजितेषुसुनृतंप्रियावाक् ॥ समर्हणमलं

कारादिदक्षिणाश्चप्रसिद्धास्ताभिः ॥ द्युनद्यांगंगायां ॥ ८ ॥ ९ ॥ १० ॥ चित्राणिध्वजपताकाग्राणियेषुतैरिभेंद्रैःस्यं

३१

भा० द० उ० २५॥२६॥२७॥२८॥२९॥ गतज्वरः निश्चिंत आसीत् ॥३०॥ अच्युते आः त्वाय स्य सः ॥ तस्य नरेंद्राह्वीनां लक्ष्मीः त्वस्यः

९९

अथर्त्विजो महाशीलाः सदस्या ब्रह्मवादिनः ॥ ब्रह्मक्षत्रियविट्शूद्रा राजानो ये समागताः ॥२५॥ दे

वर्षिपितृभूतानि लोकपालाः सहानुगाः ॥ पूजितास्तमनुज्ञाप्य स्वधामानि ययुर्नृप ॥२६॥ हरिदास

स्य राजर्षे राजसूयमहोदयं ॥ नैवातृप्यन् प्रशंसंतः पिबन्मर्त्यो मृतं यथा ॥२७॥ ततो युधिष्ठिरो रा

जा सुहृत्संबंधिबांधवान् ॥ प्रेम्णा निवारयामास कृष्णं च त्यागकातरः ॥२८॥ भगवानपि तत्रांग

न्यवात्सीत्तत्प्रियंकरः ॥ प्रस्थाप्य यदुवीरांश्च सांबादींश्च कुशस्थलीं ॥२९॥ इत्थं राजा धर्मसुतो म

नोरथमहार्णवं ॥ सुदुस्तरं समुत्तीर्य कृष्णेनासीद्गतज्वरः ॥३०॥ एकदांतःपुरे तस्य वीक्ष्य दुर्योधनः ॥

श्रियं ॥ अतप्यद्राजसूयस्य महित्वं चाच्युतात्मनः ॥३१॥ यस्मिन्नरेंद्रदितिजेंद्रसुरेंद्रलक्ष्मीर्नाना वि

भांति किल विश्वसृजोपक्लृप्ताः ॥ ताभिः पतीन् द्रुपदराजसुतोपतस्थे यस्यां विषक्तहृदयः कुरुरा

उतप्यत् ॥३२॥

विभूतयः विश्वसृजा मयेन उपक्लृप्ताः विरचिताः ताभिः सहकुरुराट् ॥ दुर्योधनोऽतप्यत् ॥३२॥ ॥८८॥ ९९

क्रियाभिः ॥ त्रं गुरु क्रियाभिः ॥ क्रतुराट् स सरीरो राजसूययज्ञ इव ॥ १८ ॥ पत्नीसंयाजो यागविशेषः ॥ अवभृथसंबंधि आवभृथ्यं
चैते अवरित्वा तेन्यनुष्ठायेत्यर्थः ॥ १९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ अहते नूतने आनर्च अर्चितवान् ॥ २४ ॥ २५ ॥ स तु राममिव

स सम्राड् दुग्धमारूढः सदश्वं रुक्ममालिनं ॥ व्यरोचत स्वपत्नीभिः क्रियाभिः क्रतुराडिव ॥ १८ ॥ पत्नीसं
याजावभृथ्यैश्चरित्वा तेन महत्विजः ॥ आचांतः स्नापयांचक्रे गंगायां सह कृष्णया ॥ १९ ॥ देवदुंदुभयो नेदुर्नर
दुंदुभिभिः समं ॥ मुमुचुः पुष्पवर्षाणि देवर्षिपितृमानवाः ॥ २० ॥ सस्नुस्तत्र ततः सर्वे वर्णाश्रमयुता
नराः ॥ महापातक्यपि यतः सद्यो मुच्येत किल्बिषात् ॥ २१ ॥ अथ राजाहते क्षौमे परिधाय स्वलंकृ
तः ॥ ऋत्विक्सदस्यविप्रादीनानर्चाभरणांबरैः ॥ २२ ॥ बंधुज्ञातिनृपान्मित्रसुहृदोन्यांश्च सर्वशः ॥
अभीक्ष्णं पूजयामास नारायणपरो नृपः ॥ २३ ॥ सर्वे जनाः सुररुचो मणिकुंडलस्रगुष्णीषकं
चुकदुकूलमहार्घ्यहाराः ॥ नार्यश्च कुंडलयुगालकवृंदजुष्टवक्त्रश्रियः कनकमेखलया विरेजुः ॥
॥ २४ ॥

रुक्कांतिर्येषां ते ॥ मणिकुंडलैः सहिताः ॥ स्रगुष्णीषादयो येषां ते ॥ कुंडलयुगेनालकवृंदेन च जुष्टा व
क्त्रश्रीर्यासां ताः ॥ २४ ॥ रामराम रामराम ॥ ॥ ॥

भा॰ द॰ उ॰ र्थं॥ भुवो भरं समुज्जिहीर्षुरिति॥ अद्य संपादितेन कलहबीजेन कुरूणां संहारं करिष्यामीति मत्वेति॥ किंच॥ यस्य दृशा
१०० दृष्टिमात्रेण दुर्योधनो भ्रमति स्म॥ भ्रांतिप्राप॥ मयमायातु निमित्तमात्रं॥ स श्रीकृष्णो भूभारहरणे बीजं दुर्योधनस्य

सव्रीडितो ऽवाग्वदनो रुषा ज्वलन्निष्क्रम्य तूष्णीं प्रययौ गजाह्वयं॥ हाहेति शब्दः सुमहानभूत्सता
मजातशत्रुर्विमना इवाभवत्॥ बभूव तूष्णीं भगवान्भुवो भरं समुज्जिहीर्षुर्भ्रमति स्म यद्दृशा॥ ६०॥
एतत्ते ऽभिहितं राजन्यत्पृष्टो ऽहमिह त्वया॥ सुयोधनस्य दौरात्म्यं राजसूये महाक्रतौ ६१ इति श्रीमद्भा
॥ वते महापुराणे दशमस्कंधे मो॰ यासभावर्णनं पंचसप्ततितमो ऽध्यायः॥ ७५॥ श्रीशुक उवाच॥ अथा
न्यदपि कृष्णस्य शृणु कर्माद्भुतं नृप॥ क्रीडानरशरीरस्य यथा सौभपतिर्हतः॥ १॥ शिशुपालस
खः साल्वो रुक्मिण्युद्वाह आगतः॥ यदुभिर्निर्जितः संख्ये जरासंधादयस्तथा॥ २॥ साल्वः प्र
तिज्ञामकरोच्छृण्वतां सर्वभूभुजां॥ अयादवीं क्ष्मां करिष्ये पौरुषं मम पश्यत॥ ३॥

भ्रमं भीमादिहास्यं न च तत्स्य पराभवं विधाय तूष्णीमासीदित्यर्थः॥ ६०॥ ६१॥ इति दशमे पंचसप्ततितमः
७५॥ ततः षट्सप्ततितमे रुक्मिसाल्वमहामृधे॥ द्युमद्गदाप्रहारेण रणात्प्रद्युम्ननिर्गमः॥ १॥ संपाद्यध
र्मराजस्य राजसूयमहोदयम्॥ निर्हृत्य सौभराजादीन्ययौ पारमदच्युतः॥ २॥ ३॥ ॥ ऽऽ ॥ ॥ १००

महिषीसहस्रमिति वक्तुं चोपलक्षणं ॥ क्वणद्भिरंघ्रिभिः शोभा यस्य मध्ये सुचारुमध्य इत्यर्थः ॥ कुचकुंकुमैः शो
णहारायस्य नक्त ॥ चपलैः कुंडलैः कुंतलैश्च आढ्यं संपन्नं ॥ अशोभतेति शेषः ॥ ३३ ॥ कापि कदाचिद्विरेजे इ

यस्मिंस्तदा मधुपतेर्महिषीसहस्रं श्रोणीभरेण शनकैः क्वणदंघ्रिशोभं ॥ मध्ये सुचारु कुचकुंकु
मशोणहारं श्रीमन्मुखं च चपलकुंडलकुंतलाढ्यं ॥ ३३ ॥ सभायां मयक्लृप्तायां क्वापि धर्मसुतोऽधिरा
ट् ॥ वृतोऽनुजैर्बंधुभिश्च कृष्णेनापि स्वचक्षुषा ॥ ३४ ॥ आसीनः कांचने साक्षादासने मघवानिव ॥ पार
मेष्ठ्यश्रिया जुष्टः स्तूयमानश्च वंदिभिः ॥ ३५ ॥ तत्र दुर्योधनो मानी परीतो भ्रातृभिर्नृप ॥ किरीट
माली न्यविशदसिहस्तः क्षिपन्रुषा ॥ ३६ ॥ स्थलेऽभ्यगृह्णाद्वस्त्रांतं जलं मत्वा स्थले पतन् ॥ जले च
स्थलवद्भ्रांत्या मयमायाविमोहितः ॥ ३७ ॥ जहास भीमस्तं दृष्ट्वा स्त्रियो नृपतयो परे ॥ निवार्यमाणा अ
प्यंग राज्ञा कृष्णानुमोदिताः ॥ ३८ ॥

तिशेषः ॥ स्वस्य च रुषा ॥ हिताहितज्ञापकेनेति ॥ ३४ ॥ ३५ ॥ मानी साहंकारः ॥ किरीटं च माला च विद्येते यस्य सः न्यवि
शत ॥ विवेश ॥ क्षिपन् हास्यादीन् अधिक्षिपन् ॥ ३६ ॥ तत्र स्थल एव वस्त्रांतं अभ्यगृह्णात् ॥ आकुंचितवान् ॥ कुतः तस्मि
न् स्थले एव भ्रांत्या जले चापतत् ॥ कुतः स्थलवद्भ्रांत्या ॥ ३७ ॥ ३८ ॥ ॥ ऽऽ ॥ ॥ ॥ ऽऽ ॥

आसारशर्कराः॥ धारासंपातवज्जलोपलाः॥११॥ शं सुखं नाभ्यपद्यत॥१२॥१३॥१४॥१५॥ तुमुलं व्याकुलं॥ रोमहर्षणं रौ
द्रं॥१६॥ नैशं निशिभवं तमः॥ उष्णगुः सूर्य इव॥१७॥ किंच॥ विव्याधेति॥ स्वर्णमयानि पुंखानि ष्टप्रोतानि येषां तैः॥ अये

प्रचंडश्चक्रवातोऽभूद्रजसाछादिता दिशः॥११॥ इत्यर्द्यमा
शिलाद्रुमाश्चाशनयः सर्प्पा आसारशर्कराः॥ प्रचंडश्चक्रवातोऽभूद्रजसाछादितादिशः॥११॥
नासौभेन कृष्णस्य नगरी भृशं॥ नाभ्यपद्यत शं राजंस्त्रिपुरेण यथा मही॥१२॥ प्रद्युम्नो भगवान्वीक्ष्य
बाध्यमाना निजाः प्रजाः॥ माभैष्टेत्यभ्यधाद्वीरो रथारूढो महायशः॥१३॥ सात्यकिश्चारुदेष्णश्च सांबोऽक्रू
रः सहानुजः॥ हार्दिक्यो भानुविंदश्च गदश्च शुकसारणौ॥१४॥ अपरे च महेष्वासा रथयूथपयूथपाः॥
निर्ययुर्दंशिता गुप्ता रथेभाश्वपदातिभिः॥१५॥ ततः प्रववृते युद्धं साल्वानां यदुभिः सह॥ यथासुरा
णां विबुधैस्तुमुलं रोमहर्षणं॥१६॥ ताश्च सौभपतेर्म्माया दिव्यास्त्रै रुक्मिणीसुतः॥ क्षणेन नाशया
मास नैशं तम इवोष्णगुः॥१७॥ विव्याध पंचविंशत्या स्वर्णपुंखैरयोमुखैः॥ साल्वस्य ध्वजिनीपालं श
रैः सन्नतपर्वभिः॥१८॥ शतेनाताडयत्साल्वमेकैकेनास्य सैनिकान्॥ दशभिर्दशभिर्नेतॄन्वाहनानि त्रि
भिस्त्रिभिः॥१९॥

योलोहं तन्मयान्यग्राणि येषां तैः॥ ध्वजिनीपालं सेनान्यं॥ सन्नतानि निमग्नानि पर्वाणि ग्रंथयो येषां तैः॥१८॥ सैनि
कान्भटान्॥ नेतॄन्सारथीन्॥१९॥

प्रत्यहं सकृत्यां पांशुमुष्टिमेकां ग्रसन् भक्षयन् ॥४॥ संवत्सरान्त इति ॥ आशुतोषोपि भगवानुमापतिः ॥ श्रीकृष्ण
विद्विषि साल्वे वरस्य वैफल्यं मन्यमानो न शीघ्रं प्रादुरभूत् ॥ तस्यातिनिर्बंधमालक्ष्य संवत्सरान्ते वरेणाच्छंदयामास
इच्छाकृतवान् ॥ वरं वृणीष्वेति उवाचेत्यर्थः ॥५॥ ६ ॥ तथेति प्रतिज्ञातो गिरिशेनादिष्टः ॥ अयस्मयः लोहमयं पुरं सौभं

इति मूढः प्रतिज्ञाय देवं पशुपतिं प्रभुं ॥ आराधयामास नृप पांशुमुष्टिं सकृद्ग्रसन् ॥४॥ संवत्सरान्ते
भगवानाशुतोष उमापतिः ॥ वरेणच्छंदयामास साल्वं शरणमागतं ॥५॥ देवासुरमनुष्याणां गंध
र्वोरगरक्षसां ॥ अभेद्यं कामगं वव्रे स यानं वृष्णिभीषणं ॥६॥ तथेति गिरिशादिष्टो मयः परपुरंजयः
पुरं निर्माय साल्वाय प्रादात्सौभमयस्मयं ॥७॥ स लब्ध्वा कामगं यानं तमोधाम दुरासदं ॥ ययौ द्वार
वतीं साल्वो वैरं वृष्णिकृतं स्मरन् ॥८॥ निरुध्य सेनया साल्वो महत्या भरतर्षभ ॥ पुरीं बभंजोपव
नान्युद्यानानि च सर्वशः ॥९॥ सगोपुराणि द्वाराणि प्रासादाट्टालतोलिकाः ॥ विहारान्स विमाना
ग्र्यान्निपेतुः शस्त्रवृष्टयः ॥१०॥

संज्ञं निर्माय रचयित्वा प्रादात् ॥७॥ तमसोऽन्धकारस्य धाम आश्रयं ॥ अन्यैर्दुरासदं दुष्प्रापं ॥८॥ ९ ॥ प्रासादा गृ
हाः ॥ अट्टालाः तदुपरि गृहाः ॥ तोलिका ॥ तत्पर्यंतकुड्यान्विताः ॥ विहारान् क्रीडास्थानानि च सबभंज ॥ किंच ॥
विमानाग्र्यात् तस्माच्छस्त्रवृष्ट्यादयः पेतुः ॥१०॥

भा० द० उ० अपोवाह ॥ अन्यतो निनाय ॥ २७ ॥ २८ ॥ मत् मत्तो विना क्लीवं चिन्तयस्यते न त्वया ॥ २९ ॥ पितरौ रामकृष्णावभिसंगम्य
१०२ तत्पार्श्वं गत्वा ताभ्यां पृष्टः स्वयोग्यं किं नु वक्ष्यामीति ॥ ३० ॥ भ्रातृजामयो भ्रातृभार्य्या व्यक्तं निश्चितं मत् क्लैव्यं कथ

प्रद्युम्नं गदया शीर्णं वृत्तस्य त्वमरिंदम ॥ अपोवाह रणात्सूतो धर्मविद्दारुकात्मजः ॥ २७ ॥ लब्धसंज्ञो
नु कृत्तेन कार्ष्णिः सारथिमब्रवीत् ॥ अहो असाध्विदं सूत यद्रणान्मेऽपसर्पणं ॥ २८ ॥ न यदूनां कुले जातः
श्रूयते रणविच्युतः ॥ विना मत्क्लीवचित्तेन सूतेन प्राप्तकिल्बिषात् ॥ २९ ॥ किं नु वक्ष्येऽभिसंगम्य
पितरौ रामकेशवौ ॥ युद्धात्सम्यगपक्रान्तः पृष्टः सन्नात्मनः क्षमं ॥ ३० ॥ व्यक्तं मे कथयिष्यन्ति हसन्त्यो
सारथिरुवाच भ्रातृजामयः ॥ क्लैव्यं कथं कथं वीर तवान्यैः कथ्यतां मृधे ॥ ३१ ॥ सारथिरुवाच ॥ धर्मं विजानतायुष्म
न्कृतमेतन्मया विभो ॥ सूतः कृच्छ्रगतं रक्षेद्रथिनं सारथिं रथी ॥ ३२ ॥ एतद्विदित्वा तु भवान्मयापो
वाहितो रणात् ॥ उपसृष्टः परेणेति मूर्च्छितो गदया हतः ॥ ३३ ॥ इति श्रीमद्भागवते महापुराणे दशमस्क
न्धे षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

थिष्यंति ॥ तत्र कथनमनुकरोति ॥ कथं कथमिति ॥ ३१ ॥ विभो हे समर्थ ॥ एतदपसर्पणं धर्ममाह ॥ मत्त इति ॥ ३२ ॥
अपोवाहितः ॥ उपसृष्टः उपसर्गपीडां प्राप्त इति कृत्वा यतः ॥ परेण शत्रुणा गदया हतः सन् मूर्च्छितो निःसंज्ञो

स्वपरसैनिकयोः वर्त्तमानाः सर्वे पूजयामासुः संमानितवंतः ॥२०॥ कदाचिद्बहुरूपं क्वचिद् दृश्यते क्वचिन्न दृ
श्यते ॥ एवं दुर्विभाव्यमवितर्क्यमभूत् ॥२१॥ किंच ॥ क्वचिदिति ॥ एवं तावद्दूरवस्थितं चाभूत् ॥२२॥२३॥ अग्निवद्दा

तदद्भुतं महत्कर्म प्रद्युम्नस्य महात्मनः ॥ दृष्ट्वा तं पूजयामासुः सर्वे स्वपरसैनिकाः ॥२०॥ ब
हुरूपैकरूपं च दृश्यते न च दृश्यते ॥ मायामयं मयकृतं दुर्विभाव्यं परैरभूत् ॥२१॥ क्वचिद्भूमौ
क्वचिद्व्योम्नि गिरिमूर्द्ध्नि जले क्वचित् ॥ अलातचक्रवद्भ्राम्यत्सौभं तद्दुरवस्थितं ॥२२॥ यत्र यत्रोप
लक्ष्येत ससौभः सहसैनिकः ॥ साल्वस्ततस्ततोऽमुंचन शरान्सात्वतयूथपाः ॥२३॥ शरैरग्न्यर्क
संस्पर्शैराशीविषदुरासदैः ॥ पीड्यमानः पुरानीकः साल्वोमुह्यत्परेरितैः ॥२४॥ साल्वानीकपश
स्त्रौघैर्वृष्णिवीरा भृशार्दिताः ॥ न तत्यजू रणं स्वं स्वं लोकद्वयजिगीषवः ॥२५॥ साल्वामात्यो द्युमा
न्नाम प्रद्युम्नं प्राक्प्रपीडितैः ॥ आसाद्य गदया मौर्व्या व्याहत्य व्यनदद्बली ॥२६॥

हकः ॥ अर्कवद्युगपत्सर्वतः संस्पर्शो येषां तैः ॥ आशीविषवदेकदेशस्पर्शमात्रेण मारकत्वात् दुरासदैर्दुःसहैः ॥
पीड्यमानं पुरमनीकानि यस्य सः ॥ परैर्यदुभिरीरितैर्मुक्तैः ॥२४॥ भृशार्दिता अपि ॥ स्वं स्वं रणं स्वांस्वां युद्धभूमिं ॥२५॥

 दुर्निमित्तदर्शनाकुलचित्तं ॥ एवं चिंतयन् द्वारकामागत्य स्वानां कदनं वीक्ष्य सौभं च साल्वराजं च वीक्ष्य
 रामें पुररक्षणं प्रति निरूप्य नियुज्य दारुकं प्राहेत्यन्वयः ॥९॥ तेन त्वया ॥१०॥ आस्थाय सम्यगधिष्ठाय ॥ अ
रुणानुजे ॥ ध्वजे वर्त्तमानं गरुडं ॥११॥ हतप्रायस्य बलस्येश्वरः ॥१२॥ १३ ॥ तं च साल्वं शरसंदोहैः ॥ शरजा

वीक्ष्य तत्कदनं स्वानां निरूप्य पुररक्षणं ॥ सौभं च साल्वराजं च दारुकं प्राह केशवः ॥९॥ रथं प्रा
पय मे सूत साल्वस्यांतिकमाशु वै ॥ संभ्रमस्ते न कर्त्तव्यो मायावी सौभराडयं ॥१०॥ इत्युक्तश्चो
दयामास रथमास्थाय दारुकः ॥ विशंतं ददृशुः सर्वे स्वे परे चारुणानुजं ॥११॥ साल्वश्च कृष्ण
मालोक्य हतप्रायबलेश्वरः ॥ प्राहरत्कृष्णसूताय शक्तिं भीमरवां मृधे ॥१२॥ तामापतंतीं
नभसि महोल्कामिव रंहसा ॥ भासयंतीं दिशः शौरिः सायकैः शतधाच्छिनत् ॥१३॥ तं च षोडशभि
र्विद्ध्वा बाणैः सौभं च खे भ्रमत् ॥ अविध्यच्छरसंदोहैः खं सूर्य इव रश्मिभिः ॥१४॥ साल्वः शौरेस्तु
सव्यं १ दोः सशार्ङ्गं शार्ङ्गधन्विनः ॥ बिभेद न्यपतद्धस्ताच्छार्ङ्गमासीत्तदद्भुतं ॥१५॥

लैः ॥ खं सूर्य इव रश्मिभिः ॥ सुनीलत्वविपुलत्वादिभिराकाशोपमा ॥ सौभस्य अचिंत्यवेगत्वबाहुल्यादिभि
शराणां रश्मिसादृश्यं ॥ अयत्नेनैव रश्मिवत् शरजालप्रसारणात् सूर्यतुल्यः श्रीकृष्ण इति ॥१४॥ दोर्बा

सप्तयुक्तस्तप्ततितमेनानामायाविचक्षणः ॥ कृष्णेनागत्य साल्वस्तु हतः सौभं च चूर्णितं ॥१॥ दंशितः संनद्धः
॥१॥ विधमंतं तत्पर्यंतं प्रतिरुध्य ॥२॥ अष्टानां विनियोगमाह चतुर्भिरिति ॥३॥ सौभेयाः सौभस्थाः ॥४॥ नवानां रात्रीणां स

श्रीशुक उवाच ॥ स उपस्पृश्य सलिलं दंशितो धृतकार्मुकः ॥ नय मां द्युमतः पार्श्वं वीरस्येत्याह सा
रथिं ॥१॥ विधमंतं स्वसैन्यानि द्युमंतं रुक्मिणीसुतः ॥ प्रतिहत्य प्रत्यविध्यन्नाराचैरष्टभिः स्मयन् ॥
२॥ चतुर्भिश्चतुरो वाहान्सूतमेकेन चाहनत् ॥ द्वाभ्यां धनुश्च केतुं च द्युमतोऽन्येन वै शिरः ॥३॥ गद
सात्यकिसांबाद्या जघ्नुः सौभपतेर्बलं ॥ पेतुः समुद्रे सौभेयाः सर्वे संछिन्नकंधराः ॥४॥ एवं यदूनां ५४
साल्वानां निघ्नतामितरेतरं ॥ युद्धं त्रिनवरात्रं तदभूत्तुमुलमुल्बणं ॥५॥ श्रीशुक उवाच ॥ इंद्र
प्रस्थं गतः कृष्ण आहूतो धर्मसूनुना ॥ राजसूयेऽथ निर्वृत्ते शिशुपाले च संस्थिते ॥६॥ कुरुवृद्धाने
नुज्ञाप्य मुनींश्च ससुतां पृथां ॥ निमित्तान्यतिघोराणि पश्यन्द्वारवतीं ययौ ॥७॥ आह चाहमिहा
यात आर्यमिश्राभिसंगतः ॥ राजन्याश्चैद्यपक्षीया नूनं हन्युः पुरीं मम ॥८॥

माहारो नवरात्रं ॥ त्रयाणां नवरा
त्राणां समाहारः त्रिनवरात्रं ॥ सप्तविंशतिरहोरात्राणीत्यर्थः ॥ तुमुलं माकुलं उल्बणं घोरं ॥५॥ परमतं उपन्यस्यति
इंद्रप्रस्थं गत इत्यादिना ॥६॥७॥ आह चेति स्वगतमेव पथि चिंताविजृंभितमाभाषणं ॥ आर्यमिश्राभिः संगतो व

॥ २ ॥ [illegible]

भा० द० उ० २५॥ ज्ञनिताज्ञनयिता॥ ईश ईश्चेत्॥ २७॥ स्वबोधः॥ स्वतःसिद्धंज्ञानवानपि॥ स्वजनस्नेहहतः॥ प्रकृतो मानुषस्य भावे
१०४ उपप्लुतः निमग्नः आस्ते॥ आतिष्ठत॥ ततस्तस्य वामासुरी मायामवबुध्यतः॥ मायेयमितिज्ञातवान्॥ २८॥ स्वाप्नस्वप्नप्रपंचे

इति ब्रुवाणे गोविंदे सौभराट् प्रत्युपस्थितः॥ वसुदेवमिवानीय कृष्णं चेदमुवाच सः॥ २५॥ एष तेज
नितातातो यदर्थमिह जीवसि॥ वधिष्ये वीक्षतस्तेऽमुमीशश्चेत्पाहि बालिश॥ २६॥ एवं निर्भर्त्स्य
मायावी खड्गेनानकदुंदुभेः॥ उत्कृत्य शिर आदाय खस्थं सौभं समाविशत्॥ २७॥ ततो मुहूर्तं प्र
कृतावुपप्लुतः स्वबोध आस्ते स्वजनानुषंगतः॥ महानुभावस्तदबुध्यदासुरीं मायां स शाल्वप्रसृतां
मयोदितां॥ २८॥ न तत्र दूतं न पितुः कलेवरं प्रबुद्ध आजौ समपश्यदच्युतः॥ स्वाप्नं यथा चांबरचारि
णं रिपुं सौभस्थमालोक्य निहंतुमुद्यत॥ २९॥ एवं वदंति राजर्षे ऋषयः के च नान्विताः॥ यत्स्ववा
चो विरुध्येत नूनं ते न स्मरंत्युत॥ ३०॥

यथा॥ २९॥ एवं परमतमनुपन्यस्तं निराकरोति एवमिति॥ केचनान्विताः॥ अनन्विताः॥ एवं परानुसंधानरहिताः त
दा॥ यत्स्ववाचरति॥ तन्नानुस्मरंतीत्यर्थः॥ अयमभिप्रायः॥ न तावद्राजसूयार्थं रामेण सह गतः॥ श्रीकृष्णः॥ संकर्षणम

१६ सख्युः शिशुपालस्य ईक्षतामस्माकं प्रमत्तः ॥ अनवहितो व्यापादितः ॥ निहतः ॥ १७ ॥ अपराजितोहमिति मानवं
हाहाकारो महानासीद्भूतानां तत्र पश्यतां ॥ विनद्य सौभराडुच्चैरिदमाह जनार्दनं ॥ १६ ॥ यत्त्वया मूढ नः स
ख्युर्भ्रातुर्भार्या हृतेक्षतां ॥ प्रमत्तः स सभामध्ये त्वया व्यापादितः सखा ॥ १७ ॥ तं त्वाद्य निशितैर्बाणैर
पराजितमानिनं ॥ नयाम्यपुनरावृत्तिं यदि तिष्ठेर्ममाग्रतः ॥ १८ ॥ श्रीभगवानुवाच ॥ वृथा त्वं कत्थ
से मंद न पश्यस्यंतिकेंऽतिकं ॥ पौरुषं दर्शयंति स्म शूरा न बहुभाषिणः ॥ १९ ॥ इत्युक्त्वा भगवान्साल्वं गद
या भीमवेगया ॥ तताड जत्रौ संरब्धः स च कंपे वमन्नसृक् ॥ २० ॥ गदायां संनिवृत्तायां साल्वस्त्वंतर
धीयत ॥ ततो मुहूर्त्ते आगत्य पुरुषः शिरसाऽच्युतं ॥ २१ ॥ देवक्या प्रहितोऽस्मीति नत्वा प्राह वचो रुद
न् ॥ कृष्ण कृष्ण महाबाहो पिता ते पितृवत्सल ॥ बध्वापनीतः साल्वेन सौनिकेन यथा पशुः ॥ २२ ॥ नि
शम्य विप्रियं कृष्णो मानुषीं प्रकृतिं गतः ॥ विमनस्को घृणी स्नेहाद्बभाषे प्राकृतो यथा ॥ २३ ॥ कथं राम
मसंभ्रांतं जित्वाजेयं सुरासुरैः ॥ साल्वेनाल्पीयसा नीतः पिता मे बलवान् विधिः ॥ २४ ॥

तः ॥ अपुनरावृत्तिं ॥ मृत्युम् ॥ तिष्ठेः स्थास्यसि ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥ २२ घृणी दयावान् ॥ २३ ॥ २४ ॥ राम राम

भा०द०उ०२६ ॥देवगणेरीरिताः किंच ॥सखीनामिति ॥ ३७ ॥ इति द श मे स प्र स प्त ति त मः ॥ ७७ ॥ ततो ष्टसप्ततितमे द्वंतवक्रविदूरथौ
१०५ हत्वाहरिःपुरें रेमेरामःस्तत्ततोऽवधीत् ॥ सखीनामपचितिंकुर्वन्ति न्तु कंत देवाह ॥ शिशुपालस्येति पारोक्ष्यसो

जहारतेनैवशिरःसकुंडलंकिरीटयुक्तंपुरुमायिनोहरिः ॥ वज्रेणवृत्रस्ययथापुरंदरोवभूव
हाहेतिवचस्तदान्नृणां ॥ ३६ ॥ तस्मिन्निपतितेपापेसौभेचगदयाहते ॥ नेदुर्दुंदुभयोराजन्नदि
तर विदेवगणेरीरिताः ॥ सखीनामपचितिंकुर्वन्दंतवक्रोरुषाभ्यगात ॥ ३७ ॥ इति श्रीमद्भागवते म
हापुराणेदशमस्कंधेसाल्ववधंनामसप्तसप्ततितमोध्यायः ॥ ७७ ॥ श्रीशुकउवाच ॥ शिशुपालस्य
साल्वस्यपौंड्रकस्यापिदुर्मतिः ॥ परलोकगतानांचकुर्वन्पारोक्ष्यसौहृदं ॥ १ ॥ एकःपदा
तिःसंक्रुद्धोगदापाणिःप्रकंपयन् ॥ पद्भ्यामिमांमहाराजमहासत्वोव्यदृश्यत ॥ २ ॥ तंतथायां
तमालोक्यगदामादायसत्वरः ॥ अवप्लुत्यरथात्कृष्णःसिंधुंवेलेवप्रत्यधात् ॥ ३ ॥ गदामुद्यम्य
कारूषोमुकुंदंप्राहदुर्मदः ॥ दिष्ट्यादिष्ट्याभवानद्यममदृष्टिपथंगतः ॥ ४ ॥

हृदं परोक्षेकरणीयं ॥ सुहृत्कृत्यं ॥ १ ॥ २ ॥ प्रत्यधात्प्रतिरुरोध ॥ ३ ॥ मुकुंदंप्राहदुर्मद इत्यादेरधिक्षेपपरतास्फुटैः
परमार्थतस्तुदुर्मदःप्राहमुकुंदंतृतीयेजन्मनिमुक्तिदानार्थमागतं ॥ अद्येतिजन्मत्रयेऽन्वेष्यमाणोऽद्यब्रह्मशा

असंभावितं चेत्याह ॥ क्व शोकमोहाविति भयं वा दुर्निमित्तदर्शनं कृतं ॥ नन्वनं हन्युः पुरीमिति यदुक्तं ॥ यच्च हस्ता
च्छार्ङ्गधनुर्न्यपतदित्युक्तं ॥ तद्व्यंयवा केति ॥ अज्ञेषु संभवो येषां ॥ अखंडितानि विज्ञानज्ञानैश्वर्याणि यस्य सः
तत्र विज्ञानं स्वरूपविषयं ॥ ज्ञानं बाह्यविषयं ॥३१॥ किंच यस्य पादसेवयाऊर्जितया पुष्टया आत्मविद्यातया

ये १ क्व शोकमोहौ स्नेहो वा भयं वा येऽज्ञसंभवाः ॥ क्व चाखंडितविज्ञानज्ञानैश्वर्यस्त्वखंडितः ॥३१॥
यत्पादसेवोर्जितयात्मविद्यया हिन्वंत्यनाद्यात्मविपर्ययग्रहं ॥ लभंत आत्मीयमनंत
मैश्वरं कुतो नु मोहः परमस्य सद्गतेः ॥३२॥ तं शस्त्रपूगैः प्रहरंतमोजसा सात्वं शरैः शौरिरमोघ
विक्रमः ॥ विद्ध्वाछिनद्वर्म धनुः शिरोमणिं सौभं च शत्रोर्गदया रुरोज सः ॥३३॥ तत्कृष्णहस्तेरि
तया विचूर्णितं पपात तोये गदया सहस्रधा ॥ विसृज्य तद्भूतलमास्थितो गदामुद्यम्य साल्वोऽ
च्युतमभ्यगाद्द्रुतं ॥३४॥ आधावतः सगदं तस्य बाहुं भल्लेन छित्वाथ रथांगमद्भुतं ॥ वधाय साल्व
स्य लयार्कसन्निभं बिभ्रद्बभौ सार्क इवोदयाचलः ॥३५॥

अनाद्यविद्याकृतो ॥ आत्मविपर्ययग्रहश्च ॥ अहं कृशः ॥ सुखी दुःखी इत्यादिलक्षणः ॥ तं हिन्वंति नाशयंति संतः ॥ ऐश्वरं प
दंच ॥ तस्य सत्तां गतेः कुतो नु मोह इति ततो नैतद्वचनं सत्यमित्यर्थः ॥३२॥ किं तत्सत्यं तदाह ॥ तं शस्त्रपूगैरिति त्रिभिः एवं

ह्न २

भा० द० उ० ८ ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ एवं श्रीकृष्णो महाबलान् पिंडयत्येवेति कृत्वा सकदाचिज्जरासंधादिभिर्निर्जित इति
१०६ गदयाभिहतोप्याजौ न चचाल यदूद्वहः ॥ कृष्णोऽपि तं महानृगुर्व्या कौमोदक्यास्तनांतरे ॥ ८ ॥ गदानिर्भि
न्नहृदय उद्वमन्रुधिरं मुखात् ॥ प्रसार्य केशबाह्वंघ्रीन्धरण्यां न्यपतद्व्यसुः ॥ ९ ॥ ततः सूक्ष्म
तरं ज्योतिः कृष्णमाविशदद्भुतम् ॥ पश्यतां सर्वभूतानां यथा चैद्यवधे नृप ॥ १० ॥ विदूरथस्तु त
द्भ्राता भ्रातृशोकपरिप्लुतः ॥ आगच्छदसिचर्माभ्यामुच्छ्वसंस्तज्जिघांसया ॥ ११ ॥ तस्य चापत
तः कृष्णश्चक्रेण क्षुरनेमिना ॥ शिरो जहार राजेंद्र सकिरीटं सकुंडलं ॥ १२ ॥ एवं सौभं च साल्वं
दंतवक्त्रं सहानुजम् ॥ हत्वा दुर्विषहानन्यैरीडितः सुरमानवैः ॥ १३ ॥ मुनिभिः सिद्धगंधर्वैर्वि
द्याधरमहोरगैः ॥ अप्सरोभिः पितृगणैर्यक्षैः किन्नरचारणैः ॥ १४ ॥ उपगीयमानविजयः कुसुमै
रभिवर्षितैः ॥ वृतश्च वृष्णिप्रवरैर्विवेशालंकृतां पुरीं ॥ १५ ॥ एवं योगेश्वरः कृष्णो भगवान् जग
दीश्वरः ॥ ईयते पशुदृष्टीनां निर्जितो जयतीति सः ॥ १६ ॥ श्रुत्वा युद्धोद्यमं रामः कुरूणां सह पांडवैः
तीर्थाभिषेकव्याजेन मध्यस्थः प्रययौ किल ॥ १७ ॥
पशुदृष्टीनामीयते ॥ नित्यजयेऽहेतवः योगेश्वरः ॥ भगवान् जगदीश्वर इति ॥ १६ ॥ विदूरथांतमामध्य पूतनादिदनोः कृ
१०६

कृष्णस्तत्पारमन्नागराज्ञामोहन्नस्तनवल्लो ॥ तत्रास
गमाह ॥ श्रुत्वेति ॥ १७ ॥

किंच ॥ हे कृष्ण त्वमस्माकं मातुलेयो बंधुः ॥ एवमपि मित्रध्रुक् ॥ मित्राणि घातितवान् ॥ मां च जिघांससि ॥ तस्माद
स्माकं त्वत्तो मृत्युः ॥ सनकाद्यनुग्रहं प्राप्तान्नंदूर्वीरः ॥ अतस्त्वामेतावन्मात्रमहं याचे किंतदाह ॥ हे अनंद सर्वो सहन
समर्थ त्वात्र धर्मेण सेवितुं गदयात्वं हि निष्पे प्रहरिष्यामि ॥ तामेकवारं सहस्वेति ॥ ननु वज्रकल्पां गदां को वा सहेत
नैवमित्याह ॥ अवज्रकल्पया ॥ उत्पलमालावदतिकोमलयेत्यर्थः ॥ ५ ॥ नन्वेवं हनने कस्तव पुरुषार्थस्तमाह त

त्वं मातुलेयो नः कृष्ण मित्रध्रुङ् मां जिघांससि ॥ अतस्त्वां गदया मंद हनिष्ये वज्रकल्पया ॥ ५ ॥ त
र्ह्यानृण्यमुपेम्यज्ञ मित्राणां मित्रवत्सलः ॥ बंधुरूपमरिं हत्वा व्याधिं देहचरं यथा ॥ ६ ॥ एवं रू
क्षैस्तुदन्वाक्यैः कृष्णं तोत्रैरिव द्विपं ॥ गदयाताडयन्मूर्ध्नि सिंहवद्व्यनदच्च सः ॥ ७ ॥ ॥ ५५ ॥

र्ह्यीति ॥ अज्ञोन विद्यते ज्ञो यस्मात्त ॥ हे सर्वज्ञेत्यर्थः ॥ परमार्थतस्तु स्वामिन्न मेतद्देहसंबंधेन बंधुरूपं ब्रह्मरूपेन शत्रु
त्वेन प्रतीतं त्वां हत्वा गत्वा मित्राणां मानृण्यमुपेष्यामि ॥ विशेषेण धीयते मनसि चिंत्यत इति व्याधिः ॥ देहे अंतर्या
मितया चरतीति तथा ॥ तमीश्वरं त्वात्र धर्मेणाराध्य ॥ हत्तेरोत्यर्थस्य ज्ञानार्थत्वात् ज्ञात्वेति वा ॥ तेन यथा पित्रादी
नामानृण्यमुपयाति तद्वदिति ॥ ६ ॥ रुक्षैरित्यादि प्रतीत्यभिप्रायेण ॥ तोत्रैः अंकुशप्रदिभिः ॥ ७ ॥ ॥ ५५ ॥ ५७

 ॐ विप्रानध्यास्तां ॥ अन्यद्वा किंचित्करोतु किं न वेत्ति चेत्तत्राह ॥ एतदर्थ इति ॥ धर्मध्वजिनः उत्तमलिंगधारिणः
 २७ ॥ भावित्वादिति ॥ न हि भवितव्यं केनापि परिहर्त्तुं शक्यत इत्यर्थः ॥ अहनत्ते ॥ २८ ॥ ते त्वया ॥ २९ ॥ अधार्मिकप्र
तिलोमजवधः कोयमधर्ममिति चेत्तत्राह ॥ अस्येति ॥ पुराणप्रवचनाय ॥ आत्मशरीरस्य नास्ति लोको यस्मिं

एतदर्थो हि लोकेस्मिन्नवतारो मया कृतः ॥ वध्या मे धर्मध्वजिनस्ते हि पातकिनोऽधिकाः ॥ २७ ॥
एतावदुक्त्वा भगवान्निवृत्तोऽसद्वधादपि ॥ भावित्वात्तं कुशाग्रेण करस्थेनाहनत्प्रभुः ॥ २८ ॥ हाहे
तिवादिनः सर्वे मुनयः खिन्नमानसाः ॥ ऊचुः संकर्षणं देवमधर्मस्ते कृतः प्रभो ॥ २९ ॥ अस्य ब्र
ह्मासनं दत्तमस्माभिर्यदुनंदन ॥ आयुश्चात्माक्लममेतावद्यावत्सत्रं समाप्यते ॥ अजानतैवाचरि
तस्त्वया ब्रह्मवधो यथा ॥ ३० ॥ योगेश्वरस्य भवतो नाम्नायोऽपि नियामकः ॥ अस्यैतद्ब्रह्महत्या
याः पावनं लोकपावन ॥ चरिष्यति भवांल्लोकसंग्रहोऽनन्यचोदितः ॥ ३१ ॥

स्तस्यायुश्च दत्तमिति ॥ ३० ॥ ब्रह्मवधेऽपि किं न मे ईश्वरस्येति चेत्सत्यमेव ॥ तथापि प्रायश्चित्तं कर्त्तव्यमित्या
शयेनाहुः ॥ योगेश्वरस्येति सार्द्धेन ॥ आम्नायो ब्राह्मणो न हंतव्य इत्यादिलक्षणः ॥ तथाप्येतस्याः ब्रह्म
हत्यायाः पावनं प्रायश्चित्तं हे लोकपावन ॥ अनन्यचोदितः स्वयमेव भवान् यदि करिष्यति ॥ तर्हि लोको

प्रतिश्रो[.]तं प्रतिलोमं ॥१९॥ सुदर्शनं तीर्थं ॥ चक्रं चक्रतीर्थं ॥१९॥ यमुनामनुयानिति तीर्थानि ॥ गंगामनुयानितानिस
र्वाणि गत्वा नैमिषारण्यं जगाम ॥२०॥ अभिप्रेत्य श्रीराम इति ज्ञात्वा ॥२१॥ महर्षेर्व्यासस्य ॥२२॥ सूतं प्रतिलोमजम् ॥ न कृतं प्र

स्नात्वा प्रभासे संतर्प्य देवर्षिपितृमानवान् ॥ सरस्वतीं प्रतिश्रोतं ययौ ब्राह्मणसंवृतः ॥१८॥ पृथूदकं बि
न्दुसरस्त्रितकूपं सुदर्शनं ॥ विशालं ब्रह्मतीर्थं च चक्रं प्राचीसरस्वतीं ॥१९॥ यमुनामनुयान्येव गंगामनु
चभारत ॥ जगाम नैमिषं यत्र ऋषयः सत्रमासते ॥२०॥ तमागतमभिप्रेत्य मुनयो दीर्घसत्रिणः ॥ अ
भिनंद्य यथान्यायं प्रणम्योत्थाय चार्चयन् ॥२१॥ सोर्चितः सपरीवारः कृतासनपरिग्रहः ॥ रोमह
र्षणमासीनं महर्षेः शिष्यमैक्षत ॥२२॥ अप्रत्युत्थायिनं सूतमकृतप्रह्वणांजलिं ॥ अध्यासीनं
च तान् विप्रान् चुकोपोद्वीक्ष्य माधवः ॥२३॥ कस्मादसाविमान् विप्रानध्यास्ते प्रतिलोमजः ॥ ध
र्मपालांस्तथैवास्मान् वधमर्हति दुर्मतिः ॥२४॥ ऋषेर्भगवतो भूत्वा शिष्योधीत्य बहूनि च ॥
सेतिहासपुराणानि धर्मशास्त्राणि सर्वशः ॥२५॥ अदांतस्याविनीतस्य वृथापंडितमानिनः ॥ न
गुणाय भवंति स्म नटस्येवाजितात्मनः ॥२६॥

कृतप्रह्वणमंजलिश्च येन तं ॥ अध्यासीनं च तान् तेभ्य उच्चैरासीनमित्यर्थः ॥२३॥२४॥ अज्ञानेनाध्यास्त इति चेत्तत्रैमि ८१
त्याह ॥ ऋषेरिति ॥२५॥ ननु वकुसः कथमेवं कुर्यात्तत्राह ॥ अदांतस्येति ॥ गुणाय यथोचितानुष्ठानाय ॥२६॥

भा०द०उ० विप्रानध्यास्तं ॥ अन्यद्वा किंचित्करोतु किं न वेति चेत्तत्राह ॥ एतदर्थ इति ॥ धर्मध्वजिनः उत्तमलिंगधारिणः
१०७ २७ भावित्वादिति ॥ नहि भवितव्यं केनापि परिहर्त्तुं शक्यत इत्यर्थः ॥ अहनत् ॥ २८ ॥ तेच्चया ॥ २९ ॥ अधार्मिकप्र
तिलोमजवधः ॥ कोयमधर्म इति चेत्तत्राहुः ॥ अस्येति ॥ पुराणप्रवचनाय ॥ आत्मशरीरस्य नास्ति क्लमो यस्मिं

एतदर्थो हि लोकेस्मिन्नवतारो मया कृतः ॥ वध्या मे धर्मध्वजिनस्ते हि पातकिनोधिकाः ॥ २७ ॥
एतावदुक्त्वा भगवान्निवृत्तोसद्वधादपि ॥ भावित्वात्तं कुशाग्रेण करस्थेनाहनत्प्रभुः ॥ २८ ॥ हाहे
तिवादिनः सर्वे मुनयः खिन्नमानसाः ॥ ऊचुः संकर्षणं देवमधर्मस्ते कृतः प्रभो ॥ २९ ॥ अस्य ब्र
ह्मासनं दत्तमस्माभिर्यदुनंदन ॥ आयुश्चात्माक्लमं तावद्यावत्सत्रं समाप्यते ॥ अजानतैवाचरि
तस्त्वया ब्रह्मवधो यथा ॥ ३० ॥ योगेश्वरस्य भवतो नाम्नायोपि नियामकः ॥ अद्यतद्ब्रह्महत्या
याः पावनं लोकपावन ॥ चरिष्यति भवांल्लोकसंग्रहोनन्यचोदितः ॥ ३१ ॥

त्सरायुश्च दत्तमिति ॥ ३० ॥ ब्रह्मवधेपि किं मम ईश्वरस्येति चेत्सत्यमेव ॥ तथापि प्रायश्चित्तं कर्त्तव्यमित्या
शयेनाहुः ॥ योगेश्वरस्येति सार्द्धेन ॥ आम्नायो ब्राह्मणो न हंतव्य इत्यादिलक्षणः ॥ तथाप्येतस्याः ब्रह्म
हत्यायाः ॥ पावनं प्रायश्चित्तं हे लोकपावन ॥ अनन्यचोदितः ॥ स्वयमेव भवान् यदि करिष्यति ॥ तर्हि लोको

१०७

प्रतिस्रोतं प्रतिलोमं ॥१७॥ सुदर्शनं तीर्थे ॥ चक्रं चक्रतीर्थे ॥१९॥ यमुनामनुयानि तीर्थानि ॥ गंगामनुयानि तानि
वाणि गत्वा नैमिषारण्यं जगाम ॥२०॥ अभिप्रेत्य श्रीरामइति ज्ञात्वा ॥२१॥ महर्षेर्व्यासस्य ॥२२॥ सूतं प्रतिलोमजम् ॥ नकृतं प्र

स्नात्वा प्रभासे संतर्प्य देवर्षिपितृमानवान् ॥ सरस्वतीप्रतिस्रोतं ययौ ब्राह्मणसंवृतः ॥१८॥ पृथूदकं वि
न्दुसरस्त्रितकूपं सुदर्शनं ॥ विशालं ब्रह्मतीर्थं च चक्रं प्राचीसरस्वतीं ॥१९॥ यमुनामनुयान्येव गंगामनु
चैव भारत ॥ जगाम नैमिषं यत्र ऋषयः सत्रमासते ॥२०॥ तमागतमभिप्रेत्य मुनयो दीर्घसत्रिणः ॥ अ
भिनंद्य यथान्यायं प्रणम्योत्थाय चार्चयन् ॥२१॥ सोऽर्चितः सपरीवारः कृतासनपरिग्रहः ॥ रोमह
र्षणमासीनं महर्षेः शिष्यमैक्षत ॥२२॥ अप्रत्युत्थायिनं सूतमकृतप्रह्वणांजलिं ॥ अध्यासीनं
च तान् विप्रान् चुकोपोद्वीक्ष्य माधवः ॥२३॥ कस्मादसाविमान्विप्रानध्यास्ते प्रतिलोमजः ॥ ध
र्मपालांस्तथैवास्मान् वधमर्हति दुर्मतिः ॥२४॥ ऋषेर्भगवतो भूत्वा शिष्योऽधीत्य बहूनि च ॥
सेतिहासपुराणानि धर्मशास्त्राणि सर्वशः ॥२५॥ अदांतस्याविनीतस्य वृथा पंडितमानिनः ॥ न
गुणाय भवंति स्म नटस्येवाजितात्मनः ॥२६॥

कृतमंजलिश्च येन तं ॥ अध्यासीनं च तान् तेभ्य उपरि आसीनमित्यर्थः ॥२३॥२४॥ अजानन्नध्यास्त इति चेन्नैव मि
त्याह ॥ ऋषेरिति ॥२५॥ ननु वक्तृत्वः कथमेवं कुर्यात्तत्राह ॥ अदांतस्येति ॥ गुणाय यथोचितानुष्ठानाय ॥२६॥ व१

भा०द०उ० प्रथमं तावदपेक्षितं कर्तव्यं कथयंति ॥ इल्वलस्येति द्वाभ्यां ॥३७॥३८॥ प्रायश्चित्तमाह ॥ तनस्थेति ॥ परीत्य प्रद
१०८ क्षिणीकृत्य सुसमाना दिग्गुणविशेषादेकाब्दमात्रमुक्तमिति न विरोधः ॥ सुसमाहितः ॥ कामक्रोधादिरहि

ऋषय ऊचुः ॥ इल्वलस्य सुतो घोरो बल्वलो नाम दानवः ॥ स दूषयति नः सत्रमेत्य पर्वणि पर्व
णि ॥१॥ तं पापं जहि दाशार्ह तन्नः शुश्रूषणं परं ॥ पूयशोणितविण्मूत्रसुरामांसाभिवर्षिणः ॥
२॥ ततश्च भारतं वर्षं परीत्य सुसमाहितः ॥ चरित्वा द्वादशमासांस्तीर्थस्नायी विमुच्यसे ॥३९॥ इति
श्रीमद्भागवते महापुराणे दशमस्कंधे उत्तरार्धे अष्टसप्ततितमोध्यायः ॥७८॥ श्रीशुक उवाच ॥ ततः पर्व
ण्युपावृत्ते प्रचंडः पांशुवर्षिणः ॥ भीमो वायुरभूद्राजन्पूयगंधस्तु सर्वशः ॥१॥ ततो मेध्यमयं व
र्षं बल्वलेन विनिर्मितं ॥ अभवद्यज्ञशालायां सोऽन्वदृश्यत शूलधृक् ॥२॥ तं विलोक्य बृह
त्कायं भिन्नांजनचयोपमं ॥ तप्ततामशिखाश्मश्रुं दंष्ट्रोग्रभ्रुकुटीमुखम् ॥३॥

तः चरित्वा कृच्छ्राणि ॥३९॥ इति दशमेऽष्टसप्ततितमः ॥७८॥ ऊनाशीतितमे रामो बल्वलं द्विजतुष्टये ॥ निह
त्य तीर्थस्नानाद्यैः सूतहत्यामपानुदत् ॥ उपावृत्ते प्राप्ते ॥१॥ भिन्नो विदीर्णो यः अंजनचयः तदुपमा यस्य तं ॥ अतिकृष्ण
तरमित्यर्थः ॥ तप्ततामवत् शिखाश्मश्रूणि च यस्य तं दंष्ट्राभिरुग्रं भ्रुकुटीयुतं मुखं यस्य तं ॥२॥३॥ १०८

वधस्यनिर्वेशंप्रायश्चित्तं प्रथमेकल्पेमुख्यकल्पेविधीयतां ॥ उपदिश्यतां ॥ ३२ ॥ किंच ॥ वत्स हे मुनयः ॥ एतस्यदीर्घमा
युः ॥ सत्वं वलं इंद्रियं तत्स्यारव ॥ अन्यच्चयद्वद्भिराशासितं ॥ अपेक्षितं तत्सर्वं ब्रूतं ॥ ३३ ॥ अस्त्वादीनां सत्यतायथाभवेत्
अस्माकं चवचः सत्यं यथाभवेत् ॥ तथाविधीयतामित्यर्थः ॥ ३४ ॥ तत्संपादयन्नाह ॥ आत्मावाइति ॥ अंगादंगात्संभव
सि ॥ हृदयादभिजायसे ॥ आत्मावैपुत्रनामासि ॥ संजीवशरदः शतमित्यादिवेदानुशासनं वेदवचनं ॥ तस्माद

श्रीभगवानुवाच ॥ करिष्येवधनिर्वेशं लोकानुग्रहकाम्यया ॥ नियमः प्रथमेकल्पेयावान्स
तु विधीयतां ॥ ३१ ॥ दीर्घमायुर्वत्तैतस्यसत्वमिन्द्रियमेव च ॥ आशासितं यत्तद्भूतसाधयेयोग
मायया ॥ ३२ ॥ ऋषय ऊचुः ॥ अस्त्रस्यतेववीर्यस्यमृत्युरस्माकमेव च ॥ यथाभवेद्वचः सत्यंत
थारामविधीयतां ॥ ३४ ॥ श्रीभगवानुवाच ॥ आत्मावैपुत्रउत्पन्नइतिवेदानुशासनं ॥ तस्मादस्य
भवेद्वक्ता आयुरिंद्रियसत्ववान् ॥ ३५ ॥ किंवः कामोद्विजश्रेष्ठावृताहं करवाण्यथ ॥ अजानतस्त्व
पचितिं यथा मे चिंत्यतां बुधाः ॥ ३६ ॥

स्यरोमहर्षणस्य पुत्रउग्रश्रवाः ॥ भवतां पुराणवक्ताभवे ॥
त्सच आयुरादिमांश्चभवेत् ॥ अतः सातोऽजीवनादस्यमृत्योश्चसत्यता पुत्ररूपेणचपुराणादिसिद्धेर्युष्मद्वचनस्या
पिसत्यतास्यादितिभावः ॥ ३४ ॥ किंच प्रथमंतावदपेक्षितं कथयत तदहं करिष्यामीत्याह ॥ किंवः काम इति ॥ किं वि षु
योवःकामोवर्त्ततेतद्ब्रूतेति ॥ अथानंतरं ब्रह्मदंडग्रहीत्वा ॥ अपचितिम् निष्कृतिमजानतामेहेबुधाः ॥ यथावत्सं

रत्तमपविविधित्ति ॥ ३६ ॥

भा० द० उ० श्रीशैलं श्रीपर्वतं ॥१३॥ कांचीपुरीं ॥१४॥ मथुरां च ॥१५॥१६॥१७॥ दक्षिणमर्णवं ॥ फाल्गुनमनंतपुरं ॥ पंचाप्सरसं स

१०९ स्कंदं दृष्ट्वा ययौ रामः श्रीशैलं गिरिशालयं ॥ द्रविडेषु महापुण्यं दृष्ट्वाद्रिं वेंकटं प्रभुः ॥१३॥ काम

कोष्णीं पुरीं कांचीं कावेरीं च सरिद्वरां ॥ श्रीरंगाख्यं महापुण्यं यत्र संनिहितो हरिः ॥१४॥ ऋषभाद्रिं

हरेः क्षेत्रं दक्षिणां मथुरां तथा ॥ समुद्रं सेतुमगमन्महापातकनाशनं ॥१५॥ तत्रायुतमदाद्धेनूर्ब्रा

ह्मणेभ्यो हलायुधः ॥ कृतमालां ताम्रपर्णीं मलयं च कुलाचलं ॥१६॥ तत्रागस्त्यं समासीनं नमस्कृ न ४

त्याभिवाद्य च ॥ योजितस्तेन चाशीर्भिरनुज्ञातो गतोऽर्णवं ॥१७॥ दक्षिणं तत्र कन्याख्यां दुर्गां

देवीं ददर्श सः ॥ ततः फाल्गुनमासाद्य पंचाप्सरसमुत्तमं ॥१८॥ विष्णुः संनिहितो यत्र स्नात्वास्प

र्शद्गवायुतं ॥ ततोऽभिव्रज्य भगवान्केरलादींस्त्रिगर्तकान् ॥१९॥ गोकर्णाख्यं शिवक्षेत्रं सान्नि

ध्यं यत्र धूर्जटेः ॥ आर्यां द्वैपायनीं दृष्ट्वा शूर्पारकमगाद्बलः ॥२०॥ तापीं पयोष्णीं निर्विंध्या

मुपस्पृश्याथ दंडकं ॥ प्रविश्य रेवामगमद्यत्र माहिष्मती पुरी ॥ मनुतीर्थमुपस्पृश्य प्रभासं पुन ती २

रः ॥१८॥ अस्पर्शत् ॥ अस्पृशत् ॥ केरलादीन् देशान् ॥१९॥ द्वीपमयनं यस्यास्तां ॥२०॥२१॥ रागमत् ॥२१॥

रामः ॥ १०९

४ || ५ || अरुणेन रुधिरेण दैत्यः शैलो यथा धातुभिः || ६ || ७ || श्रियो धामानि पंकजानि यस्यां तां || ८ || किंतसरःय

त्स्मार मुसलं रामः परसैन्यविदारणं || हलं च दैत्यदमनं ते तूर्णमुपतस्थतुः || ४ || तमाकृष्य हला
ग्रेण बल्वलं गगनेचरं || मुसलेनाहनत्क्रुद्धो मूर्द्ध्नि ब्रह्मद्रुहं बलः || ५ || सोऽपतद्भुवि निर्भिन्नलला
टोऽसृक्समुत्सृजन् || मुंचन्नार्त्तस्वरं शैलो यथा वज्रहतोऽरुणः || ६ || संस्तुत्य मुनयो रामं प्रयुज्यावि
तथाशिषः || अभ्यषिंचन्महाभागा वृत्रघ्नं विबुधा यथा || ७ || वैजयंतीं ददुर्मालां श्रीधामाम्लानपं
कजां || रामाय वाससी दिव्ये दिव्यान्याभरणानि च || ८ || अथ तैरभ्यनुज्ञातः कौशिकीमेत्य ब्राह्म
णैः || स्नात्वा सरोवरमगाद्यतः सरयूरास्रवत् || ९ || अनुस्रोतेन सरयूं प्रयागमुपगम्य सः || स्नात्वा
संतर्प्य देवादीन्जगाम पुलहाश्रमं || १० || गोमतीं गंडकीं स्नात्वा विपाशां शोण आप्लुतः || ग
यां गत्वा पितॄनिष्ट्वा गंगासागरसंगमे || ११ || उपस्पृश्य महेंद्राद्रौ रामं दृष्ट्वाभिवाद्य च || सप्त
गोदावरीं वेणीं पंपां भीमरथीं ततः || १२ ||

नइति || आश्रवत् उदगात् || ९ || अनुस्रोतेन अनुलोमतः || पुलहाश्रमं हरिक्षेत्रं || १० || गोमत्यां गंडक्यां विपाशा

आत्मनि अधिष्ठाने विश्वगं सर्वानुस्यूतं ॥ येनैव विदः पश्यंति तद्विशुद्धं विज्ञानं व्यतरत ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ इ
ति दशमे एकोनाशीतितमः ॥ ७९ ॥ अथाशीतितमे कृष्णः श्रीदामानं गृहागतं ॥ संपूज्यापृच्छदर्थं पृथुं गुरुकुलेक

तेभ्यो विशुद्धविज्ञानं भगवान्व्यतरद्विभुः ॥ येनैवात्मन्यदो विश्वमात्मानं विश्वगं विदुः ॥ ३१ ॥
स्वपत्न्यावभृथस्नातो ज्ञातिबंधुसुहृद्वृतः ॥ रेजे स्वज्योत्स्नयेवेंदुः सुवासाः सुष्ठ्वलंकृतः ॥ ३२ ॥
ईदृग्विधान्यसंख्यानि बलस्य बलशालिनः ॥ अनंतस्याप्रमेयस्य मायामर्त्यस्य संति हि ॥ ३३ ॥
योनुस्मरेत रामस्य कर्म्माण्यद्भुतकर्मणः ॥ सायंप्रातरनंतस्य विष्णोः स दयितो भवेत् ॥ ३४ ॥ इति
२ श्रीमद्भागवते महापुराणे दशमस्कंधैलदेवतीर्थयात्रावर्णने एकोनाशीतितमोध्यायः ॥ ७९ ॥
राजोवाच ॥ भगवन्यानि चान्यानि मुकुंदस्य महात्मनः ॥ वीर्याण्यनंतवीर्यस्य श्रोतुमिच्छाम
हे प्रभो ॥ १ ॥ को नु श्रुत्वासकृद्ब्रह्मन्नुत्तमश्लोकसत्कथाः ॥ विरमेत विशेषज्ञो विषण्णः काममार्गणैः ॥ २ ॥
व २

यांमुद्धा ॥ सुरारिमारको हरिः पुराचकार सांसतां ॥ नतः परं विनैव तं निजोपकारमाचरेत ॥ रामचरितानि श्रुत्वा
पुनर्मुकुंदवीर्याणि पृच्छति ॥ हे भगवन् श्रोतुमिच्छामेत्यन्वयः ॥ १ ॥ उत्तमश्लोकस्य सत्या मनोहराः ॥ विषयवे
त्तसज्जेनिकोः कथाः ॥ विशेषज्ञः सारवित् विषण्णः ॥ विषादप्राप्तः ॥ २ ॥ ११०

२२ ॥ विनशनं कुरुक्षेत्रं ॥ २३ ॥ विवक्षुर्वक्तुमिच्छुः ॥ किं वदिष्यतीति भियात्तूष्णीमासन्निति ॥ २४ ॥ २५ ॥ २६ ॥ अन्यः पराज

श्रुत्वा द्विजैः कथ्यमानं कुरुपांडवसंयुगे ॥ सर्वराजन्यनिधनं भारं मेने हृतं भुवः ॥ २२ ॥ स भीमदु
र्योधनयोर्गदाभ्यां युध्यतोर्मृधे ॥ वारयिष्यन् विनशनं जगाम यदुनंदनः ॥ २३ ॥ युधिष्ठिरस्तु
तं दृष्ट्वा यमौ कृष्णार्जुनावपि ॥ अभिवाद्याभवंस्तूष्णीं किं विवक्षुरिहागतः ॥ २४ ॥ गदापाणी
उभौ दृष्ट्वा संरब्धौ विजिगीषिणौ ॥ मंडलानि विचित्राणि चरंताविदमब्रवीत् ॥ २५ ॥ युवां तुल्य
बलौ वीरौ हे राजन् हे वृकोदर ॥ एकं प्राणाधिकं मन्ये उतैकं शिक्षयाधिकं ॥ २६ ॥ तस्मादेक
तरस्येह युवयोः समवीर्ययोः ॥ न लक्ष्यते जयोऽन्यो वा विरमत्वफलो रणः ॥ २७ ॥ न तद्वाक्यं
जगृहतुर्बद्धवैरौ नृपार्थवत् ॥ अनुस्मरंतावन्योन्यं दुरुक्तं दुष्कृतानि च ॥ २८ ॥ दिष्टं तदनुम
न्वानो रामो द्वारवतीं ययौ ॥ उग्रसेनादिभिः प्रीतैर्ज्ञातिभिः समुपागतः ॥ २९ ॥ तं पुनर्नैमिषं प्रा
प्तमृषयोऽयाजयन्मुदा ॥ क्रत्वंगं क्रतुभिः सर्वैर्निवृत्ताखिलविग्रहम् ॥ ३० ॥

योवारणः संग्रामः ॥ २७ ॥ अर्थवद्बद्धाकं ॥ २८ ॥ दिष्टं प्राचीनं कर्म समुपागतः ॥ २९ ॥ क्रत्वंगं यज्ञमूर्तिं ॥ ३० ॥ एम

॥१२॥१३॥ २॥

भा॰ द॰ उ॰ ॥१०॥ भोजवृष्ण्यंधकेश्वरइति ॥ तदंगीकारमात्रेणसर्वंवैदास्यतीतिभावः ॥११॥ नान्यभीष्टानु ॥ परिपाकविस्म

१२१ रणात् ॥ अप्यस्तिकिमस्तीतिप्रश्नः ॥१४॥ १५॥ मद्ध्येमम गुल्मानि रेखार्थसैन्यस्थानानि ॥ कक्षाः प्रतोल्यः ॥ श्रीः ॥ श्राय

ननुब्रह्मन्हि भवतः सखासाक्षाच्छ्रियःपतिः ॥ ब्रह्मण्यश्चशरण्यश्चभगवान्सात्वतर्षभः ॥९॥

तमुपेहिमहाभागसाधूनांचपरायणं ॥ दास्यतिद्रविणंभूरिसीदतेनेकुटुंबिने ॥१०॥ आस्तेऽधु

नाद्वारवत्यांभोजवृष्ण्यंधकेश्वरः ॥ स्मरतःपादकमलमात्मानमपियच्छति ॥११॥ किंन्वर्थकौ

मान्भजतोनान्यभीष्टान्जगद्गुरुः ॥ सएवंभार्ययाविप्रोबहुशःप्रार्थितोमुहुः ॥१२॥ अयं

हिपरमोलाभउत्तमश्लोकदर्शनं ॥ इतिसंचिंत्यमनसागमनायमतिंदधे ॥१३॥ अप्यस्त्युपाय

नंकिंचिद्गृहेकल्याणिदीयतां ॥ याचित्वाचतुरोमुष्टीन्विप्रान्पृथुकतंडुलान् ॥१४॥ चैलखंडेन

तान्बध्वाभर्त्रेप्रादादुपायनं ॥ सतानादायविप्राग्र्यःप्रययौद्वारकांकिल ॥१५॥ कृष्णसंदर्शनं

मह्यंकथंस्यादितिचिंतयन् ॥ त्रीणिगुल्मान्यतीयायतिस्रःकक्षाश्चसद्विजः ॥१६॥ विप्रोगम्यांधक

वृष्णीनांगृहेष्वच्युतधर्मिणां ॥ गृहंद्व्यष्टसहस्राणांमहिषीणांहरेर्द्विजः ॥ विवेशैकतमंश्रीमद्ब्रह्मा

नंदंगतोयथा ॥१७॥

अतिक्रम्यजगामसद्विजः ॥ द्विजैःसहितः ॥१६॥ ततश्चअगम्यायेऽंधकावृष्णयश्चतेषांगृहेषु ॥ तथाहरेर्द्व्यष्टसह

स्त्रीणां महिषीणां च ये गृहास्तेषु मध्ये श्रीमत् ॥ एकं तम गृहं विवेश ॥ तदा च द्विजो ब्रह्मानंदं गतो यथा तथा वर्णितं श्लो॰ ॥१७॥

१२१

कथाश्रवणस्तुस्तुवन॥दृष्टांततयाअन्यार्थोनाह॥सावागिति॥तावेवकरौ॥यौतत्कर्मकर्त्तारौ॥तदेवमनः॥यत्तस्थि
रजंगमेषुवसंतंसंस्मरेत॥यस्तस्यपुण्याःकथाःशृणोतिसएवकर्णौ॥३॥उभयलिंगंस्थिरजंगमंचतस्यैवलिंग
मितिमत्वाआनमेत्तदेवशिरः॥तदेवतस्यलिंगमिति॥एवंयत्पश्यतितदेवचक्षुः॥तान्येवांगानिपादोदकंभजंति
सावाग्ययातस्यगुणान्गृणातिकरौचतत्कर्मकरौमनश्च स्मरेद्वसंतंस्थिरजंगमेषुशृणोतितत
त्पुण्यकथाःसकर्णौ॥३॥शिरस्तुतस्योभयलिंगमानमेत्तदेवयत्पश्यतितद्धिचक्षुः॥अंगानिवि
ष्णोरथतज्जनानांपादोदकंयानिभजंतिनित्यं॥४॥सूतउवाच॥विष्णुरातेनसंपृष्टोभगवान्बा
दरायणिः॥वासुदेवेभगवतिनिमग्नहृदयोब्रवीत॥५॥श्रीशुकउवाच॥कृष्णस्यासीत्सखाकश्चि
ना२ द्ब्राह्मणोब्रह्मवित्तमः॥विरक्तइंद्रियार्थेषुप्रशांतात्माजितेंद्रियः॥६॥यदृच्छयोपपन्नेनवर्त्तमानो
गृहाश्रमी॥तस्यभार्याकुचैलस्यक्षुत्क्षामाचतथाविधा॥७॥पतिव्रतापतिंप्राहम्लायताववदने
नसा॥दरिद्रंसीदमानावैवेपमानाभिगम्यच॥८॥

६॥धृ॥ई॥तथाविधाकुचैला॥किंच॥क्षुत्क्षामा॥पत
किंचित्संपन्नंतस्मैपरिवेशयस्वयंक्षुधाजीर्णा॥७॥म्लायताशुष्यतासीदमानाभर्त्तुर्भोगसंपादनाशक्त्याव
सीदंती॥वेपमाना॥भयेनकंपमाना॥८॥रामरामरामरामराम रोराम॥॥

भा०द०३ भार्य्यां ऊढा। परिणीता। न वेति। गृहस्थभोगादर्शनाच्च संशयादिति प्रश्नः २६। अप्रतिषेधात् उद्वाहमनुमतं मत्वाह
११२ प्राय इति। तर्हि ते चित्तं। नूनमकामविहितं। कामैर्विहतं न भवति। इति वेदितं। न यथा हि धनेषु वै स्त्र्यादिषु नैवातिप्रीयसे॥
हे विद्वन्निति विदुषस्तवैतद्युक्तमिति भावः॥२८॥ कामहतत्वाभावे किं गृहधर्मक्लेशेनेत्याशंक्याह॥ केचिदिति द्वाभ्यां

श्रीभगवानुवाच॥ अपि ब्रह्मन्गुरुकुलाद्भवता लब्धदक्षिणात्। समावृत्तेन धर्मज्ञ भार्यो
ढा सदृशी न वा॥२७॥ प्रायो गृहेषु ते चित्तमकामविहितं तथा॥ नैवातिप्रीयसे विद्वन् धनेषु विदि
तं हि मे॥२८॥ केचित्कुर्वंति कर्माणि कामैरहतचेतसः॥ त्यजंतः प्रकृतीर्दैवीर्यथाहं लोकसंग्रहं
॥२९॥ कच्चिद्गुरुकुले वासं ब्रह्मन्स्मरसि नौ यतः॥ द्विजो विज्ञाय विज्ञेयं तमसः पारमश्नुते॥३०॥ स वै
सत्कर्मणां साक्षाद्द्विजातेरिह संभवः॥ आद्योंगयत्राश्रमिणां यथाहं ज्ञानदो गुरुः॥३१॥

ईश्वरमायारचिताः॥ प्रकृतीर्विषयवासनास्त्यजंतः॥ कामैरनाकृष्टचेतसामपि कर्मकरणे दृष्टांतः॥ यथाहमिति लोक
संग्रहं लोकस्य संग्रहणं यथा भवति तथा॥ अहमीश्वरोपि कर्माणि यथा करोमि तद्वत्॥२९॥ नौ आवयोर्यतो गुरोर्विज्ञे
यं परमात्मतत्त्वं च तमसः संसारस्य॥३०॥ तत्रात्मज्ञानप्रदस्य गुरोरेवात्यंतपूज्यत्वं वक्तुं पुरुषस्य त्रीन्गुरूनाह॥ स वा इति
इह संसारे यत्र प्रभवो जन्ममात्रं स पिता तावदाद्यः प्रथमं गुरुः पूज्यः कर्मविद्याप्रदं गुरुमाह॥ द्विजातेः सतः पुंसः सत्कर्म
णां यत्र संभवः उपनीय वेदाध्यापक इत्यर्थः॥ स द्वितीयो गुरुः॥ यथाहमीश्वरस्तथा प्रथमादपि पूज्य इत्यर्थः॥ प्रज्ञा

११२

पर्य्यग्रहीत्॥ पर्य्यरभत्॥१८॥ अब्बिंदून्॥ आनंदाश्रूणि॥१९॥ समर्हणं॥ उपायनं॥ उपहृत्य समर्प्य पादावनेज

तं विलोक्याच्युतो दूरात्प्रियापर्य्यंकमास्थितः॥ सहसोत्थाय चाभ्येत्य दोर्भ्यां पर्य्यग्रहीन्मुदा
॥१८॥ सख्युः प्रियस्य विप्रर्षेरंगसंगातिनिर्वृतः॥ प्रीतो व्यमुंचदब्बिंदून्नेत्राभ्यां पुष्करेक्षणः॥१९॥
अथोपवेश्य पर्य्यंके स्वयं सख्युः समर्हणं॥ उपहृत्यावनिज्यास्य पादौ पादावनेजनीः॥ अग्रही
च्छिरसा राजन्भगवांल्लोकभावनः॥२०॥ व्यलिंपद्दिव्यगंधेन चंदनागुरुकुंकुमैः॥ धूपैः सुरभि
भिर्मित्रं प्रदीपावलिभिर्मुदा॥२१॥ अर्चित्वावेद्य तांबूलं गां च स्वागतमब्रवीत्॥ कुचैलं मलिनं क्षा
मं द्विजं धमनिसंततं॥ देवी पर्य्यचरत्साक्षाच्चामरव्यजनेन वै॥२२॥ अंतःपुरजनो दृष्ट्वा कृष्णेनाम
लकीर्त्तिना॥ विस्मितोऽभूदतिप्रीत्या अवधूतं सभाजितं॥२३॥ किमनेन कृतं पुण्यमवधूतेन
भिक्षुणा॥ श्रिया हीनेन लोकेस्मिन् गर्हितेनाधमेन च॥२४॥ कथयां चक्रतुर्गाथाः पूर्वं गुरुकुले स
तोः॥ आत्मनो ललिता राजन्करौ गृह्य परस्परम्॥२६॥

नीरपः॥२०॥२१॥ धमनिभिः शिराभिः संततं व्याप्तं॥२२॥ अवधूतं मलिनं॥२३॥ विस्मयमाह किमनेनेति द्वाभ्यां॥२४॥ संभृतः
२ मू॰॥ योसौ त्रिलोकगुरुणा श्रीनिवासेन संभृतः॥ पर्य्यंकस्थां श्रियं हित्वा परिष्वक्तोग्रजो यथा॥२५॥

संपातिताः॥ ५८ सतीः समतीः पासमहिता॥ १२

भा०द०उ० ३८॥ उवाच कृपयाम्लोकत्रयीपयावयंकृतार्था इत्याह॥ अहो इति॥ आत्मादेहः॥ ३९॥ गुरोःनिःकृतं॥ प्रत्युपकारः सर्वे अर्थो
११३ यस्मात्स आत्मा देहः॥ तस्यार्पणं वियोगः॥ ४०॥ अयातयामानि॥ यातोयामोयस्य॥ पक्वस्यान्नस्य तद्गतसारं भवति त
द्वद्न्यदपिगतसारं भवेत्॥ गोरायाच्छत्वायातयाममित्युच्यते॥ अगतसाराणिछंदांसि॥ मंत्रोऽधीयमानानिभवंत्वित्यर्थः॥ ४१॥

एतत्हि दित्वा उद्दितेर वौसांदीपनिर्गुरुः॥ अन्वेषमाणोनः शिष्यानाचार्योऽपश्यदातुरान्॥ ३८॥ अहो
हे पुत्र काय्यमस्मदर्थे तिदुःखिताः॥ आत्मा वै प्राणिनांप्रेष्ठस्तमनादृत्यमत्पुराः॥ ३९॥ एतदेव हि सच्छि
ष्यैः कर्तव्यं गुरुनिष्कृतं॥ यद्वै विशुद्धभावेन सर्वार्थात्मार्पणं गुरो॥ ४०॥ तुष्टोऽहं वो द्विजश्रेष्ठाः सत्याः
संतु मनोरथाः॥ छंदांस्ययातयामानि भवंत्विह परत्र च॥ इत्थंविधान्यनेकानि वसतां गुरुवेश्मसु॥
गुरोरनुग्रहेणैव पुमान्पूर्णप्रशांतये॥ ४३॥ श्रीब्राह्मण उवाच॥ किमस्माभिरनिर्वृत्तं देवदेव जगद्गुरो॥
भवता सत्यकामेन येषांवासो गुरावभूत्॥ ४४॥ यस्य छंदोमयंब्रह्म देह आवपनं विभो॥ श्रेयसां तस्य गुरुषु वासो
ऽत्यंत विडंबनम्॥ ४५॥
नि१ इत्थंविधानि॥ एवंप्रकाराणि॥ अनेकानि वृत्तानि किंत्वयाऽस्मर्यंत इति शेषः॥ ४२॥
फलितमुपसंहरति गुरोरिति॥ अस्माभिः किमनिर्वृत्तं॥ असंपन्नं येषां॥ अस्माकं भवता सहवासोऽभूत्॥ ४३॥ भ
वतस्तु सर्वं विडंबनमात्रमेतदित्याह॥ यस्येति॥ छंदोमयं वेदाख्यं ब्रह्म तत्त्वाश्रेयसामयनं मेऽइव स्थानं देहो म ११३

ते २

श्रुतो ज्ञानप्रदं गुरुरूपमाश्रित्य ये संसारं तरंति ते बुद्धिमंत इत्याह ॥ नन्विति ॥ हे ब्रह्मन् ते ॥ ननु वर्णाश्रमवतां मध्ये अर्थकोविदाः
इह मनुष्यजन्मनि ॥ तत्रापि वर्णाश्रमे सति ये मया गुरुणा गुरुरूपेण वक्त्रा वाचा उपदेशमात्रेणांजः सुखेनैव भवार्णवं तरंति ॥ ३२ ॥ दि ३
ज्ञानप्रदो गुरुरधिकः स च मत्तो नास्तीत्युक्तं मम ॥ अत एव तद्धर्मकोऽधर्मोऽप्यन्यो नास्तीत्याह नाहमिति ॥ इज्या गृहस्थधर्मः प्रजातिः प्र
पनं ४ कृष्टजन्म उपनीतिः तेन ब्रह्मचारिधर्मः उपलक्ष्यते ॥ ताभ्यां तपसा वनस्थधर्मेण उपशमेन यतिधर्मेण च अहं परमेश्वरः ॥ तथा न

नन्वर्थकोविदा ब्रह्मन्वर्णाश्रमवतामिह ॥ ये मया गुरुणा वाचा तरंत्यंजो भवार्णवं ॥ ३२ ॥ नाहमिज्या
प्रजातिभ्यां तपसोपशमेन च ॥ तुष्येयं सर्वभूतात्मा गुरुशुश्रूषया यथा ॥ ३३ ॥ अपि नः स्मर्यते ब्रह्मन्वृ
त्तं निवसतां गुरौ ॥ गुरुदारैश्चोदितानामिंधनानयने क्वचित् ॥ ३४ ॥ प्रविष्टा नाम हारण्यमपत्तौ सुमहद्
द्विजौ ॥ वातवर्षमभूत्तीव्रं निष्ठुराः स्तनयित्नवः ॥ ३५ ॥ सूर्यश्चास्तंगतस्तावत्तमसा चावृता दिशः ॥ निम्नं
कूलं जलमयं न प्राज्ञायत किंचन ॥ ३६ ॥ वयं भृशं तत्र महानिलांबुभिर्निहन्यमाना मुहुरंबुसंप्लवे ॥ दिशो
विदंतोऽथ परस्परं वने गृहीतहस्ताः परिबभ्रिमातुराः ॥ ३७ ॥

तुष्येयं ॥ यथा सर्वभूतात्मापि गुरुशुश्रूषयेति ॥ ३३ ॥ किंच ॥ अस्माकं गुरुशुश्रूषणं किमपि देवादेव संपन्नमेतत् ॥ किं तु यास्मर्यत इति
गुरौ निवसतामस्माकं यत्किमपि वृत्तं क्वचित्कदाचित् ॥ ३४ ॥ अपत्तौ अपगते अस्ते ॥ अकाल इत्यर्थः ॥ वातश्च वर्षं च तयोः समा
हारः ॥ स्तनइत्नवो गर्जितानि चाभवन् ॥ ३५ ॥ निम्नं कूलं नतमुन्नतं च स्थानं ॥ ३६ ॥ अंबुना संप्लवः व्याप्तिः यस्मिन्वने इत्यर्थः ॥ ३७ ॥

अतिजीर्णत्वात् इसनस्य पुनस्तन्मध्ये चीरेणावद्धान् ॥८॥ अंग हे सखे मां विश्वं विश्वात्मानं मां ॥९॥ इति वदन्नेकां मुष्टिं
जग्धा तत्परेति ॥१०॥ अयं भावः एतावता पुंसः इहामुत्र च चमत्कारकाः ये विलासभूताः सर्वसंपदः समृद्धये अलं ॥ अतः प
द्वितीयमुष्टिः अदनेन मामेवैदधीनां कुर्विति ॥ तत्तोषकारणं तत्तोषस्य कारणं यथा भवेत् तथा सर्वसंपत्समृद्धये

इत्थं विचिंत्य वसनाच्चीरबद्धान्द्विजन्मनः ॥ स्वयं जहार किमिदमिति पृथुकतंडुलान् ॥८॥ ननन्वे
तदुपनीतं मम परमप्रीणनं सखे ॥ तर्पयंत्यंग मां विश्वमेते पृथुकतंडुलाः ॥९॥ इति मुष्टिं सकृज्जग्ध्वा
द्वितीयां जग्धुमाददे ॥ तावच्छ्रीर्जगृहे हस्तं तत्परा परमेष्ठिनः ॥१०॥ एतावतालं विश्वात्मन्सर्व
संपत्समृद्धये ॥ अस्मिंल्लोकेऽथवामुष्मिन्पुंसस्त्वत्तोषकारणं ॥११॥ ब्राह्मणस्तां तु रजनीमुषित्वा
ऽच्युतमंदिरे ॥ भुक्त्वा पीत्वा सुखं मेने आत्मानं स्वर्गतं यथा ॥१२॥ श्वोभूते विश्वभावेन स्वसुखेना
भिवंदितः ॥ जगाम स्वालयं तात पथ्यनुव्रज्य नंदितः ॥१३॥ स चालब्ध्वा धनं कृष्णान्न तु याचित
वान्स्वयम ॥ स्वगृहान्व्रीडितो गछन्महद्दर्शननिर्वृतः ॥१४॥

यां भक्त्यस्य समर्पितं दृष्ट्वा लंब तुष्यं इत्यर्थः
११ स्वर्गतं स्वर्गवासिनं ॥१२॥ श्वोभूते उदिते रवौ विश्वं भावयतीति विश्वभावनः ॥ तेनेति ॥ पुरतो भावनमिंद्रं दुर्ल
भं विभवं सूचयति ॥ स्वसुखेन स्वानंदपूर्णेनेति ॥ दानेदीनतां दर्शयति ॥ नंदितो विनयोक्तिभिः ॥१३॥ व्रीडितः स्व

चित्तकां पीयेन लज्जितः महत्तः श्रीकृष्णस्य दर्श॥
नेन निर्वृत्तः ॥१४॥

वे २

इति दशमे अशीतितमः ॥ ८० ॥ एकाशीतितमे सख्युर्जग्ध्वा पृथुकतंडुलान् ॥ श्रियं निर्मितवान् इंद्रदुर्लभां तु तदाश्र-
मे ॥ संकथयन् ॥ सुखगोष्ठीं कुर्वन् सर्वज्ञः ॥ सर्वभूतानां मनसोऽभिज्ञः ॥ मदर्थे पृथुका नानीय दातुं लज्जते इति जानन्नित्य

इति श्रीमद्भागवते महापुराणे दशमस्कंधे भगवद्ब्राह्मणसंवादे अशीतितमोऽध्यायः ॥ ८० ॥ श्रीशुक उवाच ॥
स इत्थं द्विजमुख्येन सह संकथयन् हरिः ॥ सर्वभूतमनोभिज्ञः स्मयमान उवाच ह ॥ १ ॥ ब्रह्मण्यो ब्राह्मणं
कृष्णो भगवान् प्रहसन् प्रियम् ॥ प्रेम्णा निरीक्षणेनैव प्रेक्षन् खलु सतां गतिः ॥ २ ॥ श्रीभगवानुवाच ॥ किमुपाय-
नमानीतं ब्रह्मन् मे भवता गृहात् ॥ अण्वप्युपाहृतं भक्तैः ॥ प्रेम्णा भूर्येव मे भवेत् ॥ भूर्यप्यभक्तोपहृतं न मे
तोषाय कल्पते ॥ ३ ॥ पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ॥ तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥
४ ॥ इत्युक्तोऽपि द्विजस्तस्मै व्रीडितः पतये श्रियः ॥ पृथुकप्रसृतिं राजन् न प्रायच्छदवाङ्मुखः ॥ ५ ॥ सर्वभूता-
त्मदृक् साक्षी तस्यागमनकारणं ॥ विज्ञायाचिंतयन्नायं श्रीकामो माभजत्पुरा ॥ ६ ॥ पत्न्याः पतिव्रता-
यास्तु सखा प्रियचिकीर्षया ॥ प्राप्तो मामस्य दास्यामि संपदोऽमर्त्यदुर्लभाः ॥ ७ ॥ ॥ ॥ ऽऽ ॥ ॥

र्थः ॥ १ ॥ प्रहसन् क्ष्वेलीं कुर्वन् ॥ २ ॥ लज्जया तु अकथयतस्तामुपानुदन्नाह ॥ अ एवीति द्वाभ्यां ॥ ३ ॥ ४ ॥ ५ ॥ सर्वभूताना-
मात्मदृक् ॥ अंतःकरणसाक्षी ॥ ६ ॥ अमर्त्यानां देवानामपि दुर्लभाः ॥ ७ ॥ ॥ ऽऽ ॥ ॥ रामरामराम ॥ ॥ ऽऽ ॥

भा०द०उ० किंच ॥ जुष्टमिति ॥ हरिणीनामिवाक्षीणि यासां ताभिः ॥ तदैश्वर्यं दृष्ट्वा वितर्कितवान् ॥ तदाह ॥ किमिदं ॥ प्रथमं तेजःपुंजं
११५ दृष्ट्वा किमिति पश्चाद्विमानानि दृष्ट्वा कस्य वेति ॥ स्थानं च स्वीयमिति ज्ञात्वा कथं तदिदं स्थानमिति ॥ एवं रूपमभूदिति ॥ २३ ॥
अमरप्रभाः ॥ तत्तुल्यकांतयः ॥ प्रत्यगृह्णन् ॥ उपायनादिभिराहृतवंतः ॥ २४ ॥ उद्धतो हर्षो यस्याः सा अतिसंभ्रमः आ

जुष्टं स्वलंकृतैः पुंभिः स्त्रीभिश्च हरिणाक्षिभिः ॥ किमिदं कस्य वा स्थानं कथं तदिदमित्यभूत् ॥ २३ ॥ ए
वं मीमांसमानं तं नरा नार्योऽमरप्रभाः ॥ प्रत्यगृह्णन्महाभागं गीतवाद्येन भूयसा ॥ २४ ॥ पतिमागत
माकर्ण्य पत्न्युद्धर्षातिसंभ्रमा ॥ निश्चक्राम गृहात्तूर्णं रूपिणी श्रीरिवालयात् ॥ २५ ॥ पतिव्रता पतिं
दृष्ट्वा प्रेमोत्कंठाश्रुलोचना ॥ मीलिताक्ष्यनमद्बुद्ध्या मनसा परिषस्वजे ॥ २६ ॥ पत्नीं वीक्ष्य विस्फुरंतीं
देवीं वैमानिकीमिव ॥ दासीनां निष्ककंठीनां मध्ये भांतीं स विस्मितः ॥ २७ ॥ प्रीतः स्वयं तया युक्तः प्र
विष्टो निजमंदिरं ॥ मणिस्तंभशतोपेतं महेंद्रभवनं यथा ॥ २८ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ॥

दरो यस्याः सा आलयात् ॥ कमलवनात् ॥ रूपधारिणी श्रीरिव ॥ स्वर्गस्य तत्र भगवतानीतत्वात् ॥ स्वर्गिणामि
व तयो रूपं वभूवेति भावः ॥ २५ ॥ बुद्ध्यात्रयमेव वंध इति निश्चयेन ॥ मनसा संकल्पेन ॥ २६ ॥ २७ ॥ २८ ॥

निर्वृत्तिमेवाह ॥ अहो इति चतुर्भिः ॥ यत्र यतः ॥ लक्ष्मीमुरसि बिभ्रता आश्लिष्टः ॥ १५ ॥ पापीयान्नीचः ॥ १६ ॥ पूजितश्चंद
नलेपनादिभिः ॥ एवं संपद्यापि धनस्यादाने कारणं ॥ तथापि कारुणिकत्वाद्भूर्य्यपि धनं मह्यं नाददात् ॥ १९ ॥ २० ॥ निजगृ

अहो ब्रह्मण्यदेवस्य दृष्टा ब्रह्मण्यता मया ॥ यद्दरिद्रतमो लक्ष्मीमाश्लिष्टो बिभ्रतोरसि ॥ १५ ॥ क्वाहं दरिद्रः पापी
यान् क्व कृष्णः श्रीनिकेतनः ॥ ब्रह्मबंधुरिति स्माहं बाहुभ्यां परिरंभितः ॥ १६ ॥ निवासितः प्रियाजुष्टे प
र्यंके भ्रातरो यथा ॥ महिष्या वीजितः श्रांतो वालव्यजनहस्तया ॥ १७ ॥ स्वर्गापवर्गयोः पुंसां रसायां भुवि
संपदां ॥ सर्वासामपि सिद्धीनां मूलं तच्चरणार्चनं ॥ १८ ॥ शुश्रूषया परमया पादसंवाहनादिभिः ॥ पू
जितो देवदेवेन विप्रदेवेन देववत् ॥ १९ ॥ अधनोयं धनं प्राप्य माद्यन्नुच्चैर्न मां स्मरेत् ॥ इति कारुणि
को नूनं धनं मेऽभूरि नाददात् ॥ २० ॥ इति संचिंतयन्नंतः प्राप्तो निजगृहांतिकं ॥ सूर्यानलेंदुसंका
शैर्विमानैः सर्वतो वृतं ॥ २१ ॥ विचित्रोपवनोद्यानैः कूजद्द्विजकुलाकुलैः ॥ प्रोत्फुल्लकुमुदांभोजकह्ला
रोत्पलवारिभिः ॥ २२ ॥

हस्यांतिकं प्राप्तं तस्य विशेषणं ॥ सूर्येति ॥ २१ ॥ विचित्रोपवनादिभिश्च वृतं ॥
कथंभूतैः ॥ कूजद्भिर्द्विजकुलैः पक्षिसमूहैः आकुलैः व्याप्तैः ॥ तथा प्रोत्फुल्लानि कुमुदादीनि येषु तानि तथा

कृ॰

भा०द०उ नसचेद्वदवलोकनमात्रेणमहदैश्वर्यंदत्तवान्॥ तर्हीदंतुभ्यंदत्तमितिकिंनावोचदतआह॥नन्विति॥ननुमेसखास
११६ मक्षमब्रुवाणएवयाचिष्णवेयाचकायभूरिवह्वपिदिशतेददाति॥अत्रहेतुः॥भूरिभोजः॥स्वयंतद्देयंपर्जन्यवदी
क्षमाणइति॥अयमर्थः॥स्वयंतावद्भूरिभोजः॥वहुभोजः॥प्राप्तकामत्वात्॥लक्ष्मीपतित्वाच्च॥अतोयथापारावारपरि
पूरकोपितवदान्यःकदाचिद्बह्वपिवर्षमल्पमेवमन्यमानोलज्जयैवसमक्षमवर्षन्॥रात्रौनिद्राणकर्षकेतत्क्षेत्रे
माप्लावयति॥एवंश्रीकृष्णोपिस्वभोग्यापेक्षयातद्देयमिन्द्रादिपदमतितुच्छमन्वानःतस्यैवभजनेवहुमन्यमानःसमी

नन्वब्रुवाणोदिशतेसमक्षंयाचिष्णवेभूर्यपिभूरिभोजः॥पर्जन्यवत्तत्स्वयमीक्षमाणोदाशार्हकाणामृष
भःसखामे॥३४॥किंचित्करोत्युर्वपियत्स्वदत्तंसुहृत्कृतंफल्ग्वपिभूरिकारी॥मयोपनीतंपृथुकैकमुष्टिंप्रत्य
ग्रहीत्प्रीतियुतोमहात्मा॥३५॥तस्यैवमेसौहृदसख्यमैत्रीदास्यंपुनर्जन्मनिजन्मनिस्यात्॥महानुभा
वेनगुणालयेनविषज्जतस्तत्पुरुषप्रसंगः॥३६॥

क्षमाणएवददातीति॥३४॥तदेवाह किंचिदिति॥उरुवह्वपिस्वदत्तंकिं
यत्किंचित्करोति॥अल्पंमन्यते॥सुहृत्कृतंफल्ग्वपितुच्छमपिभूरिकारीवहुमन्यतइत्यर्थः॥अतएवमयाउपनीतंप्रीतियु
तः॥स्वयमेवप्रतिगृहीतवान्॥३५॥श्रीकृष्णस्यभक्तवात्सल्यंदृष्ट्वातद्भक्तिंप्रार्थयते॥तस्येति॥सौहृदंप्रेम॥सख्यं
हिताशंसनं॥मैत्रीउपकारत्वंचदास्यंसेवकत्वंचतत्समाहारैकवचनंस्यात्तत्सर्वंधिनोमेममस्यात्॥नतुविभूतिः॥किंच
महानुभावेनतेनैवविषज्जतोविशेषेणसंगंप्राप्नुवतस्तद्भक्तेषुप्रकृष्टःसंगःस्यादिति॥३६॥

तत्र मंदिरे पयःफेननिभाः शय्यास्त्रास्तरणानीत्यादिसंपदः ॥ तत्र सर्वसंपदां समृद्धीर्विलोक्य तर्कयामासेति चतुर्थेना
न्वयः यत्र दांताः गजदंतमयाः पर्यंकाः ॥ २९ ॥ यत्र आसनानि च मृदूपस्तरणानि तूलादिमयानि येषु तानि ॥ यत्र मु

पयःफेननिभाः शय्या दांता रुक्मपरिच्छदाः ॥ पर्यंका हैमदंडानि चामरव्यजनानि च ॥ २९ ॥ आस
नानि च हैमानि मृदूपस्तरणानि च ॥ मुक्तादामविलंबीनि वितानानि द्युमंति च ॥ ३० ॥ स्वच्छस्फटिक
कुड्येषु महामारकतेषु च ॥ रत्नदीपा भ्राजमाना ललना रत्नसंयुताः ॥ ३१ ॥ विलोक्य ब्राह्मणस्तत्र स
मृद्धीः सर्वसंपदां ॥ तर्कयामास निर्व्यग्रः स्वसमृद्धिमहैतुकीम् ॥ ३२ ॥ नूनं बतैतन्मम दुर्भग
स्य शश्वद्दरिद्रस्य समृद्धिहेतुः ॥ महाविभूतेरवलोकतोऽन्यो नैवोपपद्येत यदूत्तमस्य ॥ ३३ ॥

क्तादामविलंबंति द्युमंति च वितानानि ॥ ३० ॥ ३१ ॥ निर्व्यग्रः सुस्थिरः सन् ॥ अहैतुकीमाकस्मिकीं स्वस्य समृद्धिं
तर्कयामास ॥ ३२ ॥ कुत एषा समृद्धिमागतेति निश्चिनोति ॥ नूनमिति ॥ एतन्ममेति एष चासावहं च तस्य तन्मम
महति विभूतिर्यस्य तस्यावलोकनादन्यत् ॥ ३३ ॥ ॥ ५५ ॥

भा०द०उ ह्यशीतितमेआगत्यकुरुक्षेत्रंरविग्रहे॥ वृष्णीन्दृष्ट्वामुदाभूपास्वस्कंधः कृष्णकथामिथः॥१॥ श्रीदामसु
११७ हृदेकृष्णःप्रक्षाल्यैंद्रपदंभुवि॥ नंदादिसुहृदानंदीकुरुक्षेत्रंजगामसः॥४॥ कल्पक्षयेयथासर्वग्रासइत्यर्थः॥१॥
ज्योतिर्विद्भिः॥ कथ्यमानमादावेवज्ञात्वास्यमंतपंचकंकुरुक्षेत्रंजग्मुः॥२॥ अब्रह्मण्यक्षत्रियवधस्थानत्वे

श्रीशुकउवाच॥ अथैकदाद्वारवत्यांवसतोरामकृष्णयोः॥ सूर्योपरागःसुमहानासीत्कल्पक्ष
येयथा॥१॥ तंज्ञात्वामनुजाराजन्पुरस्तादेवसर्वशः॥ स्यमंतपंचकंक्षेत्रंययुःश्रेयोविधित्स
या॥२॥ निःक्षत्रियांमहींकुर्वन्रामःशस्त्रभृतांवरः॥ नृपाणांरुधिरौघेणयत्रचक्रेमहाह्र
दान्॥३॥ ईजेचभगवान्रामोयत्रास्पृष्टोपिकर्मणा॥ लोकस्यग्राहयन्नीशोयथान्योघाप
नुत्तये॥४॥ महत्यांतीर्थयात्रायांतत्रागन्भारतीःप्रजाः॥ वृष्णयश्चतथाक्रूरवसुदेवाहुकादयः
॥५॥ ययुर्भारततत्क्षेत्रंस्वमघंक्षपयिष्णवः॥ गदप्रद्युम्नसांबाद्याःसुचंद्रशुकसारणैः॥ आस्तेनिरुद्धोर
क्षायांकृतवर्माचयूथपः॥६॥

नपरशुरामस्याघापनुत्तिस्थानंचक्षेत्रस्यपापनिरासकत्वमाह॥ निःक्षत्रियामितिद्वाभ्यां॥३॥ अन्योविद्वानय
था॥४॥ आगन्॥ आजग्मुः॥ भारतीः भारत्यः॥५॥ सुचंद्रसुकसारणैः सहानिरुद्धोद्वारकायाः रक्षार्थमास्ते॥ तथाहे ११७

ननु भक्तेः फलसंपदं प्राप्य पुनर्भक्तिं किं किमिति प्रार्थयसे तत्राह ॥ भक्तायेति ॥ संपदः कोशादीन् ॥ राज्यमैश्वर्यं विभूतीः
कलत्रपुत्रादीन् न स्पृहयति ॥ न ददाति ॥ अपितु दृढां भक्तिमेव ॥ कुतः ॥ अदीर्घबोधाय ॥ अविवेकिने ॥ मम तु भक्त्यभावा
देवं ज्ञात्वा मत्तस्तद्भक्तिरेव स्यादिति भावः ॥ ३७ ॥ त्यक्त्वा न शनैस्त्यागमभ्यसन् ॥ जायया सह वुभुजे ॥ ३८ ॥ श्रीकृष्णस्यैव

भक्ताय चित्रा भगवान् हि संपदो राज्यं विभूतीर्न समर्थयत्यजः ॥ अदीर्घबोधाय विचक्षणः स्वयं
पश्यन्निपातं धनिनां मदोद्भवं ॥ ३७ ॥ इत्थं व्यवसितो बुद्ध्या भक्तोतीव जनार्दने ॥ विषयान् जाययात्य
क्तान् वुभुजे नातिलंपटः ॥ ३८ ॥ तस्य वै देवदेवस्य हरेर्यज्ञपतेः प्रभोः ॥ ब्राह्मणाः प्रभवो दैवं न तेभ्यो
विद्यते परं ॥ ३९ ॥ एवं स विप्रो भगवत्सुहृत्तदा दृष्ट्वा स्वभृत्यैरजितं पराजितं ॥ तद्ध्यानवेगोद्ग्रथिता
त्मबंधनस्तद्धाम लेभे चिरतः सतां गतिं ॥ ४० ॥ एतद्ब्रह्मण्यदेवस्य श्रुत्वा ब्रह्मण्यतां नरः ॥ लब्धभा
वो भगवति कर्मबंधाद्विमुच्यते ॥ ४१ ॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे ब्राह्मणसंवा
दे एकाशीतितमोध्यायः ॥ ८१ ॥

ण्यतां नातिचित्रमित्याह ॥ तस्येति ॥ ३९ ॥ अन्यैरजितमपि स्वभृत्यैः पराजितं दृष्ट्वा तस्य ध्यानं तस्य वेग
स्तेनोद्ग्रथितमात्मबंधनमहंकारो यस्य सः ॥ गतिमित्याविष्टलिंगं ॥ धामविशेषणं ॥ सतां ब्रह्मविदां प्राप्यमित्यर्थः

भा० द० उ० प्रोत्फुल्लैः हृद्वक्त्रसरोरुहैः श्रीः शोभा येषां ते ॥१५॥ अतिसौहृदेन यत्स्मितं तेनामलापांगो दृशो दृष्टयो या
११८ सां ताः मिथः संवीक्ष्य दोर्भिरभिरेभिरे ॥ आलिंगनं कृतवत्यः ॥१६॥ ॥१७॥ संकथया मिथः सप्रेमगोष्ठ्या ॥१८॥ तामेव वसु

अन्योन्यसंदर्शनहर्षरंहसा प्रोत्फुल्लहृद्वक्त्रसरोरुहश्रियः ॥ आश्लिष्य गाढं नयनैः स्रवज्जला हृष्यत्त्वचो रुद्धगिरो ययुर्मुदं ॥१५॥ स्त्रियश्च संवीक्ष्य मिथोतिसौहृदस्मितामलापांगदृशोभिरेभिरे ॥ स्तनैः स्तनान्कुंकुमपंकरूषितान्निहत्य दोर्भिः प्रणयाश्रुलोचनाः ॥१६॥ ततोभिवाद्य ते वृद्धान्यविष्टैरभिवादिताः ॥ स्वागतं कुशलं पृष्ट्वा चक्रुः कृष्णकथा मिथः ॥१७॥ पृथा भ्रातॄन्स्वसॄर्वीक्ष्य तत्पुत्रान्पितरावपि ॥ भ्रातृपत्नीर्मुकुंदं च जहौ संकथया शुचः ॥१८॥ कुंत्युवाच ॥ आर्य भ्रातरहं मन्ये आत्मानमकृताशिषं ॥ यद्वा आपत्सु मद्वार्त्तां नानुस्मरथ सत्तमाः ॥१९॥ सुहृदो ज्ञातयः पुत्रा भ्रातरः पितरावपि ॥ नानुस्मरंति स्वजनं यस्य दैवमदक्षिणं ॥२०॥

देवपृथयोः संकथामाह ॥ आर्येत्यादि चतुर्भिः ॥ अकृताशिषमपूर्णमनोरथं ॥१९॥ यस्य दैवमदक्षिणं अनुकूलं तं स्वजनमपि संतः सुहृदादयो नानुस्मरंति ॥ ततो ममैव दैवं प्रतीकूलं युष्माकं कोपराध इत्यर्थः ॥२०॥ ५

देवधिष्ण्याभैः विमानसंकाशैः॥ तरलास्तुरंगास्त इव जवेगतिर्येषां तैः॥ विद्याधरद्युतिभिः॥ विद्याधराणामिव
द्युतिर्येषां तैः॥७॥ महातेजाः महातेजसः दिव्याः स्रत्युत्तमाः स्रग्वस्त्रसन्नाहा येषां ते॥८॥ ९॥ पुनरन्यद्युराप्लुत्य य...

तोऽथ देवधिष्ण्याभैर्हयैश्च तरलप्लवैः॥ गजैर्नदद्भिरभ्राभैर्नृभिर्विद्याधरद्युभिः॥७॥ व्यरोचंत महा
तेजाः पथि कांचनमालिनः॥ दिव्यस्रग्वस्त्रसन्नाहाः कलत्रैः खेचरा इव॥८॥ तत्र स्नात्वा महाभा
गा उपोष्य सुसमाहिताः॥ ब्राह्मणेभ्यो ददुर्धेनूर्वासःस्रग्रुक्ममालिनीः॥९॥ रामह्रदेषु विधिव
दुनराप्लुत्य वृष्णयः॥ ददुः स्वन्नं द्विजाग्र्येभ्यः कृष्णे नो भक्तिरस्त्विति॥१०॥ स्वयं च तदनुज्ञाता वृ
ष्णयः कृष्णदेवताः॥ भुक्त्वोपविविशुः कामं स्निग्धच्छायांघ्रिपांघ्रिषु॥११॥ तत्रागतांस्ते ददृशुः
सुहृत्संबंधिनो नृपान्॥ मत्स्योशीनरकौशल्यविदर्भकुरुसृंजयान्॥१२॥ कांबोजकैकयान्म
न२ द्रान्कुंतीनानर्तकेरलान्॥ अन्यांश्चैवात्मपक्षीयान्परांश्च शतशो नृप॥१३॥ नंदादीन्सुहृ
दो गोपान्गोपीश्चोत्कंठिताश्चिरं॥१४॥
तस्मिन्नेवाहनि मुक्तिस्नानं कृत्वा॥१०॥ स्निग्धा शीतला छाया येषामंघ्रिपाणां तेषां अंघ्रिमूलेषु॥११॥ ॥१८॥१९॥१८॥

भा० द० उ० किंच ॥ न केवलं तस्य दर्शनमेव त्वयं तद्दुर्लभं बह्वूनां युष्माकं स्वतः संपन्नमित्याहुः ॥ यद्विश्रुतिरिति द्वाभ्यां ॥ यदिति पृथ
११९ क्पदं यस्येत्यर्थः ॥ विश्रुतिः कीर्त्तिः श्रुतिभिर्नुता स्तुता ॥ इदं विश्वमलमत्यर्थं पुनाति यस्य पादावनेजनपयो गंगा च यस्य
वचो वाक्यरूपं शास्त्रं च वेदाख्यं विश्वं पुनाति ॥ किंच ॥ कालेन भर्ज्जितं दग्धं भगं माहात्म्यं यस्याः सा तथाविधापि
यस्यांघ्रिपद्मस्पर्शोत्थया आविर्भूता शक्तिर्यस्याः सा नोऽस्माकमखिलार्थानभितो वर्षति ॥ ३० ॥ दर्शनं च स्पर्शनं च अ

यद्विश्रुतिः श्रुतिनुतेदममलं पुनाति पादावनेजनपयश्च वचश्च शास्त्रं ॥ भूः कालभर्ज्जितभगापि यदंघ्रिपद्मस्पर्शोत्थशक्तिरभिवर्षति नोऽखिलार्थान् ॥ ३० ॥ तद्दर्शनस्पर्शनानुपथप्रजल्पशय्यासनाशनसयौनसपिंडबंधः ॥ येषां गृहे निरयवर्त्मनि वर्त्ततां वः स्वर्गापवर्गविरमः स्वयमास विष्णुः ॥ ३१ ॥

नुपथः अनुगतिश्च प्रजल्पो गोष्ठी च शय्याशयनं आसनं च यौनबंधः ॥ दैहिकसंबंधः ॥ तेन सह वर्त्तमानः दर्शनाद्युपलक्षितः सयौनः सपिंडसंबंधो येषां वोऽस्ति ॥ किंच ॥ येषां वो गृहे विष्णुः स्वयमास आविरभूत् ॥ निरयवर्त्मनि प्रवृत्तिमार्गे वर्त्तमानानां स्वर्गापवर्गाभ्यां विरमयति विरतस्मान्नु करोतीति तथा सः ॥ ते यूयं जन्मभाज इति ॥ यद्वा तदिति सामान्यनिर्देशः स इत्यर्थः ॥ स्वयं येषां वो निरयवर्त्मनि संसारकारणे गृहे वर्त्तमानानामपि वध्यते संबध्यते इति संबंधः ॥ दर्शनादिभिः संबंधः सन् ॥ स्वर्गापवर्गादिरमः सुरतप्रदो वभूवेत्यर्थः ॥ ३१ ॥ ११९

ईशवश्यत्वमेवाह ॥ कंसप्रतापिता इति ॥ ह्यस्य सः एतर्ह्येव संप्रत्येव ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ युधिष्ठिरं ये अनुव्रताः ॥ तेनरा
वसुदेव उवाच ॥ अवमास्मान्नु सूर्ययादैव क्रीडनकान्नरान् ॥ ईशस्य हि वशे लोकः कुरुते कार्यतेऽ
थवा ॥ २१ ॥ कंसप्रतापिताः सर्वे वयं याता दिशो दश ॥ एतर्ह्येव पुनः स्थानं दैवेनासादिताः स्वसः ॥ २२
श्रीशुक उवाच ॥ वसुदेवोग्रसेनाद्यैर्यदुभिस्तेर्चिता नृपाः ॥ आसन्नच्युतसंदर्शपरमानंदनिर्वृताः
२३ ॥ भीष्मो द्रोणोंबिकापुत्रो गांधारी ससुता तथा ॥ सदाराः पांडवाः कुंती संजयो विदुरः कृपः ॥ २४
कुंतिभोजो विराटश्च भीष्मको नग्नजिन्महान् ॥ पुरुजिद्द्रुपदः शल्यो धृष्टकेतुः स काशिराट् ॥ २५ ॥ द
मघोषो विशालाक्षो मैथिलमद्रकेकयौ ॥ युधामन्युः सुशर्मा च ससुता बाह्लिकादयः ॥ २६ ॥ राजानो ये
न्ये च राजेंद्र युधिष्ठिरमनुव्रताः ॥ श्रीनिकेतं वपुः शौरेः सस्त्रीकं वीक्ष्य विस्मिताः ॥ २७ ॥ अथ ते राम
कृष्णाभ्यां सम्यक् प्राप्तसमर्हणाः ॥ प्रशशंसुर्मुदा युक्ता वृष्णीन् कृष्णपरिग्रहान् ॥ २८ ॥ अहो भो
जपते यूयं जन्मभाजो नृणामिह ॥ यत्पश्यथासकृत्कृष्णं दुर्दर्शमपि योगिनाम् ॥ २९ ॥

जस्त्ये जितवान् ॥ २७ ॥ २८ ॥ जन्मभाजः ॥ नृणां मध्ये सफलजन्मानः ॥ २९ ॥ रामरामरामरामरामराम ॥

भा॰ द॰ उ॰ तत्कृतां मैत्रीमेवाह ॥ एताविति ॥ नद दृष्टौ पितरौ याभ्यां तौ ॥ वस्तुतस्तु अजं वा देवाह दृष्टपितरौ ॥ हे भवति युवयोः
१२० पित्रा न्यस्तावेतौ संप्रीणनादीनि प्राप्य अकुतश्चभयौ कश्चिदपि भयरहितौ भूत्वा ऊचतुः ॥ कथंभूतयोः ॥ अ
हणा नेत्रयोः र्शकं पद्मवत्रयोः ॥ नं कयोः ॥ उक्तंच ॥ युवयोरत्तत् ॥ यतः सतां परः ॥ स्वइति नास्ति वैषम्यं ॥ स्व

एतावदृष्टपितरौ युवयोः स्म पित्रोः संप्रीणनाभ्युदयपोषणपालनानि ॥ प्रापोषतुर्भवति
पद्महयद्वह्र हणां न्यस्तावकुतश्चभयोन सतां परःस्वः ॥ ३९ ॥ श्रीशुक उवाच ॥ गोप्यश्च कृष्ण
मुपलभ्य चिरादभीष्टं यत्प्रेक्षणे दृशिषु पक्ष्मकृतं शपंति ॥ दृग्भिर्हृदीकृतमलं परिरभ्य सर्वा
स्तद्भावमापुरपि नित्ययुजां दुरापं ॥ ४० ॥ भगवांस्तास्तथाभूता विविक्त उपसंगतः ॥ आश्लिष्याना
मयं पृष्ट्वा प्रहसन्निदमब्रवीत् ॥ ४१ ॥ अपि स्मरथ नः सख्यः स्वानामर्थचिकीर्षया ॥ गतांश्चिराय
तान्छत्रुपक्षक्षपणचेतसः ॥ ४२ ॥

अभीष्टत्वे लिंगं यस्य प्रेक्षणे दृशिषु चावधायकं पक्ष्मकृतं विधातारं शपंति ॥ दृग्भिर्नेत्रद्वारैर्हृदि कृतं
हृदयप्रवेशितं परिरभ्य तद्भावं ॥ तदात्मतां प्रापुः ॥ अपि नित्ययुजां दुरापं ॥ ४० ॥ ४१ ॥ चिरायितान् विलंबिता
न् ॥ अत्र हेतुः ॥ शत्रूणां पक्षस्य चेतो येषां तान् ॥ ४२ ॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ॥ एम ॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ॥ १२०

३२ अनस्थार्थैरिति ॥ तत्रैव वासचिकीर्षया ॥ शकटे षुस्थापितैर र्थैः सहागत इत्यर्थः ॥ ३३ ॥ वसुदेवस्तं परिष्वज्य प्रेम
विह्वलोवभूवेति शेषः ३४ ॥ ३५ ॥ तौ सुतौ परिरभ्य नंदो यशोदा च विरहशोकान् विजहतुः ॥ तत्यजतुः ॥ ३६ ॥ अमुच

श्रीशुक उवाच ॥ नंदस्तत्र यदून् प्राप्तान् ज्ञात्वा कृष्णपुरोगमान् ॥ तत्रागमद्वृतो गोपैरनस्था
र्थैर्दिदृक्षया ॥ ३२ ॥ तं दृष्ट्वा वृष्णयो हृष्टास्तन्वः प्राणमिवोत्थिताः ॥ परिषस्वजिरे गाढं चिरद
र्शनकातराः ॥ ३३ ॥ वसुदेवः परिष्वज्य संप्रीतः प्रेमविह्वलः ॥ स्मरन् कंसकृतान् क्लेशान्
पुत्रन्यासं च गोकुले ॥ ३४ ॥ कृष्णरामौ परिष्वज्य पितरावभिवाद्य च ॥ न किंचनोचतुः प्रे
म्णा साश्रुकंठौ कुरूद्वह ॥ ३५ ॥ तावात्मासनमारोप्य बाहुभ्यां परिरभ्य च ॥ यशोदा च
महाभागा सुतौ विजहतुः शुचम् ॥ ३६ ॥ रोहिणी देवकी चाथ परिष्वज्य व्रजेश्वरीं ॥ ३७ ॥
अपि प्राप्यैंद्रमैश्वर्यं पश्यामो न हि प्रतिक्रिया ॥ ३८ ॥
अश्रूणि विजहतुः ॥ मुमुचतुरित्यर्थः ॥ ३६ ॥ व्रजे
श्वरीं यशोदां ॥ ३७ ॥ अनिवृत्तानि निवृत्तिकारणे सत्यपि अनुवर्त्तमानानि ॥ ऐंद्रमैश्वर्यं प्राप्यापि यस्याः प्रतिक्रि
या स्मरंत्यो तत्कृतां मैत्रीं बाष्पकंठ्यो समूचतुः ॥ का विस्मरेत वां मैत्रीमनिवृत्तां व्रजेश्वरि ॥ १ ॥

गं०कं०नु०प्रकाव्यत्यपः ॥ ६८ ॥

भा०द० ७० ननु चतुर्विधभूतग्रामारण्यतद्भोक्तात्मैवाद्यंतादिरूपः॥ तस्मिंश्च सर्वव्यापके सर्वभूतानि आद्यंतरूपाणि एव भे
१२९ वैतानि चतुर्विधानि भूतान्यपि भौतिकत्वाविशेषात्॥ स्वकारणेषु भूतेष्वेव वर्तंते न तु भोक्तर्यात्मनि॥ आ
त्मा तु तेषु आत्मना भोक्तृरूपेण न तत्र व्याप्तः॥ नकारणत्वेन॥ अथ तद्द्वयं भूतभौतिकरूपं भोग्यं च भोक्ता
रं चात्मानमप्यपरिपूर्णं॥ आभातं पश्यतेति॥ ४७॥ अध्यात्मशिक्षया स्वरूपोपदेशेन शिक्षिता बोधितास्ताः॥ तस्या

एवं ह्येतानि भूतानि भूतेष्वात्मात्मना ततः॥ उभयं मय्यथ परे पश्यताभातमक्षरे॥ ४७॥ श्रीशुक उवाच॥
अध्यात्मशिक्षया गोप्य एवं कृष्णेन शिक्षिताः॥ तदनुस्मरणध्वस्तजीवकोशास्तमध्यगान्॥ ४८॥ आ
हुश्च ते नलिननाभ पदारविंदं योगेश्वरैर्हृदि विचिंत्यमगाधबोधैः॥ संसारकूपपतितोत्तरणा
वलंबं गेहंजुषामपि मनस्युदियात्सदा नः॥ ४९॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे पूर्वार्धे
द्व्यशीतितमोऽध्यायः॥ ८२॥ श्रीशुक उवाच॥ तथानुगृह्य भगवान्गोपीनां स गुरुर्गतिः॥ युधिष्ठिरमथा
पृच्छत्सर्वांश्च सुहृदोऽव्ययः॥ १॥

नुस्मरणेन ध्वस्तो जीवकोशो लिंगं यासां ताः॥ तमेवाध्यगान्प्रापुः॥ ४८॥ एवं प्राप्ता अपि किं स्मः पुनर्देहव्यासंगेन माययावृ
त्विति॥ तत्स्मरणस्मरणं प्रार्थयामासुरित्याह॥ आहुश्चेति॥ हे नलिननाभ ते पदारविंदं गेहंजुषां गृहसेविनां नामपि
मनसि सदा उदीयात्॥ आविर्भवेत्॥ ४९॥ इति दशमे द्व्यशीतितमः॥ ८२॥ द्व्यशीतितमे एवं च स्त्रीणां कृष्णकथोत्सवे॥ द्वि १२१

अपिस्वित्॥ अस्मानवध्यायथ॥ अवजानीथ॥ अकृतज्ञा एत इत्यादिशंकया॥ ईषच्छंकया॥ न शंकामात्रं निश्चितं मे
वैतत्॥ परित्यज्य गतत्वादिति चेद्तत्राह॥ नूनमिति॥४३॥ एतत्सदृष्टांतमाह वायुरिति॥ आक्षिपति॥ पृथक्करोती
त्यर्थः॥४४॥ अपिच अतिभद्रमिदं॥ यदुत भवतीनां मद्वियोगेन मत्प्रेमातिशयो जात इत्याह॥ मयीति॥ मयि भक्ति

अप्यवध्यायथास्मान् स्विदकृतज्ञाविशंकया॥ नूनं भूतानि भगवान्युनक्ति वियुनक्ति च॥४३॥
वायुर्यथा घनानीकं तृणं तूलं रजांसि च॥ संयोज्याक्षिपते भूयस्तथा भूतानि भूतकृत्॥४४॥ म
यि भक्तिर्हि भूतानाममृतत्वाय कल्पते॥ दिष्ट्या यदासीन्मत्स्नेहो भवतीनां मदापनः॥४५॥
अहं हि सर्वभूतानामादिरंतोऽन्तरं बहिः॥ भौतिकानां यथा खं वार्भूर्वायुर्ज्योतिरंगनाः॥४६॥

मात्रमेव तावदमृतत्वाय कल्पते॥ यत्तु भवतीनां मत्स्नेह आसीदेव॥ तद्दिष्ट्या भद्रं॥ कुतः॥ मदापनः॥ म
त्प्रापक इति॥४५॥ कीदृशस्त्वं॥ यं वयं स्नेहेन प्राप्स्याम इत्यपेक्षायामात्मस्वरूपमाह॥ अहं हीति॥ हे अंग
नाः॥ भौतिकानां सरावसैंधवादीनां यथाकाशादिपंचभूतान्याद्यंतादिरूपाणि॥ एवं सर्वभूतानां जरायु
जादीनामहं॥ अतो व्यापकं मां भवत्यः प्राप्ता एवेति॥४६॥

हित्वेतिपदद्वयं ॥ त्वा वां हित्वा इव त्वामेव नताः स्मेत्यर्थः ॥ कथंभूतं त्वं आत्मधाम्ना स्वरूपप्रकाशेन विधुता आत्मकृताः ॥ व २
वृद्धिनिवृत्तिनास्तितिरोऽवस्थाः यस्मिंस्तं ॥ अतएव आनंदसंप्लवं सर्वानंदकंदस्वरूपं ॥ अखंडं अपरिछिन्नं यतः नकुं
ठितः बोधश्चिच्छक्तिर्यस्य तं ॥ ननु त्वं बहुरूपता श्रीकृष्णस्य कुतोऽस्मदादेवदेवप्रतीतेरत आहुः ॥ कालोपसृ पात्ता ४
ष्टेति ॥ कालेनोपसृष्टा विप्लुता याश्रुतिस्तषामवनेरक्षणाय ॥ आत्ता उपयोगमायया आकृतिर्निराकारा मूर्तिर्येन

हित्वात्मधाम विधुतात्मकृतं त्र्यवस्थमानंदसंप्लवमखंडमकुंठबोधं ॥ कालोपसृष्टनिगमा
वनआत्तयोगमायाकृतिं परमहंसगतिं नताःस्म ॥ ३ ॥ इति ह वा च ॥ इत्युत्तमश्लोकशिखामणि
जनेष्वभिष्टुवत्स्वंधककौरवस्त्रियः ॥ समेत्य गोविंदकथा मिथो गृणंत्यस्त्रिलोकगीताः शृणु वर्ण
यामि ते ॥ ४ ॥ द्रौपद्युवाच ॥ हे वैदर्भ्यच्युतो भद्रे हे जांववति कोशले ॥ हे सत्यभामे कालिंदि शैव्ये रो
हिणि लक्ष्मणे ॥ ५ ॥

तं परमहंसानां गतिं त्वां ॥ अतस्तवैव रूपत्वादस्माकं च त्वन्मीय यावदेतत्सर्वं वैपरीत्यात्वामेव नताः स्मे
ति पदद्वा ॥ वामिति प्रकरणाज्ज्ञातव्यं त्वां नताः स्मः ॥ किं कृत्वा हित्वा ॥ किं आत्मा शरीरं ॥ धाम गृहं ॥ तच्च ॥ तच्च दे
हदेहिकसंगं परित्यज्येत्यर्थः ॥ समानमन्यत् ॥ ४ ॥ त्रिषु लोकेषु गीताः ॥ ५ ॥ हे कौशल्ये सत्ये शैव्ये मित्रविंदा रोहि
णी का चित्पद्मं महिषी तुल्या ॥ ६ ॥

तत्पादेस्तयाहतमंहोयेषांते ॥ २ ॥ महतां मनस्तः सकाशात् ॥ सुखद्वारतो निःसृतं कचित्कदाचिद्देहभृतां देहधारिणां दे
हकृद्व्यासावस्मृतिश्चाविद्यानां छिन्नतीतितयातं ॥ देहकृदीश्वरः ॥ तद्विषयाज्ञानं छिदं वा ॥ हे प्रभो ॥ त्वच्चरणां
बुजासवं ॥ कर्णपुटैर्ये पिबंति ॥ तेषां त्वत्तः दुर्जनशास्तुः कालरूपात् ॥ कुतोऽशिवं भवतीत्यन्वयः ॥ कथंभूतं
महात्मनां व्यासादीनां मुखनिःसृतं ॥ कचित्कदाचिदपि व्यासादिवाक्ये स्वामात्मत्वेन ज्ञानतो न दुःखं भ

तएवंलोकनाथेन परिपृष्टाः सुसत्कृताः ॥ प्रत्यूचुर्हृष्टमनसस्तत्पादेनाहतांहसः ॥ २
कुतोऽशिवं त्वच्चरणांबुजासवं महन्मनस्तो मुखनिःसृतं क्वचित् ॥ पिबंति ये कर्णपुटैरलं
प्रभो देहंभृतां देहकृदस्मृतिछिदम् ॥ ३ ॥

वतीत्यर्थः ॥ ईश्वरस्यात्मत्वमेव कथं तत्राह ॥ देहभृतामिति ॥ देहभृतो जीवाः ॥ त्वत्कृते त्वद्धेतुत्वेन उच्छ्वसंति
जीवंति ॥ कोह्येवान्यात् ॥ कः प्राण्यात् ॥ यदेष ॥ आकाशः आनंदो न स्यादिति श्रुतेः ॥ अथवा हन्मुखनिःसृतं त्वच्च
रणांबुजासवं ये पिबंति ॥ तेषां महात्मनां कुतोऽशिवमित्यन्वयः ॥ त्वत्कृते भगवन्नमस्कारायेति चित्सुकः ॥ ३ ॥

भा०द०उ० देहकन्तोपिता॥ अमुं श्रीक्रमनिजं नाथं स्वामिनं देवमीश्वरं सीतापतिं प्राज्ञाय॥ अविज्ञाय त्रिनवहान्निद्रास्वः
१२३ छंदोनुरोधेन सप्तविंशतिदिनानि॥ अमुनाभ्ययुध्यत्॥ परीक्षितः संज्ञातापरीक्षायस्य सः परीक्षितः॥ तेनाज्ञातः
सीतापतिरिवासावितिज्ञात्वा पादौ प्रगृह्य मणिनासह मामहरन्मुपाहरत्॥ अहं तयासमर्पित्तवान्॥ अहो तोहि

ॐ॥ वद्वसुवाच॥ प्राज्ञाय देहकृदमुं निजनाथं देवं सीतापतिं त्रिनवहान्यमुनाभ्ययुध्यत्॥
म२ ज्ञातापरीक्षितः उपाहरद्दहेरतं मां पादौ प्रगृह्य मणिना सहमनुष्यदासी॥१०॥ श्री कालिद्रु
वाच॥ तपस्वरं तीमाज्ञाय स्वपादस्पर्शनाशया॥ सखोपेत्यागृहीत्पाणिं यो हं तं द्रुमोर्जुने
नी॥११॥ श्री भद्रो वाच॥ यो मां स्वयंवरे उपेत्य विजित्य भूपान्निन्ये पृथग्गमिवात्म वलिं
द्विपारिः॥ भ्रातस्त्वं मेपकुरुतः स्व पुरं स्त्रियो कस्तस्यास्तुमेनु भवमं ज्यवनेजनत्वं॥१२॥ ह२

त्वमतिश्रेष्ठासिनेत्याह॥ अमुष्याहं दासीति॥१०॥ सखा अर्जुनेन तस्य गृहमार्जनी॥ गृहमार्जनेन कर्त्री॥११॥
सुनायपथगंत॥ स्ववलिं द्विपारिः सिंह इवेति॥ मित्रात्वं स्वापकुरुतः॥ अपकारं कुर्वतो विजित्य स्त्रियो कः॥ लं

हेत्रन्याः श्रीकृष्णस्य पत्न्यः ॥ १ ॥ मा मां श्रप्येपितुं राजसु जरासंध्यादिषु धन्वाकार्मुकेषु सत्सु ॥ श्रजेयायेभटास्तेषां से
खारिता ॥ मुकुटवत्कृतांघ्रिरेणवो येषां मूर्ध्निपदं दध्यादित्यर्थः ॥ तस्य श्रीनिकेतनस्य चरणौ मम मार्चनायास्तु ॥ प्र
सेनाभेः श्रात्तुवैर्घेन सिंहं हतेन तत्र हृद्यस्य तेन मेतेन तातेन लिप्रमभिशापं दृष्यशः ॥ श्रपमार्ष्टुं परिहर्तुं

हे कृष्णपत्न्य एतन्नो ब्रूत वो भगवान्स्वयं ॥ उपयेमे यथा लोकमनुकुर्वन्स्वमायया ॥ १ ॥ श्री
रुक्मिण्युवाच ॥ चैद्याय मार्पयितुमुद्यतकार्मुकेषु राजस्वजेयभटशेखरितांघ्रिरेणुः ॥ नि
न्ये मृगेंद्र इव भागमजाविय्थात्तच्छ्रीनिकेतचरणोऽस्तु मम मार्चनाय ॥ २ ॥ श्रीसत्यभा
मोवाच ॥ यो मे सनाभिवधतप्तहृदा ततेन लिप्ताभिशापमपमार्ष्टुमुपाजहार ॥ जित्वा
र्क्षराजमथ रत्नमदात्स तेन भीतः पितादिशत मां प्रभवेपि दत्तां ॥ ३ ॥ ॥ ११ ॥ ११

ऋक्षराजं जित्वा रत्नं स्यमंतकमुपाजहार ॥ श्रानीतवान् श्रथानंतरं मत्पित्रे रत्नमदात् ॥ तेन स्वापराधे
न भीतः सन्मे पिता प्रभवे श्रीकृष्णाय मां मादिशत् ॥ ददौ ॥ दत्तां ॥ श्रन्येभ्यो दिभ्यः प्रतिश्रुतामपीत्यर्थः ॥ ४ ॥

द१

भा०द०उ० राज्ञि हे द्रौपदि यथा मित्रविंदायाः॥ तथा मम पि चित्तं मुकुंद विषयमासीत् सुसंमृश्य स्तु विचार्य्य॥ पश्चात्तया

१२७ प्रियावृत्तः किल अतो ऽपि मच्चित्तं श्रीमुकुंदे आसक्तं॥१७॥ तत्र श्रीकृष्णप्राप्तावचीकरत् कारयामास॥ यथा राज्ञि

त्वत्स्वयंवरे पार्थस्य पृषया अप्रत्तुमिच्छया कृत॥ तथा मत्स्यं कारितवान्॥ पांगतरे पार्थस्येषुलक्ष्याकृततः॥ तर्हीदमपि

श्रीलक्ष्मणोवाच ॥ ममापि राज्ञ्यच्युतजन्मकर्म श्रुत्वा मुहुर्नारदगीतमास ह॥ चित्तं मुकुंदे कि

स्या ३ लपद्महस्तया वृतःसुसंमृश्य विहाय लोकपान्॥१७॥ ज्ञात्वा मम मतं साध्वि पिता दुहितृवत्सलः

वृहत्सेन इति ख्यातस्तत्रोपायमचीकरत्॥१८॥ यथा स्वयंवरे राज्ञि मत्स्यः पार्थेप्सया कृतः॥ अयं

तु वहिराच्छन्नो दृश्यते स जले परं॥१९॥ श्रुत्वैतत्सर्वतो भूपा आययुर्मत्पितुः पुरं॥ सर्वास्त्रशास्त्रत

ष्या २ त्त्वज्ञाः सोपाध्यायाः सहस्रशः॥२०॥ पित्रा संपूजिताः सर्वे यथावीर्य्यं यथावयः॥ आददुः सशरं चापं वेद्धु

पर्षदि मद्धियः॥२१॥

अर्जुनेन एव किं नाविध्यत्तत्राह॥ अयं त्विति॥ स मत्स्यो वहिर्वाच्छन्नो नांततः॥ अतःस्तं

भसंलग्नयोर्ध्वदृष्ट्या संलक्ष्यते॥ अयं तु न तथा॥ किंतु स्तंभमूले निहितकलशजले केवलं दृश्यते॥ अतो दृष्टिरप्य

स्तादुपरि लक्ष्यमिति श्रीकृष्णव्यतिरेकेणान्यकस्यापि भेद्य इति भावः॥१९॥ २०॥ मत्स्यं वेद्धुं पर्षदि संसदि मद्धियः॥

मय्येव धीर्येषामिति॥ अन्यचित्ते न वेद्धुं शक्ता इति भावः॥ २१॥ १२७

सप्रउक्षणोगाद्रुषभान् ॥ वलंचवीर्यंच ॥ प्रभावः ॥ तीक्ष्णानिशृंगाणिच अतिशयितानियेषांतान् ॥ मेपित्राकृतवानव
त्तीयसेमांदत्तुं ॥ क्षितिपानांवलस्यपरीक्षणाय ॥ तानिप्रसिद्धान्वीराणांदुर्मदंघ्नंतियेतान् तरसाशीघ्रमेवनिग्र
ह्यदमयित्वाक्रीडन्ननायासेनैववबन्ध ॥ अजतोकान् ॥ अजापत्यानि ॥ १३ ॥ वीर्यमेवचशुल्कंक्रेयंयस्यास्तां दा

श्रीसूत उवाच ॥ सप्तोक्षणोगतिवलवीर्यसुतीक्ष्णशृंगान्पित्राकृतान्क्षितिपवीर्यपरीक्षणाय ॥ तान्वी
रदुर्मदहनस्तरसानिगृह्यक्रीडन्ववंधहययथाशिशवोजतोकान् ॥ १३ ॥ य इत्थंवीर्यशुल्कांमांदासी
भिश्चतुरंगिणीं ॥ पथिनिर्जित्यराजन्यान्निन्येतस्यास्तुमे ॥ १४ ॥ श्रीमित्रविंदोवाच ॥ पितामेमा
तुलेयायस्वयमाहूययद्दत्तवान् ॥ कृष्णेकृष्णायतस्मैतांमन्दोहिरण्यासरवीजनैः ॥ १५ ॥ अस्यमेपादसं
स्पर्शोभवेज्जन्मनिजन्मनि ॥ कर्मभिर्भ्राम्यमाणायायेनतच्छ्रेयआत्मनः ॥ १६ ॥

सीभिःसहचतुरंगिणींगजाश्वादिसेनायुक्तांपुरंनिन्ये ॥ १४ ॥ हेकृष्णेद्रौपदि ॥ तस्मिन्नेवचित्तंयस्यास्ताम् ॥ मा
मैद्रोहिरण्यासेनयासह ॥ सखीजनैश्चसह ॥ १५ ॥ येनपादसंस्पर्शेन ॥ आत्मनोमेतत्केवल्याख्यंश्रेयोभवेत् ॥
॥ यद्वा ॥ येनकारणेनात्मनोजीवस्यतच्छ्रेयः स एव पुरुषार्थ इति ॥ १६ ॥

भा० द० उ०
१२५

उरवः कुंतला यस्मिन् ॥ कुंडलयोस्त्विषो ययोस्ते गंडस्थले यस्मिन् तत्च तत्च ॥ शिशिरः संतापहरो हासो येषु तैः कटा
क्षमोक्षैः ॥ अपांगवीक्षणविलासैः ॥ अनुरक्तहृदयं यस्याः सा ॥ २९ ॥ २८ ॥ हे याज्ञसेनि द्रौपदि ॥ श्रीहरौ मे ईशे मया वृते
सति स्पर्द्धंतः स्पर्द्धमानाः ॥ नन्वेषपरमैश्वर्य्यैर्दृष्टवतां कुतः स्पर्द्धावसरस्तत्राह ॥ हृच्छयातुराः ॥ कामेनातुराः विव

उन्नीय वक्त्रमुरुकुंतलकुंडलत्विड्गंडस्थलं शिशिरहासकटाक्षमोक्षैः ॥ राज्ञो निरीक्ष्य परितः शनकैर्मुरारेरंसेनुरक्तहृदया निदधे स्वमालां ॥ २७ ॥ तावन्मृदंगपटहाः शंखभेर्यानकादयः ॥ निनेदुर्नट
नर्त्तक्यो ननृतुर्गायका जगुः ॥ २८ ॥ एवं वृते भगवति मयेशे नृपयूथपाः ॥ न सेहिरे याज्ञसेनि
स्पर्द्धंतो हृच्छयातुराः ॥ २९ ॥ मां तावद्रथमारोप्य हयरत्नचतुष्टयं ॥ शार्ङ्गमुद्यम्य सन्नद्धस्तस्थावा
जौ चतुर्भुजः ॥ ३० ॥ दारुकश्चोदयामास कांचनोपस्करं रथं ॥ मिषतां भूभुजां राज्ञि मृगाणां मृगराडिव
॥ ३१ ॥ तेन्वसज्जंत राजन्या निषेद्धुं पथि केचन ॥ संयत्ता उद्धृतेष्वासा ग्रामसिंहा यथा हरिं ॥ ३२ ॥

शाः ॥ कामविजृंभितास्पर्द्धेति भावः ॥ २९ ॥ हयरत्नानां चतुष्टयं यस्मिन् तं रथं ॥ बाहुभ्यां मामालिंग्य द्वाभ्यां धनुर्वाणौ गृ
हीत्वा चतुर्भुजस्तस्थौ ॥ ३० ॥ मृगाणां मिषतां मृगराडिव ॥ तद्दाहरिर्जगामेति शेषो ज्ञातव्यः ॥ दारुकस्यैव वा मृगराजो
पमा ॥ ३१ ॥ अन्वसज्जंत राजन्याः पृष्ठतः सक्ता बभूवुः ॥ निषेद्धुं केचन पुरतो गत्वा पथि संयत्ता बभूवुरित्यर्थः ॥ उद्धृतेष्वा

ऊर्द्धीकृतचापाः ॥ ग्रामसिंहाः श्वानः ॥ करिसिंहं यथेति ॥ ३२ ॥

१२५

मत्स्याभासंजलेवीक्ष्यज्ञात्वाचतदावस्थितिं ५॥

नदेवाद्य॥ आदायेति॥ अमुनाचापेन॥२२॥ नाविंदंस्तदवस्थितिं॥ मागधादीनांक्रियाशक्तिरेव॥ नतुलब्ध्वापिभिन्नाने
त्यर्थः॥ यतोयत्नवान्॥ यत्नवान्॥ असृजत्॥ मुमोच॥ सवाणेनमत्स्यंनाच्छिनत्॥ परंकेवलंतंपस्पर्श॥ तावतानभि
न्नोऽर्जुनोबलेनापूर्णइत्यर्थः॥२३॥२४॥ अभिजितिसर्वार्थसाधकेमुहूर्ते॥२५॥ भगवत्प्राप्तिहर्षनिर्भरेणात्मानमेवानुवे

आदायव्यसृजन्केचित्सज्यंकर्तुमनीश्वराः॥ आकोष्ठंज्यांसमुत्कृष्यपेतुरेकेमुनाहताः॥२२॥ सज्यंकृत्वापरे
वीरामागधांबष्ठचेदिपाः॥ भीमोदुर्योधनःकर्णोनाविदंस्तदवस्थितिं॥ पार्थोयत्तोऽसृजद्बाणंमाच्छि
नत्पस्पृशेपरं॥२३॥ राजन्येषुनिवृत्तेषुभग्नमानेषुमानिषु॥ भगवान्धनुरादायसज्यंकृत्वाथलीलया॥२४॥ त
स्मिन्संधायविशिखंमत्स्यंवीक्ष्यसकृज्जले॥ छित्वेषुणापातयत्तंसूर्येचाभिजितिस्थिते॥ दिविदुंदुभयोनेदु
र्जयशब्दयुताभुवि॥ देवाश्चकुसुमासारान्मुमुचुर्हर्षविह्वलाः॥२५॥ तद्रंगमाविशमहंकलनूपुराभ्यांप
द्भ्यांप्रगृह्यकनकोज्ज्वलरत्नमालां॥ नूत्नेनिवीयपरिधायचकौशिकाग्र्येसव्रीडहासवदनाकबरीधृतस्र
क्॥२६॥

ध्येत्याहद्वाभ्यां॥ तद्रंगमिति॥ तत्रदाकलौकलस्वनौनूपुरौययोस्ताभ्यांपद्भ्यांरंगंप्राविशं॥
कनकेनोज्ज्वलांरत्नमालांनिवीयप्रावृत्यपरिधायचनिवीवंधेनकौशिकाग्र्येउत्तमकौशेयवस्त्रेसव्रीडोहासो
यस्मिन्॥ तद्वदनंयस्याः॥ साकबर्यांधृताःस्रजोययासा॥२६॥ रामरारामरामरामरामरामरामरामरामरा

न वयमिति साम्राज्यादि न कामयामहे ॥ किंतु एतस्य श्रीमत्पादरजो मूर्ध्ना वोढुं कामयामह इति ॥ ननु तस्य गृहिण्यो यूयं सर्वसंपद्भाजः ॥ किमेवं काम्यत इत्याहुः ॥ हे साध्वि साम्राज्यं सार्वभौमं पदं ॥ स्वाराज्यमैंद्रपदं तदुभयपदभोक्तृत्वं विविधं विराजंते इति विराट् ॥ तत्स्वभावो वैराज्यं ॥ अणिमादिसिद्धिभोक्तृत्वमित्यर्थः ॥ पारमेष्ठ्यं ब्रह्मपदं ॥ आनंत्यं मोक्षः हरेः पदं ॥ तत्सालोक्यादि न तु कामयामह इति ॥ यद्वा ॥ वैकुंठो वा हरेर्लोकः ते केऽपि मे एश्रीगा

न वयं साध्वि साम्राज्यं स्वाराज्यं भौज्यमप्युत ॥ वैराज्यं पारमेष्ठ्यं च आनंत्यं वा हरेः पदं ॥४१॥ कामयामह एतस्य श्रीमत्पादरजः श्रियः ॥ कुचकुंकुमगंधाढ्यं मूर्ध्ना वोढुं गदाभृतः ॥४२॥ व्रजस्त्रियो यद्वांछंति पुलिंद्यस्तृणवीरुधः ॥ गावश्चारयतो गोपाः पादस्पर्शं महात्मनः ॥४३॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे द्रौपदीकृष्णपत्नीसंवादे त्र्यशीतितमोऽध्यायः ॥ ८३ ॥

दिक्चतुर्थाधिपत्यानि ॥ साम्राज्यभोज्यस्वाराज्यवैराज्यानि व्याख्येयानि ॥४१॥ यत्किं पादरज एव काम्यते अत आहुः ॥ श्रियः कुचकुंकुमगंधाढ्यमिति व्रजस्त्र्यादिसेव्यया श्रियापि सेवितत्वादिति भावः ॥४२॥ ननु तर्हि अतिदुर्लभत्वात्किं न द्वांछथ्यो अत्राहुः ॥ व्रजस्त्रिय इति यत् ॥ यथा गावः गाः ॥ महात्मनोपि गाश्चारयतः पादस्पर्शं व्रजगोपा यथा वांछंति तद्वत्तत्पराणां सुलभमिति भावः ॥४३॥ इति दशमे त्र्यशीतितमः ॥८३॥छ॥ ss १२६

३४॥ रविं छादयतीति रविच्छदाः॥ ध्वजेषु पटा यस्यां॥ चित्राणि तोरणानि यस्यां सैव सा च तां॥ कुशस्थलीं॥ यदुपतिः स्म
माविशत्॥ स्वकेतनं मंडलं॥ अस्ताचलं वा॥ ३४॥ महार्हैर्वासःप्रभृतिभिः सुहृदादीन् पूजयामास॥ ३५॥ दास्यादिभिः

ते शार्ङ्गच्युतवाणौघैः कृत्तबाह्वंघ्रिकंधराः॥ निपेतुः प्रधने केचिदेके संत्यज्य दुद्रुवुः॥ ३३॥ ततः पु
रीं यदुपतिरत्यलंकृतां रविच्छदध्वजपटचित्रतोरणां॥ कुशस्थलीं दिवि भुवि चाभिसंस्तुतां स
माविशत्तरणिरिव स्वकेतनं॥ ३४॥ पितामेपूजयामास सुहृत्संबंधिबांधवान्॥ महार्हवासोल
कारैः शय्यासनपरिच्छदैः॥ ३५॥ दासीभिः सर्वसंपद्भिर्भटेभरथवाजिभिः॥ आयुधानि महा
र्हाणि दत्वैषां पूर्णस्य भक्तितः॥ ३६॥ आत्मारामस्य तस्येमा वयं वै गृहदासिकाः॥ सर्वसंगनिवृत्त्याद्धा
तपसा च वभूविम॥ ३७॥ महिष्य ऊचुः॥ भौमं निहत्य सगणं युधि तेन रुद्धा ज्ञात्वाथ नः क्षितिजये जितरा
जकन्याः॥ निर्मुच्य संसृतिविमोक्षमनुस्मरंतीः पादांबुजं परिणिनाय य आप्तकामः॥ ३८॥

ग॰ १

सह॥ आयुधानि पूर्णाय मेपि ददौ॥ ३६॥ इमा आत्मैव वयं सर्वसंगनिवृत्त्या तपसा स्वधर्मेण अद्धा साक्षात्तस्य गृहदासिका व॰
भूविम॥ ३७॥ क्षितिजये दिग्विजये जितानां राज्ञां कन्या नः॥ अस्मान् तेन रुद्धाः ज्ञात्वा ततो निर्मुच्य संसृतेर्विमोक्षो यस्मा

त्पादांबुजमनुस्मरंतीः नः॥ परिणिनाय॥ उदवहत॥
आप्तकामोपि यः॥ ३८॥

भा०द०उ०
१२०

जन्मभृतः सफलं जन्मा नः ॥ तत्फलं जन्मफलं ॥ किं तत् ॥ यद्योगेश्वरदर्शनं ॥ ९ ॥ किं च युष्माकं दर्शनमेव तावद्
देवानामपि दुष्प्रापं ॥ अस्माकं तु स्पर्शनादिकं तु कथं तु घटितमिति विस्मयेनाह ॥ किमिति स्वल्पतपसां नॄणां येषु
नोदिमात्रेण न पीव दृष्टिर्येषां ॥ तथा चार्चायां प्रतिमायां देव इति च चक्षुर्दृष्टिर्येषां ॥ योगेश्वरदर्शनादिकमिदं किं
असंभावितमित्यर्थः ॥ १० ॥ एतत्प्रपंचयति ॥ न ह्यम्मयानीति त्रिभिः ॥ ११ ॥ वाङ्मनसयोरप्युपासनाविषयत्वम् ॥ यो वाचं

श्रीभगवानुवाच ॥ अहो वयं जन्मभृतो लब्धं कार्त्स्न्येन तत्फलं ॥ देवानामपि दुष्प्रापं यद्योगे-
श्वरदर्शनं ॥ ९ ॥ किं स्वल्पतपसां नृणामर्चायां देवचक्षुषां ॥ दर्शनस्पर्शनप्रश्नप्रह्वपादार्च-
नादिकं ॥ १० ॥ न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ॥ ते पुनंत्युरुकालेन दर्शनादेव साध-
वः ॥ ११ ॥ नाग्निर्न सूर्यो न च चंद्रतारका न भूर्जलं खं श्वसनोऽथ वाङ्मनः ॥ उपासिता भेदकृतो हरं-
त्यघं विपश्चितो घ्नंति मुहूर्तसेवया ॥ १२ ॥ यस्यात्मबुद्धिः कुणपे त्रिधातुके स्वधीः कलत्रादिषु भौ-
म इज्यधीः ॥ यत्तीर्थबुद्धिः सलिले न कर्हिचिज्जनेष्वभिज्ञेषु स एव गोखरः ॥ १३ ॥

ब्रह्मेति उपासेदिति श्रुतेः ॥ अघं तन्मूलमज्ञानं न हरंति ॥ अत्र हेतुः भेदकृतः ॥ भेदकर्तारः ॥ यद्वा ॥ भेदबुद्धिं कुर्वंतः पुंसः ॥
विपश्चितो निरस्तभेदास्तेन मुहूर्तमात्रसेवयैवाघं घ्नंतीति ॥ १२ ॥ अत्र साधनं विहायात्मादिबुद्ध्या सज्जमानोऽतिमं-
द इत्याह यस्येति ॥ आत्मबुद्धिः ॥ त्रयो धातवो वातपित्तश्लेष्माणः प्रकृतयो यस्य तस्मिन् ॥ कुणपे शरीरे स्वधीः स्वीया

चतुर्भिरधिकाशीतिर्ज्जन्मेष्मुनिसमागमे॥ वसुदेवमखोत्साहं वंधुप्रस्थापनादिकम्॥१॥ सुबलपुत्री गांधारी माधवी
सुभद्रा क्षितिपा नारी राज्ञां पत्न्यः स्वगोप्यः विविधिस्सु विस्मयचक्रुः॥१॥२॥३॥४॥५॥ ६॥ आनर्च्चुः अर्च्चितवंतः॥७॥ध

श्रीशुक उवाच॥ श्रुत्वा पृथा सुबलपुत्र्यथ याज्ञसेनी माधव्यथ क्षितिपपत्न्य उत स्वगोप्यः॥ कृष्णेऽ
खिलात्मनि हरौ प्रणयानुबंधं सर्वा विसिस्म्युरलमश्रुकलाकुलाक्षः॥१॥ इति संभाषमाणासु स्त्रीषु स्त्रीभि
र्नृभिर्नृषु॥ आययुर्मुनयस्तत्र कृष्णरामदिदृक्षया॥२॥ द्वैपायनो नारदश्च च्यवनो देवलोऽसितः॥ विश्वामि
त्रः शतानंदो भारद्वाजोथ गौतमः॥३॥ रामस्सशिष्यो भगवान्वसिष्ठो गालवो भृगुः॥ पुलस्त्यः कश्यपो
स्क५ ऽत्रिर्मार्कंडेयो बृहस्पतिः॥४॥ द्वितस्त्रितश्चैकतश्च ब्रह्मपुत्रास्तथांगिराः॥ अगस्त्यो याज्ञव
ल्क्यश्च वामदेवादयोऽपरे॥५॥ तान्दृष्ट्वा सहसोत्थाय प्रागासीना नृपादयः॥ पांडवाः कृष्णरा
मौ च प्रणेमुर्विश्ववंदितान्॥६॥ तानानर्चुर्यथा सर्वे सहरामोऽच्युतोऽर्चयत्॥ स्वागतासनपाद्या
र्घ्यमाल्यधूपानुलेपनैः॥७॥ उवाच सुखमासीनान्भगवान्धर्मगुप्तनुः॥ सदसस्तस्य महतो
यतवाचोऽनुशृण्वतः॥८॥
धर्मगोप्त्रीतनुर्यस्य स धर्मगुप्तनुः॥ यतानि यतावाग्यस्य सदसः॥८॥ राम राम राम राम राम गोविंद दामोदर॥

भा०द०उ० जनसंग्रहमाहुः॥ अथापीति त्रिभिः॥ सत्वं शुद्धात्मकं रूपं बिभर्षि॥ स्वलीलया॥ स्वाचारेण वेदपथं च बिभर्षि॥१८॥
१२८ अत एव ब्राह्मणेषु बहुमानमपि करोषि॥ इति सहेतुकमाहुः॥ ब्रह्मेति॥ ब्रह्म वेदाख्यं शुक्लं शुद्धं ते हृदयं अंतरंगरू
पं कुत इत्यत आहुः॥ यत्रेति॥ यत्र ब्रह्मणि व्यक्तं कार्यं॥ अव्यक्तं कारणं ततः परं सत् सन्मात्रं ब्रह्म च तत्तपआदिभिरुप

अथापि काले स्वजनाभिगुप्तये बिभर्षि सत्वं खलनिग्रहाय च॥ स्वलीलया वेदपथं सनातनं वर्णा
श्रमात्मा पुरुषः परो भवान्॥१८॥ ब्रह्म ते हृदयं शुक्लं तपःस्वाध्यायसंयमैः॥ यत्रोपलब्धं सद्व्यक्त
मव्यक्तं च ततः परं॥१९॥ तस्माद्ब्रह्मकुलं ब्रह्मन् शास्त्रयोनेस्त्वमात्मनः॥ सभाजयसि सद्धाम तद्
ब्रह्मण्याग्रणीर्भवान्॥२०॥ अद्य नो जन्मसाफल्यं विद्यायास्तपसो दृशः॥ त्वया संगम्य सद्गत्या याय
दन्तः श्रेयसां परः॥२१॥ नमस्तस्मै भगवते कृष्णायाकुंठमेधसे॥ स्वयोगमाययाच्छन्नमहिम्ने परमा

ब्धं तद्ब्रह्म शुक्लं॥१९॥ तस्माद्वेदहृदयत्वाद्धेतोः प्रवर्त्तकं॥ ब्राह्मणकुलं शास्त्रयोनेर्वेदप्र॥ त्मने॥२२॥
माणकस्य तव भगवतः सद्धाम श्रेष्ठमुपलब्धिस्थानं सभाजयसि संपूजयसि॥ तत् तस्मादेव कारणात् त्वं ब्र
ह्मण्यानां मध्ये अग्रणीर्मुख्यः तत्प्रवर्त्तकः सन् कर्माचरसीत्यर्थः॥२०॥ तस्मादीश्वरस्य तव वेदं जनसंग्रहमात्रं॥ य
दनुवर्त्तवसंगत्या कृतार्था इत्याहुः॥ अद्येति षड्भिः॥ सतां गत्या त्वया संगम्य संगं प्राप्य॥ यत् यस्मात्त्वं श्रेयसां

तावुद्ध्योन संतिस एव गोष्ठेवरवर ः दाहएवः अत्यविवेकी ॥ यद्वा ॥ गवांतृणादिमारवाहकः खरोगर्दभस्वेति ॥ १३ ॥ दुरन्व
यं ॥ अननुरूपं भ्रमंति ॥ अन्नवस्थिताधीः बुद्धिर्येषां ते ॥ १४ ॥ ईशितव्यतां ॥ अनीश्वरतां केमोधिकारितां ॥ जनसंग्रहमात्र
मित्तदित्य ऊचुः स्मयंतः हसंतः ॥ १५ ॥ अननन्वयं विदुः एवंतः ॥ आहुर्द्वाभ्यां ॥ यन्मायायेति ॥ तत्त्वविदुत्तमा अपि वयं ॥
कासो मायया यया विमोहिताः इति तां माकुरु ॥ यदीति ॥ यद्यस्मादीहया नरचेष्टितेन गूढः सन् ईशितव्यायति अनीश्वर

श्रीशुक उवाच ॥ निशम्येत्थं भगवतः कृष्णस्याकुंठमेधसः ॥ वचो दुरन्वयं विप्रास्तूष्णीमासन्भ्रमद्धि
यः ॥ १४ ॥ चिरं विमृश्य मुनय ईश्वरस्येशितव्यतां ॥ जनसंग्रह इत्यूचुः स्मयंतस्तं जगद्गुरुं ॥ १५ ॥ मुनय ऊचुः ॥
यन्मायया तत्त्वविदुत्तमा वयं विमोहिता विश्वसृजामधीश्वराः ॥ यदीशितव्यायति गूढ ईहया अहो विचि
त्रं भगवद्विचेष्टितं ॥ १६ ॥ अनीह एतद्बहुधैक आत्मना सृजत्यवत्यत्ति न बध्यते यथा ॥ भौमैर्हि भूमि
र्बहुनामरूपिणी अहो विभूम्नश्चरितं विडंबनं ॥ १७ ॥

वदाचरति भवान् ॥ नन्वहमीश्वरश्चेत्किमित्येवमाचरेयं तत्राहुः ॥ अहो इति भगवतस्तव चेष्टितं विचित्रमत्यद्भुतं ॥ १६ ॥ भग
वतस्तत्त्वमेवाहुः ॥ अनीह ॥ अक्रिय एव आत्मना स्वरूपमात्रेण बहुधेत्ति ॥ रक्षति ॥ यथा भौमैर्घटादिविकारैः रूपलक्षि
तं वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति श्रुतेः ॥ ननु कथमहं जगत्स्रष्ट्रादिकर्ता वसुदेवपुत्रत्वादिति तत्रा सुदेव
हुः ॥ अहो इति ॥ भूम्नः परिपूर्णस्य तव यद्जन्मादिचरितं विडंबनमनुकरणमात्रं न तु तत्त्वमिति ॥ १७ ॥ ११ ॥

२२

भा०द०अ० उपसंगृह्य चरणौ पाणिभ्यां धृत्वा बभाषे इदमिति संधिरार्षः ॥२८॥ सर्वे देवा येषु तेभ्यो यावन्तो वै देवता
१२९ स्तास्सर्वा वेदविदि ब्राह्मणे वसंतीति ॥ येन कर्मणा यथा कृतेन वा कर्मणां निर्हारो निःशेषो भवति तदुच्य
तां ॥२९॥ श्रीकृष्णं हित्वा अस्मान् पृच्छतीति विस्मितान् प्रत्याह ॥ नातीति ॥ बुभुत्सया बोद्धुमिच्छया ॥३०॥ अत्र

श्रीशुक उवाच ॥ इत्यनुज्ञाप्य दाशार्हं धृतराष्ट्रं युधिष्ठिरं ॥ राजर्षे स्वाश्रमान् गंतुं मुनयो दधिरे म
नः २७ तद्वीक्ष्य तानुपव्रज्य वसुदेवो महामनाः ॥ प्रणम्य चोपसंगृह्य बभाषेदं सुयंत्रितः ॥२८॥ व
सुदेव उवाच ॥ नमो वः सर्वदेवेभ्य ऋषयः श्रोतुमर्हथ ॥ कर्मणा कर्मनिर्हारो यथा स्यान्नस्तदुच्यतां ॥
२९॥ श्रीनारद उवाच ॥ नातिचित्रमिदं विप्राः वसुदेवो बुभुत्सया ॥ कृष्णं मत्वार्भकं यन्नः पृच्छति श्रेय आ
त्मनः ॥३०॥ सन्निकर्षोऽत्र मर्त्यानामनादरणकारणं ॥ गांगं हित्वा यथान्यांभस्तत्रत्यो याति शुद्धये
॥३१॥ यस्यानुभूतिः कालेन लयोत्पत्त्यादिनास्य वै ॥ स्वतोन्यस्माच्च गुणतो न कुतश्चन रिष्यति ॥३२॥

त्यो गंगातीरवासी ॥३१॥ श्रीकृष्णेऽर्भकत्वं मन्यमानोऽविद्याविजृंभितं तदित्याह ॥ यस्येति द्वाभ्यां ॥ अनुभूतिर्ज्ञानं कु
तश्चिदपि न रिष्यति न नश्यति तदेवाह ॥ कालेन कर्कटिकाफलवत् ॥ अस्य विश्वस्य लयोत्पत्त्यादिनापि स्वतश्च
विद्युदादिवत् ॥ अन्यस्माच्च मुद्गरादिवत् घटादेः ॥ गुणतो रूपादेर्नीलोत्पत्त्या पूर्वरूपादिनादेहादिवत् ॥३२॥ १२९

एकं वस्थाने आत्मनो येषां तेपि कालं सृष्ट्यादिकारणं ईश्वरं नियंतारं ॥२३॥ एतत्सदृष्टांतमाह ॥ यथेति ॥ शयानः स्व
प्नान् पश्यन् ॥ गुणतत्वदृक् स्वप्नविषयेषु तत्वदृष्टिर्नाममात्रमिंद्रिये एम मनसा आभातं सिंहव्याघ्रादिरूपमात्मा
नं वेद तत्र हितं परं देवदत्तादिरूपमात्मानं न वेद यथा ॥२४॥ एवं त्वा त्वां नाममात्रेषु स्वप्नादितुल्यविषयेषु
इंद्रियैर्या ईहा प्रवृत्तिः ॥ सेवमाया तया विभ्रमच्चित्तो न वेद ॥ स्मृतेर्विवेकस्योपप्लवात् नाशनात् ॥२५॥ अघौघ

न यं विदंत्यमी भूपा एकारामा अश्ववस्मयः ॥ मायाजवनिकाछन्नमात्मानं कालमीश्वरं ॥२३॥ य
था शयानः पुरुष आत्मानं गुणतत्वदृक् ॥ नाममात्रेंद्रियाभातं न वेद रहितं परं ॥२४॥ एवं त्वा
नाममात्रेषु विषयेष्विंद्रियेहया ॥ मायया विभ्रमच्चित्तो न वेद स्मृत्युपप्लवात् ॥२५॥ तस्याघते
दृशिमांघ्रिमघौघमर्षतीर्थास्पदं हृदि कृतं सुविपक्वयोगैः ॥ उत्सिक्तभक्त्युपहताशयजी
वकोशा आपुर्भवद्गतिमथानुगृहाण भक्तान् ॥२६॥

स्यमर्षं नाशं करोति ॥ यद्गंगाख्यं तीर्थं ॥ तस्याः पदं आश्रयं ते अंघ्रिं सुविपक्वयोगैरपि हृदि कृते केवलं न तु दृष्टं त
स्य ते अंघ्रिं दृशिम ॥ दृष्टवंतो वयं वहुभिः पुण्यैः ॥ यतोऽस्मान् भक्तान् अनुगृहाण भक्तान् कृत्वा अनुगृहं कुर्वीत्य
र्थः ॥ ननु किं भक्त्या यथापूर्वं तत्पर एव तत्प्राप्तामिति चेन्नेत्याह ॥ उत्सिक्ता उद्रिक्ता या भक्तिस्तया उपहतं आश

श्रे भा०द०उ० १३० ऽवस्त्यमन्तमाहुः ॥ वित्तैषणामिति ॥ वित्तफलभूतैर्यज्ञैर्दानैश्च वित्तैषणां वित्तेच्छां विसृजेत् ॥ गृहैर्गृहोचितैर्भोगै
र्दारसुतैः सुतैषणां विसृजेत् ॥ तदनुभवेन निवृत्तदौत्सुक्यानिवृत्तैः ॥ देहस्मृतेरात्मनः स्वर्गादिलोकैषणां च कालेन
क्षयानुसंधानेन विसृजेत् ॥ देवहे वसुदेव ॥ यद्वा देव कालेन देवानामपि मृत्युहेतुभूतेनेत्यर्थः ॥ अत्राचारं प्रमा
णयति ग्राम इति ॥ ३८ ॥ किंच ऋणैरिति ॥ तथा च श्रुतिः ॥ जायमानो वै ब्राह्मणस्त्रिभिरृणैर्वा जायते ब्रह्मचर्येण

वित्तैषणां यज्ञदानैर्गृहैर्दारसुतैषणाम् ॥ आत्मलोकैषणां देव कालेन विसृजेद्बुधः ॥ ग्रामे त्यक्तैषणाः जे १
सर्वे ययुर्धीरास्तपोवनम् ॥ ३८ ॥ ऋणैस्त्रिभिर्द्विजो जातो देवर्षिपितृणां प्रभो ॥ यज्ञाध्ययनपुत्रै
स्तान्यनिस्तीर्य त्यजन्पतेत् ॥ ३९ ॥ त्वं त्वद्य मुक्तो द्वाभ्यां वै ऋषिपित्रोर्महामते ॥ यज्ञैर्देवर्णमुन्मु
च्यानिरृणोऽशरणो भव ॥ ४० ॥ वसुदेव भवान्नूनं भक्त्या परमया हरिम् ॥ जगतामीश्वरं प्रार्चः स यद्वां
पुत्रतां गतः ॥ ४१ ॥

ऋषिभ्यो यज्ञेन देवेभ्यः ॥ प्रजया पितृभ्य इत्यादीन्यनिस्तीर्य ॥ तेषामृणा ॥
न्यनिस्तीर्य ॥ अनपाकृत्य ॥ तथा च मनुः ॥ ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ॥ अनपाकृत्य
मोक्षं तु सेवमानो व्रजत्यधः ॥ इति ॥ ३९ ॥ निरृणः ॥ निर्मुक्तऋणः ॥ अशरणो भव गृहात्प्रव्रज ॥ ४० ॥ किंच ॥
अविष्णुरुचिन्तानाम यंक्रमः ॥ त्वं तु कृतार्थ एवेत्याहुः ॥ वसुदेवेति ॥ प्रार्चः ॥ अर्चितवान् ॥ यद्यस्माद्वां युव

भ

तमेवं कुतश्चिदव्याहततानां भवं अतएवेश्वरं किंच ॥ अद्वितीयं कसं ॥ अन्यः प्राकृतउपरूढमाछन्नं मनुष्यं मन्ये
त ॥ कैः ॥ क्लेशकर्मादिभिः ॥ तत्र क्लेशा रागादयः कर्माणि च तत्परिपाके सुखदुःखे सत्वादिगुणानां पुनः पु
नः प्रभावश्चते ॥ प्राणादिभिः अविभवैः स्वकार्यैः ॥ अत्र दृष्टांतः ॥ मेघहिमोपरागैः ॥ अभ्रतुषारराहुभिः सविभ
वैः सूर्यमिवेति ॥ ३३ ॥ ३४ ॥ ३५ ॥ चित्तस्योपशमः उपशमे हेतुः ॥ योगो मोक्षोपाय अशने रात्मनो मुदमावहतीति तथा

तं क्लेशकर्मपरिपाकगुणप्रवाहैरव्याहतानुभवमीश्वरमद्वितीयं ॥ प्राणादिभिः सविभवैः परं दमन्यो
मन्येत सूर्यमिव मेघहिमोपरागैः ॥ ३३ ॥ अथोचुर्मुनयो राजन्नाभाष्यानकदुंदुभिं ॥ सर्वेषामेवतां राज्ञां तथैव च
च्युतसमयोः ॥ ३४ ॥ कर्मणा कर्मनिर्हार एष साधुनिरूपितः ॥ यच्छ्रद्धया यजेद्विष्णुं सर्वयज्ञेश्वरं मखैः ॥ ३५ ॥ चित्त
स्योपशमोयं वै कविभिः शास्त्रचक्षुषा ॥ दर्शितः सुगमो योगो धर्मश्चात्ममुदावहः ॥ ३६ ॥ अयं स्वस्त्ययनः पंथा
द्विजातेर्गृहमेधिनः ॥ यच्छ्रद्धयाप्तवित्तेन शुक्लेनेज्येत पुरुषः ॥ ३७ ॥ सुगमः ॥ अप्रयत्नाश्रयत्वात् ॥ धर्मश्च आवश्यकः
अन्यथा विहिताकरणेन मालिन्यप्रसंगात् ॥ ३६ ॥ ननु न कर्मणा न प्रजया न धनेन त्यागेनैके अमृतत्वमानशुरित्यादि
ना त्यागस्यैव विहितत्वात् कथं कर्म मोक्षोपाय इत्याशंक्य ॥ आद्यावेव त्यागस्याशक्यत्वादित्याशयेनाह ॥ अयमिति सा
र्द्धचतुर्भिः ॥ स्वस्त्ययनः स्वस्तिहेतुः ॥ इज्यते अनेनेति तथा ॥ श्रद्धया निष्कामतया शुक्लेन सुष्ठुन्येनार्जितेन वित्तेन पुरु

॥ १८ ॥

मा०द०उ० अनुयज्ञं प्रतियज्ञं ॥ आम्नातं सर्वांगा ॥ प्राकृताः ज्योतिष्टोम दर्शपूर्णमासादयः ॥ तेभ्यश्चोदनालिंगादिभिरतिदे
१३१ शप्राप्तांगाः वैकृताः सोयं सत्रादयः तैः सर्वैः ॥ द्रव्यं पुरोडाशादि ॥ जैन मंत्रः क्रिया कर्म तेषामीश्वरं ॥ ५१ ॥ ५२ ॥ स
एवानुयज्ञं विधिना अग्निहोत्रादिलक्षणैः ॥ प्राकृतैर्वैकृतैर्यज्ञैर्द्रव्यज्ञानक्रियेश्वरम् ॥ ५३ ॥ अथ
र्त्विग्भ्योददात्काले यथाम्नातं सदक्षिणाः ॥ स्वलंकृतेभ्यालंकृत्य गोभूकन्यामहाधनाः ॥ ५३ ॥ ५४ ॥ प
त्नीसंयाजावभृथ्येश्चरित्वा ते महर्षयः ॥ सस्नू रामह्रदे विप्रा यजमानपुरःसराः ॥ ५३ ॥ स्नातोलं
कारवासांसि वंदिभ्योदात्तथा स्त्रियः ॥ ततः स्वलंकृतो वर्णानाश्वभ्योन्नेना पूजयत् ॥ ५४ ॥ बं
धून्सदारान्सपुत्रान्पारिबर्हेण भूयसा ॥ विदर्भकोशलकुरून्काशिकेकयसृंजयान् ॥ ५५ ॥ स
दस्यर्त्विक्सुरगणान्नृभूतपितृचारणान् ॥ श्रीनिकेतमनुज्ञाप्य प्रशंसंतः प्रययुः क्रतु ॥ ५६ ॥ धृत
राष्ट्रोनुजः पार्थाभीष्मोद्रोणः पृथा यमो ॥ नारदो भगवान् व्यासः सुहृत्संबंधिबांधवाः ॥ ५७ ॥
न्नुः स्नानं च क्रुः ॥ ५३ ॥ आश्वभ्यः सुनोभिव्याप्य अन्नेनापूजयत ॥ ५४ ॥ ५५ ॥ बंध्वादीश्चारणांतान् पारिबर्हेण प्री
तिदानेनापूजयत् तेच सर्वे प्रययुः ॥ ५६ ॥ प्रयाणे केषांचिद्विशेषमाह ॥ धृतराष्ट्र इति द्वाभ्यां ॥ अनुजो विदुरः ॥ पा
१३१

६२॥६३॥६४॥ आलिप्ताःकुंकुमादिभिः॥ वस्तुपाणयः॥ गृहीताहेमहस्ताः॥६५॥ ६६॥ अक्तंनेत्रयोरंजनेन॥
श्रीशुकउवाच॥ इतितद्वचनंश्रुत्वावसुदेवोमहामनाः॥ तानृषीनृत्विजोवव्रेमूर्ध्नानम्यप्रसाद्य
च॥४२॥ तएनमृषयोराजन्वृताधर्मेणधार्मिकं॥ तस्मिन्नयाजयन्क्षेत्रेमखैरुत्तमकल्पकैः॥४३॥
तद्दीक्षायांप्रवृत्तायांवृष्णयःपुष्करस्रजः॥ स्नाताःसुवाससोराजन्राजानःसुष्ठ्वलंकृताः॥४४॥ तन्म
हिष्यश्चमुदितानिष्ककंठ्यःसुवाससः॥ दीक्षाशालामुपाजग्मुराल्लिप्तावस्तुपाणयः॥४५॥ नेदु
र्मृदंगपटहाःशंखभेर्यानकादयः॥ ननृतुर्नटनर्तक्यस्तुष्टुवुःसूतमागधाः॥ जगुःसुकंठ्योगं
धर्व्यःसंगीतंसहभर्तृकाः॥४६॥ तमभ्यषिंचन्विधिवदक्तमभ्यक्तमृत्विजः॥ पत्नीभिरष्टादश
भिःसोमराजमिवोडुभिः॥४७॥ ताभिर्दुकूलवलयैर्हारनूपुरकुंडलैः॥ स्वलंकृताभिर्विबभौदीक्षि
तोऽजिनसंवृतः॥४८॥ तस्यर्त्विजोमहाराजरत्नकौशेयवाससः॥ ससदस्याविरेजुस्तेयथावृत्रह
णोऽध्वरे॥४९॥ तदारामश्चकृष्णश्चस्वैःस्वैर्बंधुभिरन्वितौ॥ रेजतुःस्वसुतैर्दारैर्जीवेशौस्वविभूतिभिः
अभ्यक्तासर्वांगेषुनवनीतेन॥६१॥ ताभिःसहितोदीक्षितोविरेजे॥६८॥६९॥ जीवेशौसर्वजीवानामीशौ॥५०॥ ५०॥ रामराम

भा॰ द॰ उ॰ राज्यश्रीर्माभूत्त॥ छांदसोऽडभावः॥ ६२॥ ६३॥ अद्यश्व इति प्रातर्निर्गमे॥ श्रेये वापराङ्मुखतामिति पुनःपुन
१३२ रेवमानितः॥ ६६॥ ६७॥ यापितः॥ महत्तासैन्येन प्रस्थापितः॥ ६८॥ ६९॥ ७०॥ यदुदेवस्य वसुदेवस्य महोत्सवं॥ यस्मा
मा राज्यश्रीरभूत्पुंसः श्रेयस्कामस्य मानद॥ स्वजनानुत बंधून्वा न पश्यति ययांधदृक्॥ ६४॥ एवं सौ
दु हृदसैथिल्यचित्त आनकदुंदुभिः॥ रुरोद तत्कृतां मैत्रीं स्मरन्नश्रुविलोचनः॥ ६५॥ नंदस्तु सख्युः प्रियकृ
त्प्रेम्णा गोविंदरामयोः॥ अद्यश्व इति मासांस्त्रीन्यदुभिर्मानितोऽवसत्॥ ६६॥ ततः कामैः पूर्यमाणः
सव्रजः सहबांधवः॥ परार्ध्याभरणक्षौमनानानर्घ्यपरिच्छदैः॥ ६७॥ वसुदेवोग्रसेनाभ्यां कृष्णोद्धवब
लादिभिः॥ दत्तमादाय पारिवर्हं यापितो यदुभिर्ययौ॥ ६८॥ नंदो गोपाश्च गोप्यश्च गोविंदचरणांबुजे
मनः क्षिप्तं पुनर्हर्तुमनीशा माथुरान्ययुः॥ ६९॥ बंधुषु प्रतियातेषु वृष्णयः कृष्णदेवताः॥ वीक्ष्यप्रा
वृषमासन्नां ययुर्द्वारवतीं पुनः॥ ७०॥ जनेभ्यः कथयांचक्रुर्यदुदेवमहोत्सवं॥ यदासीत्तीर्थयात्रायांसु
हृत्संदर्शनादिकं॥ ७१॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे तीर्थयात्रावर्णनं चतुरशीति
तमोऽध्यायः॥ ८४॥

दिलक्षणम्॥ सुहृत्संदर्शनादिकं चेति॥ ७१॥ इति श्री दशमे चतुरशीतितमः॥ ८४॥ श्री हरये नमः॥ ॥श्री ॥१३२॥

सोहदेवाक्लिन्नानि चेतांसि येषां ते ॥ ५८ ॥ ५९ ॥ मनोरथो यन्न विषय: तन्मेवमहार्णवं ॥ ६० ॥ स्मरणं वल्लेन योगिनां मा
नेनापीत्यर्थ: ॥ ६१ ॥ तत्कृत: तत्राह ॥ अस्मास्वितिकृतात्येषु कृतं समुपकारमजानन्तस्तु सत्तमे भैर्वद्भिर प्रतिकल्यात्र अनुप

वंधनपरिषज्य यदून्सोहं दारक्लिन्नचेतस: ॥ ययुर्विरहकृच्छ्रेण स्वदेशं श्वापरेजना: ॥ ५८ ॥ नं
दस्तु सह गोपालैर्वृद्धत्याप्ययज्याचित: ॥ कंसराममोग्रसेनाद्यैर्न्यवात्सीद्धधुवत्सल: ॥ ५९ ॥ वसुदे
वोग्रजसेनाप्यीमनोरथमहार्णवं ॥ सुहृद्वृत्त: प्रीतमनानंदमाहकरस्पशान् ॥ ६० ॥ वसुदेवबला
चा ॥ भ्रातरीशकृत: पाशोन्तरगाय: स्नेहसंज्ञित ॥ तं दुस्त्यजमहं मन्ये शूराणामपि योगिना ॥ ६१
अस्मास्वप्रतिकल्पेयं यत्कृताह्येषु सत्तमे: ॥ मैत्र्यर्पिताफलाचापि न निवर्तेत कर्हिचित् ॥
६२ ॥ प्रागकल्याच्चकुशलं भ्रातर्वो नाचराम हि ॥ अधुना श्रीमदांधाह्ता न पश्याम: पुर: सत: ॥ ६३

मा मैत्रीयमर्पिता ॥ अफलापि ॥ प्रत्युपकाररहिता अपि कर्हिचिद्यस्मान्न निवर्तेत ॥ तस्मादीश्वरकृत: पाशोयं
भवतामिति गम्यत इत्यर्थ: ॥ ६२ ॥ अफलत्वमेवाह ॥ प्रागिति ॥ हे भ्रात: ॥ अकल्याद् असमर्थत्वात् ॥ व: कुशलं
प्रियं न हि ॥ आचराम न कृतवन्तो वयं ॥ श्रीमदेनांधान्यद्दीणिये सांते ॥ ६३ ॥

एवंसर्वप्रपंचमनूद्य तत्कारणस्य भगवद्रूपतां विधत्ते ॥ इदंसाक्षादिति प्रधानं भोग्यं ॥ पुरुषो भोक्ता तयोरीश्वरो
भगवांस्त्वमेव साक्षादिति ॥ तयोरैक्यमभिप्रेत्यैकवचनं ॥ ४ ॥ किंच ॥ धारणपोषणकर्तापि त्वमेवेत्याह ॥ एत
दिति ॥ हे आत्मन् ॥ प्राणः क्रियाशक्तिः ॥ जीवो ज्ञानशक्तिश्च सन् त्वमेव बिभर्षि ॥ ५ ॥ ननु प्राणादीनां विचित्रश
क्तीनां कारणत्वावगमात् ॥ कथं परमेश्वरस्यैव कारणत्वेन सर्वात्मकत्वमुच्यत इत्याशंक्य प्राणादिशक्तयोपि त
स्यैवेत्याह ॥ प्राणादीनामिति ॥ प्राणः सूत्रं ॥ तदादीनां विश्वसृजां विश्वकारणानां याः शक्तयस्ताः ॥ परस्परमकारणस्य

एतन्नानाविधं विश्वमात्मसृष्टमधोक्षज ॥ आत्मनानुप्रविश्यात्मन्प्राणो जीवो बिभर्ष्यजः ॥ ५ ॥ प्रा
णादीनां विश्वसृजां शक्तयो याः परस्य ताः ॥ पारतंत्र्याद्वैसादृश्याद्द्वयोश्चेष्टैव चेष्टतां ॥ ६ ॥ ॥ श्र

श्वरस्यैव कुतः ॥ पारतंत्र्यात् ॥ यथा वेधशक्तिर्न बाणस्य ॥ अपितु पुरुषस्य तद्वदित्यर्थः ॥ ननु भगवतः प्राणादिव
र्गस्य च स्वातंत्र्यमेव किं न स्यात् ॥ अत आह वैसादृश्यात् द्वयोरिति ॥ चेतनाचेतनत्वेन विसदृशत्वात् ॥ द्वयोश्चेतनप्रा
णादिवर्गस्य चेतनापारतंत्र्यमेवेत्युक्तमित्यर्थः ॥ यद्वा ॥ प्राणादिषु द्वयोरेव तावद्विसदृशत्वे विरुद्धक्रियाकारित्वा
त् किंपुनर्बहूनां ॥ तस्मादेकेन सर्वज्ञेन सर्वशक्तिनाधिष्ठितानामेव विशिष्टकार्यारंभकत्वं युक्तं ॥ न स्वतंत्राणामि
ति ॥ तथा चोक्तं ॥ यदैते संहता भावा भूतेंद्रियमनोगुणाः ॥ यदायतननिर्माणे न शेकुर्ब्रह्मवित्तम ॥ तदा संहत्य चान्यो
न्यं भगवच्छक्तिचोदिताः ॥ सदसत्वमुपादाय चोभयं ससृजुर्ह्यद इति ॥ तथान्यायतोपि स्वक्रियानीशाः [illegible] प्रोचुः प्रांजल

म्र.२

पंचाशीतित्तमेराम कृष्णौसंप्रार्थितौ सुतौ॥ पित्रेज्ञानम घोमात्रेम्दत्तानपुत्रानयच्छत्तां॥ नंदयित्वा कुरुक्षेत्रे यात्रा यास्सुहृदो वद्दन्न॥ तत्वज्ञानं ततः पित्रोरादिशन्मत्तस्सूनुभिः॥१॥ धामसप्रभावम॥ तत्सूचकं॥ जातविस्त्रंभः॥ अत्यन्तवि श्वासः॥ परिभाष्य संबोध्य॥२॥ अस्य विश्वस्य यत्साक्षात्॥ स्वस्वरूपंभूतं कारणं प्रधान पुरुषौ नाम परोत्तयोर विकारणत्वे नेश्वरो साक्षाद्युवामितिजाने॥३॥ नन्विदं विश्वमनेककारकैर्जायमानं॥ कुतः प्रधानपुरुषात्मकं॥ कुतस्तरामा वयो

श्रीशुकउवाच॥ अथैकदात्मजौ प्राप्तौ कृत पादाभिवंदनौ॥ वसुदेवोभिनंद्याह प्रीत्यासंकर्षणाच्युतौ॥१ मुनीनां सवचः श्रुत्वा एवं योद्वीमस्सूचकं॥ नद्दी॥ यस्सज्जातविस्त्रंभः परिभाष्याध्यभाषत॥२॥ कृष्ण कृष्ण महा योगिन्संकर्षणसनातन॥ जानेवामस्य यत्साक्षात्प्रधान पुरुषौ परौ॥३॥ यत्र येन यतो यस्य यस्मै यद्यद्य थायदा॥ स्यादिदं भगवान्साक्षात्प्रधान पुरुषेश्वरः॥४॥

तत्कारणत्वेनेश्वरत्वं तत्राह॥ यत्रेति॥ यत्राधिकरणे यु नकर्त्रा करणेन च॥ यतोपादानात्॥ यस्य संबंधेन षष्ठ्यर्थस्याकारकत्वेपि निमित्ततोक्ता॥ यस्मै संप्रदानाय॥ यद्यदिति प्रयोज्य कर्तृकर्म कारकेदर्शिते॥ ननु तत्तयोर्नास्ति भेदः॥ यथोक्तं॥ करोति क्रियमाणेन नकश्चित्कर्मणा विना॥ भवत्यर्थस्यक र्तीचकरोतेः कर्मजायते॥ तथाकरोत्यर्थस्य यः कर्त्ताभवितुः सप्रयोजकः॥ भवितातमपेक्षाथ प्रयोज्यत्वेप्रपद्यतइति चस त्यं॥ तथाप्यवस्थाभेदेन भेदो विवक्षितः॥ दृश्यते चावस्थाभेदः॥ तंडुलानोदनं पचति॥ मृदं घटं करोति॥ तदेवं सप्रविभ

तैयथोदर्शिताः॥ यथेति॥ यदेति च॥ क्रियाविशेषणमेता॥ नामन्येषां वा वाचनामार्थः स्यादिति क्रियापदार्थोपलक्षणं॥

भा०द०३० इंद्रियाणामिंद्रियं विषयप्रकाशनशक्तिः ॥ देवाश्चेंद्रियाधिष्ठातारः ॥ तदनुग्रहस्तेषां अधिष्ठानशक्तिश्च त्वं ॥ अवबोधव
१२४ वसायशक्तिः ॥ अनुस्मृतिः प्रतिसंधानशक्तिः ॥ १० ॥ भूतानां कारणं भूतादिस्तामसाहंकारस्त्वमसि ॥ इंद्रियाणां का
रणं तैजसोऽहंकारस्त्वं ॥ द्विविधः अधिदैवाध्यात्मभेदेन कल्प्यत इति विकल्पा देवास्तेषां कारणं ॥ वैकारिकः सात्वि
कोऽहंकारस्त्वं ॥ अनुशायिनां जीवानां संसारकारणं प्रधानं त्वं ॥ ११ ॥ अपि च ॥ नश्वरेषु नाशशालिषु इह एतेषु भावेषु

इंद्रियं त्विंद्रियाणां त्वं देवाश्च तदनुग्रहः ॥ अवबोधो भवान्बुद्धेर्जीवस्यानुस्मृतिः सती ॥ १० ॥ भूतानामसि
भूतादिरिंद्रियाणां च तैजसः ॥ वैकारिको विकल्पानां प्रधानमनुशायिनां ॥ ११ ॥ नश्वरेष्विह भावे
षु तदसि त्वमनश्वरं ॥ यथा द्रव्यविकारेषु द्रव्यमात्रं निरूपितं ॥ १२ ॥ सत्वं रजस्तम इति गुणास्तद्वृ
त्तयश्च याः ॥ त्वय्यद्धा ब्रह्मणि परे कल्पिता योगमायया ॥ १३ ॥ तस्मान्न संत्यमी भावा यर्हि त्वयि विकल्पि
ताः ॥ त्वं चामीषु विकारेषु ह्यन्यदा व्यावहारिकः ॥ १४ ॥

यदनश्वरमवशिष्यमाणं रूपं तत्त्वमसि ॥ द्रव्यविकारेषु मृत्सुवर्णादिकार्येषु घटकुंडलादिषु नश्वरेषु द्रव्यमात्रं
मृत्सुवर्णादिमात्रमनश्वरं यथा तद्वत् ॥ १२ ॥ ननु त्रिगुणात्मकं कार्यरूपोऽपि त्वमित्युक्तत्वात् कथमनश्वरत्वं तत्रा
ह सत्वमिति ॥ तद्वृत्तयस्तत्परिणामाश्च महदादयः ॥ अद्धा साक्षात्त्वयि परे ब्रह्मणि कल्पिताः ॥ १३ ॥ तस्मान्न संति न
च सत्तां कथं प्रतीतिरत आह ॥ यर्हीति ॥ यदा विकल्पितास्तदेव प्रतीतिमात्रेण त्वयि संति ॥ त्वं चामीषु तदेव कारणत १२४

पारतंत्र्यमेव प्रपंचयति । कांतिरिति पंचभिः । चंद्रस्य कांतिः । अग्नेस्तेजः । अर्कस्य प्रभा । स्फुरद्विद्युतां सत्ता स्फुरणमात्रेण सत्त्वं अर्थतो वस्तुतो भवान् । तथा च श्रुतिः । न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भांति कुतोऽयमग्निः तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति । स्मृतिश्च । यदादित्यगतं तेजो जगद्भासयतेऽखिलं । यच्चंद्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकमिति । भूमेर्वृत्तिः । प्राणिनामाधारत्वेन वर्त्तनं गंधश्च भवांस्तवैव शक्तिरित्यर्थः ॥

कांतिस्तेजः प्रभा सत्ता चंद्राग्न्यर्कर्क्षविद्युतां । यः स्थैर्यं भूभृतां भूमेर्वृत्तिर्गंधोऽर्थतो भवान् ॥ ९ ॥ तर्पणं प्राणनमपां देव त्वं ताश्च तद्रसः । ओजः सहो बलं चेष्टा गतिर्वायोस्तवेश्वर ॥ दिशां त्वमवकाशोऽसि दिशः खं स्फोट आश्रयः । नादो वर्णस्त्वमोंकार आकृतीनां पृथक्कृतिः ॥ ९ ॥ ॥ १० ॥

किंच हे देव । अपां तर्पणं तृप्तिजनकत्वं । प्राणनं जीवनहेतुत्वं । ताश्च आपश्च तासां रसश्च त्वमेव । किंच । वायोरोजः सहादितवैव शक्तिः । दिशामुपाधिकृताकाशप्रदेशानामवकाशो दिशश्च त्वं । खं च सामान्याकाशः तदाश्रयः स्फोटश्च । शब्दतन्मात्रम् । परावस्था वा इत्यर्थः । नादः पश्यंती । ओंकारः मध्यमा वर्णश्च । आकृतीनां पदार्थानां पृथक्कृतिः पृथक्करणमभिधानं यस्मात् तत्पदं । वर्णपदात्मिका वैखरी च त्वमित्यर्थः ॥ ९ ॥

 ननु कुत एतत्त ॥ अहं परमेश्वर इति तत्राह ॥ सुतौ गृह इति ॥ अनुयुगं प्रतियुगं नौ आवयोर्यद्दासुतपाः पृश्नि
 रिति युग्मं यद्वा च कश्यपो दितिश्चेति युग्मं ॥ अधुना चेव वसुदेव देवकीति युग्मं ॥ एवं हि प्रतियुग्मं ॥ अंशेन
एवाहं संजज्ञे ॥ अवतीर्ण इति भवाननुजगाद ॥ ननु चासौ चतुर्भुजो देव इति तत्राह ॥ नानातनूरिति ॥ गगनव

सुतौ गृहे ननु जगाद भवानजो नौ संजज्ञ इत्यनुयुगं निजधर्मगुप्त्यै ॥ नानातनूर्गगन
वद्विदधज्जहासि को वेद भूम्न उरुगाय विभूतिमायां ॥ २० ॥ श्रीशुक उवाच ॥ आकर्ण्येत्थं पितु
र्वाक्यं भगवान्सात्वतर्षभः ॥ प्रत्याह प्रश्रयानम्रः प्रहसन् श्लक्ष्णया गिरा ॥ २१ ॥ श्रीभगवानुवाच ॥ वचो
वः समवेतार्थं तातैतदुपमन्महे ॥ यन्नः पुत्रान्समुद्दिश्य तत्त्वग्राम उदाहृतः ॥ २२ ॥ अहं यूयमसावा
र्य इमे च द्वारकौकसः ॥ सर्वेप्येवं यदुश्रेष्ठ विमृश्याः सचराचरं ॥ २३ ॥ आत्मा ह्येकः स्वयंज्योतिर्नित्यो
ऽन्यो निर्गुणो गुणैः ॥ आत्मसृष्टैस्तत्कृतेषु भूतेषु बहुधेयते ॥ २४ ॥

द संग एव सन् ॥ भूम्नः सर्वगतस्य विभूतिरूपां मायां ॥ २० ॥ २१ ॥ उपमन्महे ॥ उपमन्यामहे ॥ समुद्दिश्य विषयीकृ
त्य ॥ तत्त्वग्रामः तत्त्वसमूहः ॥ उदाहृतः सम्यङ्निरूपितः ॥ २२ ॥ इमामेव दृष्टिं सर्वत्र वितन्वेत्याह ॥ अहमिति ॥ एवं
विमृश्याः ॥ ब्रह्मत्वेनैवान्वेषणीयाः ॥ किंच सचराचरं जगदपि ॥ २३ ॥ ननु नानाविकारवतो कुतो ब्रह्मत्वं ॥ ब्रह्मण ए
व उपाधिधर्मैर्बहुधा प्रतीतेरिति सदृष्टांतमाह ॥
द्वाभ्यां आत्मा हीति ॥ २४ ॥

एवंरूपत्वमज्ञाननिबंधनश्च संसार इत्याह ॥ गुणप्रवाह इति ॥ सत्त्वं मां निष्प्रपंचां गतिमबुधाः अविद्वांसः अबुद्धे
त्विवापाठः ॥ अत ॥ अबोधेन देहाभिमानेन कृतैः कर्मभिः संसरंतीति ॥ १४ ॥ एवं तयोस्तत्त्वं निरूप्य तदप्राप्तौ शोच
त्ति ॥ यदृच्छयेति ॥ नृतां मनुष्यतां सुकल्पां यदुत्तरैन्द्रियां ॥ अहो किमिति प्रमत्तोऽसि ॥ त्वया बद्धाभि ॥ पाशैर्निबद्धत्वादि
त्याह ॥ असावहमिति ॥ देहे अस्य देहस्यान्वयादिषु पुत्रादिषु च ममैवैत इति ॥ १७ ॥ अहो त्वत्तस्तयोरावयोः किमि

गुणप्रवाह एतस्मिन्नबुधास्त्वखिलात्मनः ॥ गतिस्त्वामबोधेन संसरंतीह कर्मभिः ॥ १५ ॥ यदृच्छया
नृतां प्राप्य सुकल्पामिह दुर्लभां ॥ स्वार्थे प्रमत्तस्य वयो गतं त्वन्माययेश्वर ॥ १६ ॥ असावहं ममैवै
ते देहे चास्यान्वयादिषु ॥ स्नेहपाशैर्निबध्नाति भवान्सर्वमिदं जगत् ॥ १७ ॥ युवां न नः सुतौ साक्षात्प्रधा
नपुरुषेश्वरौ ॥ भूभारक्षत्रक्षपण अवतीर्णौ तथात्थ ह ॥ १८ ॥ तत्ते गतोऽस्म्यरणमद्य पदारविंदमापन्नसंस
तिभयापहमार्त्तबंधो ॥ एतावतालमलमिंद्रियलालसेन मर्त्यात्मदृक्त्वयि परे यदपत्यबुद्धिः ॥ १९ ॥

दमारोप्यते ॥ अतस्त्राह युवामिति ॥ भूभारस्य क्षत्रस्य क्षपणार्थं अवतीर्णौ तथाह ॥ निश्चितं आत्थ कथयसि ॥ १८ ॥ तत्तस्मादहं
शरणमापन्नानां संसृतिभयमपहरतीति तथा तत ॥ ननु त्वमिति सुखी हृष्टा किं निर्विद्यसे ॥ अत आह ॥ एतावतेति ॥ इंद्रि
यलालसेन इंद्रियार्थलालसया ॥ यतो येनेंद्रियलालसेन मर्त्ये शरीरे आत्मदृक् आत्मबुद्धिरहं ॥ वः पि च परमे अ

यस्यांशः ॥ पुरुषस्तस्यांशो माया ॥ तस्यांश्अंशा गुणाः ॥ तेषां भागेन परमाणुमात्रलेशेन विश्वोत्पत्त्यादयो भवंति
भा० द० उ० तत्वा त्वां गतिं शरणं गतास्मि ॥ ३१ ॥ आनिन्यथुः ॥ आनीतवंतौ पितृस्थानात् यमसदनात् ॥ ३२ ॥ ३३ ॥ ३४ ॥ दैत्यराड्ब
१३६

यस्यांशांशांशभागेन विश्वोत्पत्तिलयोदयाः ॥ भवंति किल विश्वात्मंस्तं त्वाद्याहं गतिं गता ॥ ३१ ॥ चिरान्मृ
तसुतादाने गुरुणा किल चोदितौ ॥ आनिन्यथुः पितृस्थानाद्गुरवे गुरुदक्षिणां ॥ ३२ ॥ तथा मे कुरुतं का
मं युवां योगेश्वरेश्वरौ ॥ भोजराजहतान्पुत्रान्कामये द्रष्टुमाहृतान् ॥ ३३ ॥ ऋषिरुवाच ॥ एवं संचो
दितौ मात्रा रामः कृष्णश्च भारत ॥ सुतलं संविविशतुर्योगमायामुपाश्रितौ ॥ ३४ ॥ तस्मिन्प्रविष्टावु
पलभ्य दैत्यराट् विश्वात्मदैवं सुतरां तथात्मनः ॥ तद्दर्शनाह्लादपरिप्लुताशयः सद्यः समुत्थाय
ननाम सान्वयः ॥ ३५ ॥ तयोः समानीय वरासनं मुदा निविष्टयोस्तत्र महात्मनोस्तयोः ॥ दधार पा
दाववनिज्य तज्जलं सवृंद आब्रह्म पुनद्यदंबु ह ॥ ३६ ॥ समर्हयामास स तौ विभूतिभिर्महार्हव
स्त्राभरणानुलेपनैः ॥ तांबूलदीपामृतभक्षणादिभिः स्वगोत्रवित्तात्मसमर्पणेन च ॥ ३७ ॥

लिः ॥ कथंभूतौ विश्वस्यात्मभूतं दैवं सान्वयः सपरिवारः ॥ ३५ ॥ सवृंदः सपरिजनः ॥ कथंभूतौ पादाववनिज्य
पदं तु पयोरवनेजनोदकं ॥ आब्रह्म ब्रह्माणमभिव्याप्य जगत्पवित्रयतेतौ ॥ ३६ ॥ ३७ ॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ॥ ऽऽ १३६

यथाखादीनि भूतानि॥ तत्कृतेषु घटादिष्वाविस्तिरोभावादिकं यांति॥ एवमसावात्मापि आत्मसृष्टैर्गुणैः कृत्वा तत्कृ
तेषु देहेष्वेव धार्यते॥ पुनस्स्वयथाशयं यथोपाधि आविर्भवति तिरोभावादिरूपेण प्रतीयते न वस्तुतः॥ कुतः एकोवद्धु
धास्त्वयं ज्योतिर्दृश्यत्वेन नित्योऽनित्यत्वेन॥ अन्योनन्यत्वेन निर्गुणः गुणत्वेनेत्यादि वद्धुधा त्वं प्रपंचनीयं॥२५॥२६

खं वायुर्ज्योतिरापो भूस्तत्कृतेषु यथाशयं॥ आविस्तिरोऽल्पभूर्य्येको नानात्वं यात्यसावपि॥२५॥
श्रीशुक उवाच॥ एवं भगवता राजन्वसुदेव उदाहृतं॥ श्रुत्वा विनष्टनानाधीस्तूष्णींप्रीतमना अभू
ता१ त्॥२६॥ अथ तत्र कुरुश्रेष्ठ देवकी सर्वदेवता॥ श्रुत्वानीतौ गुरोः पुत्रमात्मजाभ्यां सुविस्मिता॥२७॥ कृष्ण
रामौ समाश्राव्य पुत्रान्कंसविहिंसितान्॥ स्मरंती कृपणं प्राह वैक्लव्यादश्रुलोचना॥२८॥ देवक्यु
वाच॥ राम रामाप्रमेयात्मन्कृष्ण योगेश्वरेश्वर॥ वेदाहं वां विश्वसृजामीश्वरावादिपूरुषौ॥२९॥
कालविध्वस्तसत्त्वानां राज्ञामुच्छास्त्रवर्त्तिनां॥ भूमेर्भारायमाणानामवतीर्णौ किलाद्य मे॥३०॥

सुविस्मितासती॥२७॥ समाश्राव्य संबोध्य॥२८॥२९॥ भूमेर्भारायमाणानां राज्ञामर्थे तेषां नि
धनार्थं मे मयि किलावतीर्णौ हे आद्य॥३०॥ रामरामरामरामरामरामरामरामरामरामरामरा

न तु सात्त्विकेभ्योपि राजसादयः सन्ति कष्टा इति चिन्तं तत्राह ॥ इदमित्थमिति ॥ इदमित्थं स्वरूपतः इत्थमिति विशेष
तश्च ॥ ४४ ॥ तदेवमपि वैरभावेनापि त्वत्प्राप्तिर्भवेत् ॥ न चापीमां सात्त्विकं कुर्विति प्रार्थयते ॥ तन्न इति ॥ तत्तथा नः प्र
सीद ॥ यथा निरपेक्षैरात्मकामैरपि विमृग्यं ॥ युष्मत्पादारविंदं तदेव धिषणमाश्रयः ॥ तस्मादन्यद्गृहं ॥ तदेवांध
कूपस्तस्मान्निष्क्रम्य निर्गत्य विश्वस्य शरणं रक्षितारो वृक्षास्तेषामंघ्रिमूलेषु स्वत एव गलितैः फलैः

इदमित्थमितिप्रायस्तव योगेश्वरेश्वर ॥ न विदंत्यपि योगेशा योगमायां कुतो वयं ॥ ४४ ॥
तन्नः प्रसीद निरपेक्षविमृग्ययुष्मत्पादारविंदधिषणान्यगृहांधकूपात् ॥ निष्क्रम्य वि
श्वशरणांघ्र्युपलब्धवृत्तिः शांतो यथैक उत सर्वसखैश्चरामि ॥ ४५ ॥ साध्यस्थानीषितव्येश
निष्पापान्कुरु नः प्रभो ॥ पुंसां यच्छ्रद्धयातिष्ठंश्चोदनाया विमुच्यते ॥ ४६ ॥

द्भिरुपलब्धा प्राप्ता वृत्तिर्जीविका येन सोहं शांतः सन्नेक एव चरामि ॥ उत अथवा सर्वेषां सखायो ये महां
तस्तैः सह यथा चरामीति ॥ ४५ ॥ कथमल्पपुण्यानामेवं भावः संभवतीति चेत्तर्हि तथैव तद्भवेत्तथास्मान्नु
शिक्षयेत्याह ॥ साधीति ॥ हे प्रभो ईशितव्याः सर्वे जीवास्तेषामीशाय त्वत्तोवानुशासनं आश्रयंत ॥ चोदनायाः
विधिलक्षणायाः सकाशाद्विमुच्यते ॥ न खलु त्वदनुरक्तो विधिकिंकरः स्यादिति भावः ॥ ४६ ॥ ॥ ऽऽ ॥ १३०

सइंद्रसेनो वलिः ॥ प्रेमविभिन्नया प्रेममार्द्रया धिया विभ्रद्धारयत् ॥ ३८ ॥ अनंताय शेषाय वृहते फणैकदेशे विश्वधा
रणात् वृहत् ॥ तस्मै कृष्णाय वेधसे जगद्विधात्रे सांख्ययोगवितानायेत्यादि ॥ पदत्रयमैक्यविवक्षया ॥ ३९ ॥ योगी
श्वराणामपि दुर्दर्शौ युवामस्माभिर्दृष्टावित्येतन्नातिचित्रमित्याह ॥ दर्शनमिति ॥ दुःप्रापमपि युष्मत्कृपया केषां

सइंद्रसेनो भगवत्पदांबुजं विभ्रन्मुहुः प्रेमविभिन्नया धिया ॥ उवाच हानंदजलाकुलेक्षणः प्रहृष्ट
रोमानतपगकंदराह्वरः ॥ ३८ ॥ बलिरुवाच ॥ नमोनंताय वृहते नमः कृष्णाय वेधसे सांख्ययोगवि
तानाय ब्रह्मणे परमात्मने ॥ ३९ ॥ दर्शनं वां हि भूतानां दुष्प्रापं चाप्य दुर्लभं ॥ रजस्तमःस्वभावानां य
न्नः प्राप्तौ यदृच्छया ॥ ४० ॥ दैत्य दानव गंधर्वाः सिद्धविद्याध्रचारणाः ॥ यक्षरक्षःपिशाचाश्च भूतप्रमथ
नायकाः ॥ ४१ ॥ विशुद्धसत्वधाम्न्यद्धा त्वयि शास्त्रशरीरिणि ॥ नित्यं निवद्धवैरास्ते वयं चान्ये च तादृ
शाः ॥ ४२ ॥ केचनोद्धद्धवैरेण भक्त्या केचन कामतः ॥ न तथा सत्वसंरब्धाः सन्निकृष्टाः सुरादयः ॥ ४३ ॥

चिद्दुर्लभमपि भवतीत्याह रजस्तमस्स्वभावानामिति ॥ नो दर्शनं प्राप्तौ ॥ ४० ॥ अहो विद्विषो वयं सात्विकभक्तो
भ्योपि सभाग्या इत्याह ॥ दैत्येत्यादित्रिभिः ॥ ४१ ॥ ४२ ॥ उद्धद्धवैरेण या भक्तिस्तया केचनेति ॥ चैद्यादयः कामतो भक्त्या
गोप्यादयो यथा सन्निकृष्टाः ॥ न दीप्तिमंतो प्राप्ताः ॥ तथा संरब्धाः सत्वाविष्टाः अपि तु सुरादयो न निकृष्टा इति ॥ ४३ ॥

भा० द० ८५ ॥ ५३ ॥ ५४ ॥ अमृतत्वे हेतुः पीतशेषमिति ॥ नारायणांगसंस्पर्शेन प्रतिलब्धं देवावयमित्यात्मदर्शनं ययैस्ते ॥ ५५ ॥
॥ १३८ ॥ धाम देवलोकं ॥ ५६ ॥ मृतानामागमनं निर्गमं चेष्टी हृ कृष्णमायां मेने ॥ तेनैवापत्यादिरूपेण स्वचित्तं ॥ ५७ ॥ ५८ ॥
अमृता कीर्त्तिर्यस्य तस्य व्यासपुत्रैरिति वहुवचनं पूजार्थे ॥ जगतः अघं भिनत्तीति तथा तेन ॥ अलं निःशेषेण पापभव

तान्दृष्ट्वा बालकान्देवी पुत्रस्नेहस्नुतस्तनी ॥ परिष्वज्यांकमारोप्य मूर्ध्न्यजिघ्रदभीक्ष्णशः ॥ ५३ ॥
अपाययत्स्तनं प्रीता सुतस्पर्शपरिस्नुतं ॥ मोहिता मायया विष्णोर्यया सृष्टिः प्रवर्त्तते ॥ ५४ ॥ पी
त्वामृतं पयस्तस्याः पीतशेषं गदाभृतः ॥ नारायणांगसंस्पर्शप्रतिलब्धात्मदर्शनाः ॥ ५५ ॥ ते नम
स्कृत्य गोविंदं देवकीं पितरं बलं ॥ मिषतां सर्वभूतानां ययुर्धाम दिवौकसां ॥ ५६ ॥ तं दृष्ट्वा देवकी दे
वी मृतागमननिर्गमं ॥ मेने सुविस्मिता मायां कृष्णस्य रचितां नृप ॥ ५७ ॥ एवंविधान्यद्भुतानि कृष्ण
स्य परमात्मनः ॥ वीर्याण्यनंतवीर्यस्य संत्यनंतानि भारत ॥ ५८ ॥ सूत उवाच ॥ य इदमनुशृणोति
श्रावयेद्वा मुरारेश्चरितममृतकीर्तेर्वर्णितं व्यासपुत्रैः ॥ जगदघभिदलं तद्भक्तसत्कर्णपूरं भगवति कृ
तचित्तो याति तत्क्षेमधाम ॥ ५९ ॥

मित्तथा ॥ नह कृष्णादिवदिति ॥ तदेव मोक्षहेतुत्वं चोक्तं तद्भक्तानां तु सत्कर्णपूरं परमसुखावहं ॥ कर्णाभरणमिति स्वयं सु ॥ हरि ॥ हरि
स्वरूपतामाह ॥ किंच ॥ भगवति कृतमावेशितं चित्तं येन स तथाभूत्वा तस्य क्षेमधाम कालादिभयरहितं ॥ लोकं या ॥ १३८ ॥

तदुक्तं सर्वमनुमाद्य स्वागमनकारणं सप्रपंचं कथयति ॥ आसन्निति पंचभिः ॥ ऊर्णायां प्रथमेंतरे स्वायंभु
वे मन्वंतरे देवाः सुतां वाचं यभितुं यब्धुं मैथुनेन रमयितुं उद्युक्तं कं प्रजापतिं जहसुः ॥ उपहसितवंतः ॥ ४७ ॥
तेनावद्यकर्मणा पापेनासुरीं योनिमगन् ॥ अगमन् ॥ अधुनात तत्क्षणमेव हिरण्यकशिपोर्जाता इत्यर्थः ॥ ४८ ॥ ते

श्रीभगवानुवाच ॥ आसन्मरीचेः षट् पुत्रा ऊर्णायां प्रथमेंऽतरे ॥ देवाः कं जहसुर्वीक्ष्य सुतां यभितु
मुद्यतं ॥ ४७ ॥ तेनासुरीमगन्योनिमधुनावद्यकर्मणा ॥ हिरण्यकशिपोर्जाता नीतास्ते योगमाय
या ॥ ४८ ॥ देवक्या उदरे जाता राजन्कंसविहिंसिताः ॥ सा तान्शोचत्यात्मजान्स्वांस्त इमेऽध्यासतेंऽति
के ॥ ४९ ॥ इत एतान्प्रणेष्यामो मातृशोकापनुत्तये ॥ ततः शापाद्विनिर्मुक्ता लोकं यास्यंति विज्वराः ॥ ५० ॥
स्मरोद्गीथः परिष्वंगः पतंगः क्षुद्रभृद्घृणी ॥ षडिमे मत्प्रसादेन पुनर्यास्यंति सद्गतिं ॥ ५१ ॥ इत्यु
क्त्वा तान्समानीय इंद्रसेनेन पूजितौ ॥ पुनर्द्वारवतीमेत्य मातुः पुत्रानयच्छतां ॥ ५२ ॥

च योगमायया ततो नीताः संतः ॥ देवक्या उदरे जाताः ॥ हे राजन्नवले ते च कंसेन विहिंसिताः ॥ सा च तानात्मजान्
मत्वा शोचति ते च इमे सुतलेऽतिके अध्यासते ॥ ४९ ॥ लोकं जन्मलोकं ॥ ५० ॥ स्मरोद्गीथः ॥ स्मरसहित उद्गीथः ॥ सद्गतिं मो
क्षं स्मरस्यैव पूर्वं कीर्तिमानिति नाम ॥ अतः हेतुः कीर्तिमंतं प्रथमजं कंसायानकदुंदुभिरर्पयामासेत्युक्तं ॥ ५१ ॥

भा०द० उ० भावेनरत्यभिप्रायेण क्षुभितं मनो दधे ६ व्रीडितापांगी सव्रीडकटाक्षा तस्मिन्नेव न्यस्तं हृदयमीक्षणं च

१३९ यया सा ७ अन्तरं हर्तुमवसरं प्रेप्सुः प्राप्तुमिच्छुः कामेन भ्रमच्चित्तं यस्य सः शरामादिसमाननिमित्तेषु रवं च

सोऽपश्यत्तत्र महतीं कन्यां वीरमनोहरां । प्रीत्युत्फुल्लेक्षणस्तस्यां भावक्षुब्धं मनो दधे ६ सापि तं
चकमे वीक्ष्य नारीणां हृदयंगमं । हसंती व्रीडितापांगी तन्न्यस्तहृदयेक्षणा ७ तां परं समनुध्याय यात्रा ३
न्नन्तरं प्रेप्सुरर्जुनः । न लेभे शं भ्रमच्चित्तः कामेनातिबलीयसा ८ महत्यां देवयात्रायां रथस्थां दुर्गनिर्गतां । ज
हारानुमतः पित्रोः कृष्णस्य च महारथः ९ रथस्थो धनुरादाय शूरांश्चारुंधतो भटान् । विद्राव्य क्रो
शतां स्वानां स्वभागं मृगराडिव १० तच्छ्रुत्वा क्षुभितो रामः पर्वणीव महार्णवः । गृहीतपादः कृष्णेन
सुहृद्भिश्चानुसान्त्वितः ११ प्राहिणोत्पारिबर्हाणि वरवध्वोर्मुदा बलः । महाधनोपस्करेभरथाश्वनरयो
षितः १२ श्रीशुक उवाच । कृष्णस्यासीद्द्विजश्रेष्ठः श्रुतदेव इति श्रुतः । कृष्णैकभक्त्या पूर्णार्थः शा
न्तः कविरलंपटः १३ स उवास विदेहेषु मिथिलायां गृहाश्रमी । अनीहयागताहार्यनिर्वर्तितनिजक्रि
यः १४

९ आसमंताद्रुंधतः आचरणं कुर्वतः १० ११ पारिबर्हाणि वरवध्वोः प्रतिदेयानि १२ १३ अनीहया अनुद्यमे १३९
नैवागतं यदाहार्यं भोज्यं तेन निर्वर्तिता निजा क्रिया येन सः १४

इतिदशमेपंचाशीतितमः ॥ ८५ ॥ षडशीतितमेदंभात्सुभद्रामर्ज्जुनोऽहरत् ॥ गत्वाचमिथिलांकृष्णोनपविप्रावनं
दयत् ॥ १ ॥ पित्रोःस्वस्त्रानमादिश्यसुभद्रांफाल्गुनायच ॥ जगाममिथिलांकृष्णःस्वभक्तप्रियकृत्तमः ॥ २ ॥ देवक्या
मत्तपुत्रलाभवत् ॥ अर्ज्जुनस्यसुभद्रालाभोपिरामप्रातिकूल्याद्दुर्घटइतिमन्यमानःप्रसंगात्पृच्छति ॥ ब्र

इतिश्रीमद्भागवतेमहापुराणेदशमस्कंधेदेवक्याःषट्पुत्रानयनंपंचाशीतितमोध्यायः

॥ ८५ ॥ राजोवाच ॥ ब्रह्मन्वेदितुमिच्छामःस्वसारंरामकृष्णयोः ॥ यथोपयेमेविजयोयाममासीत्
पितामही ॥ १ ॥ श्रीशुकउवाच ॥ अर्ज्जुनस्तीर्थयात्रायांपर्यटन्नवनींप्रभुः ॥ गतःप्रभासमश्रृणोन्मातु
लेयींसआत्मनः ॥ २ ॥ दुर्योधनायरामस्तांदास्यतीतिनचापरे ॥ तल्लिप्सुःसयतिर्भूत्वात्रिदंडीद्वार
कामगात् ॥ ३ ॥ तत्रवैवार्षिकान्मासानवात्सीत्स्वार्थसाधकः ॥ पौरैःसंभाजितोऽभीक्ष्णंरामेणाजानताचसः ॥ ४ ॥
एकदागृहमानीयआतिथ्येननिमंत्र्यतं ॥ श्रद्धयोपहृतंभैक्ष्यंबलेनबुभुजेकिल ॥ ५ ॥

सन्निति ॥ १ ॥ २ ॥ कथमश्रृणोत् दुर्योधनायेति ॥ अपरेवसुदेवादयोनदास्यंतीतिलिप्सुः ॥ तस्यांमातुलेय्यांलिप्सुः
रामंवंचयितुंप्रच्छन्नमंत्रिदंडिवेषंविधायगतइत्याह ॥ सयतिरिति ॥ ३ ॥ स्वार्थसाधकःकन्याप्रेप्सुः ॥ ४ ॥ तमाति
थ्येननिमंत्र्यगृहमानीयबलेनयच्छ्रद्धयोपहृतं ॥ परिविष्टंतद्भैक्ष्यंकिलार्ज्जुनोबुभुजइत्यन्वयः ॥ ५ ॥

भा० द० उ०
१४०

अभीयुः ॥ प्रत्युज्जग्मुः ॥२२॥ प्रीत्या उत्फुल्लानि आननानि आशयाश्च अंतःकरणानि च येषां ते ॥ कैः शिरोभिः ॥ श्रु. मद्गृहादन्यस्य गेहं यातीत्यलक्षितः ॥ यद्वा ॥ उभा

२४॥ २५॥ तदभिप्रेत्य अंगीकृत्य ॥ तत्र दा उभाभ्यामपि ताभ्यां ॥

तेः च्युतं प्राप्तमाकर्ण्य पौराजानपदान्नृप ॥ अभीयुर्मुदितास्तस्मै गृहीतार्हणपाणयः ॥२२॥ दृष्ट्वा
दृष्ट्वा तमुत्तमश्लोकं प्रीत्युत्फुल्लाननाशयाः ॥ कैर्धृतांजलिभिर्नेमुः श्रुतपूर्वान्यथा मुनीन्
२३॥ स्वानुग्रहाय संप्राप्तं मन्वानौ तं जगद्गुरुं ॥ मैथिलः श्रुतदेवश्च पादयोः पेततुः प्रभोः ॥२४॥ न्य.
मंत्रयेतां दाशार्हमातिथ्येन सह द्विजैः ॥ मैथिलः श्रुतदेवश्च युगपत्संहतांजली ॥२५॥ भगवां
स्तदभिप्रेत्य द्वयोः प्रियचिकीर्षया ॥ उभयोराविशद्गेहमुभाभ्यां तदलक्षितः ॥२६॥ श्रोतुमप्य
सतां दूराज्जनकः स्वगृहागतान् ॥ आनीतेष्वासनाग्र्येषु सुखासीनान्महामनाः ॥२७॥ प्रवृद्धभक्त्या
उद्धर्षहृदयास्राविलेक्षणः ॥ नत्वा तदंघ्रीन्प्रक्षाल्य तदपो लोकपावनीः ॥२८॥ सकुटुंबो वहन्मू
र्ध्न्यपूजयांचक्र ईश्वरान् ॥ गंधमाल्यांबरकल्पधूपदीपार्घ्यगोवृषैः ॥२९॥

भ्यां रूपाभ्यां तदलक्षितः ॥ ताभ्यामुपलक्षित इति ॥२६॥ २७॥ उद्धर्षेण कृतहर्षं हृदयं यस्य ॥ अस्रैराविले ईक्षणे यस्य

यात्रामात्रं शरीरादिनिर्वाहमात्रं भोज्यं ॥ उपनमति तं प्रत्यागच्छति ॥ १५ ॥ मिथिलस्य जनकस्य वंशे मैथिलः ॥ १६ ॥
प्रभुरेव स्वयं ॥ विदेहान् देशान् प्रययौ ॥ १७ ॥ कृष्णो व्यासो रामो भार्गवः ॥ अहं स्तुकः ॥ एवमादिभिः सह ॥ १८ ॥ १९ ॥ आ

यात्रामात्रं त्वहरहर्दैवादुपनमत्युत ॥ नाधिकं तावता तुष्टः क्रियाश्चक्रे यथोचिताः ॥ १५ ॥ तथा तद्राष्ट्र
पालोंग वकुलाप्यहं तिश्रुतः ॥ मैथिलो निरहंमान उभावप्यच्युतप्रियौ ॥ १६ ॥ तयोः प्रसन्नो भग
वान् दारुकेनाहृतं रथं ॥ आरुह्य साकं मुनिभिर्विदेहान्प्रययौ प्रभुः ॥ १७ ॥ नारदो वामदेवोऽत्रिः
कृष्णो रामोऽसितोऽरुणिः ॥ अहं बृहस्पतिः कण्वो मैत्रेयश्च्यवनादयः ॥ १८ ॥ तत्र तत्र तमायांतं पौरा जा
नपदा नृप ॥ उपतस्थुः सार्घहस्ता ग्रहैः सूर्यमिवोदितं ॥ १९ ॥ आनर्त्तधन्वकुरुजांगलकंकमत्स्यपां
चालकुंतिमधुकेकयकोशलार्णाः ॥ अन्ये च तन्मुखसरोजमुदारहाससस्निग्धेक्षणं नृप पपुर्दृशि
भिर्नृनार्यः ॥ २० ॥ तेभ्यः स्ववीक्षणविनष्टतमिस्रदृग्भ्यः क्षेमं त्रिलोकगुरुरर्थदृशं च यच्छन् ॥ शृण्वन्
दिगंतधवलं स्वयशोऽशुभघ्नं गीतं सुरैर्नृभिरगाच्छनकैर्विदेहान् ॥ २१ ॥

॥ २० ॥
नर्त्ताद्य एणंता अस्त देशवर्त्तिनो नरनार्यो ॥ उदारहासं स्निग्धमीक्षणं यस्मिन् ॥ तद्दृग्भिः ॥ नेत्रैः ॥ स्ववीक्षणेनैव विनष्टा ॥ तमि
स्रादृग्येषां तेभ्यः क्षेमं अभयं ॥ अर्घ्यं दृष्टं तत्वज्ञानं च ॥ २१ ॥

६० ॥ फलैराम्लकादिभिः ॥ अर्हणैर्नोशीरैस्तृणविशेषमन्त्रैः ॥ सुवासितैः ॥ शिवैरमृतत्वस्वादुभिरंबुभिः ॥ सुरम्या
मृदा कस्तूरीप्रमुखया सपर्य्ययापूजया यथोपपन्नया ॥ अनायासेन संपन्नया भक्त्यानुपद्रवेलब्ध्वा सबविव
क्तेनेयदंधः ॥ अन्वेतेनच ॥ ६१ ॥ अस्य श्रीकृष्णस्यात्मामृत्तिस्तस्या निकेतैः भूसुरैः ॥ सर्वतीर्थास्पदैरेणुभिः ॥ कृष्णा

तस्मिन्सा महाभाग आत्मानं सगृहान्वयं ॥ स्नापयां चक्रे उद्धर्षोल्लब्धसर्वमनोरथः ॥ ६० ॥ फलार्हणोशीरशिवामृतांबुभिर्मृदा सुरभ्या तुलसीकुशांबुजैः ॥ आराधयामास यथोपपन्नया सपर्य्यया सत्त्वविवर्द्धनांधसा ॥ ६१ ॥ स तर्कयामास कुतो ममान्वभूद्गृहांधकूपे पतितस्य संगमः ॥ यः सर्वतीर्थास्पदपादरेणुभिः कृष्णेन चास्यात्मनिकेतभूसुरैः ॥ ६२ ॥ सूपविष्टान्कृतातिथ्यान्श्रुतदेव उपस्थितः ॥ सभार्यः स्वजनापत्य उवाचांघ्र्यभिमर्शनः ॥ ६३ ॥ श्रुतदेव उवाच ॥ नाद्य नो दर्शनं प्राप्तः परं परमपुरुषः ॥ यहीदं शक्तिभिः सृष्ट्वा प्रविष्टोन्वात्मसत्तया ॥ ६४ ॥

दिभिर्यः संगमः सममकुतोऽभूदिति ॥ अन्विति विस्मये ॥ यद्वा ॥ आ इति वितर्के नु इति विस्मये ॥ ६२ ॥ उपस्थितः समीपेन्नपवि-
ष्टः ॥ भार्य्यास्तत्या स्वजनाअपत्यानिच तैः ॥ श्रीकृष्णस्यांघ्रिमभिमर्शतीति संमर्द्दयतीत्यंघ्रिमर्शनः ॥ ६३ ॥ तहीदं विसृज्य प्र-
विष्टः ॥ नदेवदर्शनं प्राप्तः ॥ इति स एव सन्मात्रोऽद्यतनीभूतस्त्वमित्यर्थः ॥ यद्वा नोऽस्मानद्यैव प्राप्त इति न ॥ किंतु तदैव प्रा

प्रीणन् ॥ प्रीणयन् ॥ संमर्हयन् ॥ ३० ॥ आत्मा चेतयिता साक्षी प्रकाशकं स्वदृक् स्वप्रकाशः ॥ अथ अंतःकारणात् ॥ ३१ ॥ अ
नंतो वंधुरपि स्त्री भार्यापि ॥ अंगजः पुत्रोपि ॥ ३२ ॥ तच्छांत्ये संसारोपरमाय ॥ ३४ ॥ ३५ ॥ गहन् गृहे ॥ षित्यर्थेः ॥ ३६ ॥ ३७ ॥

वाचा मधुरया प्रीणन्निदमाहान्नतर्पितान् ॥ पादस्वंकगतौ विस्मोः संस्पृशन्स्पृशनके मुदा ॥ ३० ॥
राजोवाच ॥ भवान्हि सर्वभूतानामात्मा साक्षी स्वदृक्प्रभो ॥ अथ नस्त्वेय रा भोजं स्मरतां दर्शनं गतः ॥ ३१ ॥
स्ववचस्तदृतं कर्तुमस्मदृग्गोचरो भवान् ॥ यदात्थैकांतभक्तान्मे नानंतः श्रीरजः प्रियः ॥ ३२ ॥ को नु त्वच्च
रणांभोजमेवंविद्विसृजेत्पुमान् ॥ निष्किंचनानां शांतानां मुनीनां यस्त्वमात्मदः ॥ ३३ ॥ योवतीर्य यदोर्वं
शे नृणां संसरतामिह ॥ यशो वितेने यच्छांत्यै त्रैलोक्यवृजिनापहं ॥ ३४ ॥ नमस्तुभ्यं भगवते कृष्णायाकुंठ
लं३ मेधसे ॥ नारायणाय ऋषये सुशांतं तप ईयुषे ॥ ३५ ॥ दिनानि कतिचिद्भूमन्गृहान्नो निवस द्विजैः ॥ समेतः सर्दे
पादरजसा पुनीहीदं निमेः कुलं ॥ ३६ ॥ इत्युपामंत्रितो राज्ञा भगवांल्लोकभावनः ॥ उवास कुर्वन्कल्याणं मिथि
लानरयोषितां ॥ ३७ ॥ श्रुतदेवोच्युतं प्राप्तं स्वगृहान्जनकोयथा ॥ नत्वा मुनीन्सुसंहृष्टो धुन्वन्वासो ननर्त्त
ह ॥ ३८ ॥ तृणपीठबृषीष्वेतानानीतेषूपवेश्य सः ॥ स्वागतेनाभिनंद्यांघ्रीन्सभार्योवनिजे मुदा ॥ ३९ ॥

धुन्वन् ॥ परिभ्रमन् ॥ ३८ ॥ अवनिज्ञे प्रक्षालितवान् ॥ ३९ ॥ रामरामरामरामरामरामरामरामरामरामराम

भा०द०उ० एतदेव प्रपंचयन्नमस्यति ॥ तेतुभ्यंनमोऽस्तु ॥ अध्यात्मविदांनिवृत्तदेहाद्यहंकाराणां ॥ परमात्मने परमात्म
१४२ त्वेनप्रकाशमानाय ॥ मोक्षप्रदायेत्यर्थः ॥ अनात्मनेदेहाद्यभिमानिने ॥ जीवाय ॥ परत्वेनप्रकाशमानत्वात्स्वा
त्मनःसकाशात्विभक्तः ॥ समर्पितमृत्युःसंसारोयेनतस्मै ॥ कुतएतत्तत्राह ॥ सकारणंमहदादिकार्यं ॥ अ
कारणंप्रकृतिः ॥ तदुभयलिंगमुपाधिः ॥ नियमेनयाईयुषे ॥ प्राप्नुवते ॥ अतएवउभयनियंतुः ॥ स्वस्मात्सका

नमोऽस्तुतेऽध्यात्मविदांपरात्मनेह्यनात्मनेस्वात्मविभक्तमृत्यवे ॥ सकार
णाकारणलिंगमीयुषेस्वमाययासंवृतरुद्धदृष्टये ॥ ४८ ॥ सत्वंशाधिस्वभृत्या
न्नःकिंदेवकरवामते ॥ एतदंतोनृणांक्लेशोयद्भवानक्षिगोचरः ॥ ४९ ॥ ॥ ८८ ॥

तु२ शात् ॥ तदुभयवश्यायजीवायविभक्तमृत्यवइत्यर्थः ॥ नियंतुर्नियम्यत्वेकारणंवदन्नाह ॥ हेस्वमाययासंवृतेति
अतोऽस्तुतेस्वैश्वर्यत्वात् ॥ तन्नियंतृत्वेभ्यनमः ॥ किंचरुद्धदृष्टये ॥ मायाविद्यादेव ॥ अन्येषांरुद्धादृक्तत्राह ॥ दृष्टिर्येनतस्मै
यद्वा ॥ स्वमाययास्वस्यासंवृता ॥ अन्येषांचरुद्धादृष्टिर्येनतस्मै इत्येकंपदं ॥ ४८ ॥ सएवंभूतःपरमेश्वरस्त्वं
नोऽस्मान् ॥ स्वभृत्यान् शाधि ॥ अनुशिक्षय ॥ ४९ ॥

मायासृष्टिप्रविष्टयोरविद्यासृष्टिदृष्टांततयाह ॥ यथेति ॥ आत्ममायया स्वाविद्ययेत्यर्थः ॥ यद्वा ॥ आत्मनस्तव मा
ययेति ॥ ६५ ॥ किंच ॥ शृण्वतामिति ॥ नित्यं श्रवणकीर्तनादिपराणाम् महात्मनां हृद्येव त्वं भासि ॥ मम तु लोचनगोच
रस्त्वं ॥ अहो भाग्यमिति भावः ॥ ६६ ॥ ननु सर्वेषां हृदि स्थितः ॥ कथं केषांचिदेव हृदि भाति ॥ मेघैः सूर्यवत् ॥ जीवोपा

यथा शयानः पुरुषो मनसैवात्ममायया ॥ सृष्ट्वा लोकं परं स्वाप्नमनुविश्या
वभासते ॥ ६५ ॥ शृण्वतां गदतां शश्वदर्चतां त्वाभिवंदतां ॥ नृणां संवदताम
तर्हृदि भास्यमलात्मनां ॥ ६६ ॥ हृदिस्थोऽप्यतिदूरस्थः कर्मविक्षिप्तचेतसाम् ॥
आत्मशक्तिभिरग्राह्योऽप्यंत्युपेतगुणात्मनाम् ॥ ६७ ॥ ॥ ऽऽ ॥

धिभिरंतरितत्वादिति यद्युच्यते ॥ तर्हि न कस्यापि मार्गोऽदितिप्यत आह ॥ हृदिस्थोऽपीति ॥ कर्मभिर्विक्षिप्तं
चेतो येषां तेषाम् आत्मशक्तिभिरहंकारादिभिरग्राह्यः ॥ व्यवहितोऽप्युपेतगुणः ॥ आप्रश्रवणकीर्तनादि
संस्कारः ॥ आत्मा अंतःकरणं येषां मंतिसमीपेऽव्यवहितस्त्वमित्यर्थः ॥ ६७ ॥

भा०द०उ०
१६३

किंच ॥ ब्राह्मणाराधनमेवममप्रेष्टमित्याह ॥ नेति हेतुमाह ॥ सर्ववेदमयो विप्र इति प्रमाणाधीनत्वा
त् ॥ प्रमेयस्य वेदमयो विप्रो वेदमयादस्मान्मद्रूपात्प्रेष्ठ इत्यर्थः ॥५४॥ असूयवो दोषदृष्टयः ॥ इज्यबु

न ब्राह्मणान्मे दयितं रूपमेतच्चतुर्भुजं ॥ सर्ववेदमयो विप्रः सर्ववेदमयो ह्यहं ॥५४॥ दुः
प्रज्ञा अविदित्वैवमवजानंत्यसूयवः ॥ गुरुं मां विप्रमात्मानमर्चादाविज्यदृष्टयः ॥५५॥
चराचरमिदं विश्वं भावा ये चास्य हेतवः ॥ मद्रूपाणीति चेतस्याधत्ते विप्रो मदीक्षया ॥५६॥ तस्मा चेत २
द्ब्रह्मऋषीनेतान्ब्रह्मन्मच्छ्रद्धयार्चय ॥ एवं चेदर्चितोस्म्यद्धा नान्यथा भूरिभूतिभिः ॥५७॥ श्री
शुक उवाच ॥ स इत्थं प्रभुणादिष्टः सहकृष्णान्द्विजोत्तमान् ॥ आराध्यैकात्मभावेन मैथिलश्चा
प सद्गतिं ॥५८॥ एवं स्वभक्तयो राजन्भगवान्भक्तभक्तिमान् ॥ उषित्वादिश्य सन्मार्गं पुनर्द्वारवतीम
गात् ॥५९॥ इति श्रीमद्भागवते महापुराणे दशमस्कंधे षडशीतितमोध्यायः ॥८६॥

द्धयः ॥ अस्य विश्वस्य हेतवो महदादयः ॥ मदीक्षया ममैव सर्वत्रेक्षया ॥५६॥ सन्मार्गं सतां वेदानां त्रिकांडवि
षयाणां प्रवृत्तिप्रकारमादिश्य ॥५९॥ इति दशमे षडशीतितमः ॥८६॥ १६३

५०॥ स्वस्मिन्नादरमत्यधिकं॥ ब्राह्मणेषु च मंदमिवालक्ष्य लोकसंग्रहपरो भगवान्॥ मत्तोपि ब्राह्मणेषु श्रद्धा
तिरेकं कुर्विति॥ एवं त्वमनुशास्ति ब्रह्मन्निति संबंधः॥ मया हृदिस्थेन॥५१॥ देवादिभ्योऽपि ब्राह्मणाः श्रेष्ठा

श्रीशुक उवाच॥ तदुक्तमित्युपाकर्ण्य भगवान्प्रणतार्तिहा॥ गृहीत्वा पाणिना
पाणिं प्रहसन्निदमुवाच ह॥५०॥ श्रीभगवानुवाच॥ ब्रह्मंस्तेनुग्रहार्थाय संप्राप्तान्वि
द्ध्यमून्मुनीन्॥ संचरंति मया लोकान्पुनंतः पादरेणुभिः॥५१॥ देवाः क्षेत्राणि तीर्था
नि दर्शनस्पर्शनार्चनैः॥ शनैः पुनंति कालेन तदप्यर्हत्तमेक्षया॥५२॥ ब्राह्मणो जन्मना
श्रेयान्सर्वेषां प्राणिनामिह॥ तपसा विद्यया तुष्ट्या किमु मत्कलया युतः॥५३॥

इत्याह॥ देवा इति॥ ते शनैः पुनंति॥ एते तु सद्यः॥ किंच॥ देवादीनि यत्पुनंति॥ तदपि मदर्हसत्तमा
नामीक्षया॥५२॥ मम कलापरिकलनमुपास्ति॥ तया युतः॥५३॥ रामरामरामरामरामरामराम॥

भा० द० उ०
१६४

उत्तरमाह ॥ बुद्धीन्द्रियेति ॥ बुद्ध्यादीनुपाधीन् ॥ जनानामनुशायिनां जीवानां मात्रार्थं प्रभुरीश्वरोऽसृजत् ॥ मीयंत इति मात्रा विषया
स्तदर्थं भवार्थं भवो जन्म तदुपलक्षितं कर्मेति कर्मकरणार्थमित्यर्थः ॥ आत्मने लोकांतरगामिने ॥ आत्मनस्तत्र लोकभोगाये
त्यर्थः ॥ अकल्पनाय कल्पनानिवृत्तये मुक्तये इत्यर्थः ॥ अर्थधर्मकाममोक्षमिति क्रमेण पदचतुष्टयस्यार्थः ॥ जनानामिति वद
न् जीवार्थमीश्वरस्य सृष्ट्यादिषु प्रवृत्तिरिति दर्शयति ॥ प्रभुरिति ॥ ईश्वरस्योपाधिवश्यताभावेन नित्यमुक्ततां दर्शयति ॥ अयम
भिप्रायः ॥ सगुणमेव रूपेण निर्भिन्नं सर्वशक्तिं सर्वेश्वरं सर्वनियंतारं सर्वोपास्यं ॥ सर्वकर्मफलदातारं ॥ समस्तकल्याण
गुणनिलयं सच्चिदानंदं भगवंतं श्रुतयः प्रतिपादयंति ॥ यः सर्वज्ञः सर्ववित् ॥ यस्य ज्ञानमयं तपः ॥ सर्वस्य वशी सर्वस्येशानः
यः पृथिव्यां तिष्ठन् ॥ पृथिव्या अंतरः ॥ सोऽकामयत बहु स्यां स ऐक्षत ॥ तत्तेजोऽसृजत ॥ सत्यं ज्ञानमनंतं ब्रह्मेत्याद्यास्तथान्ये तु

श्रीशुक उवाच ॥ बुद्धींद्रियमनःप्राणान् जनानामसृजत्प्रभुः ॥ मात्रार्थं च भवार्थं च आत्मनेऽकल्पनाय च ॥ २ ॥

र्वातं तावत्संसारिणो जीवस्य तन्निवृत्तये तत्त्वमसीत्यादिवाक्यानि बोधयंति ॥ तत्र तत्त्वंपदयोः सामानाधिकरण्यं प्रतीयते
तच्च प्रकारांतरेणाघटमानं ब्रह्मणि पर्यवसानं गमयति ॥ तथाहि ॥ न तावद्देहस्य देव्याभित्वेति ॥ तदुभयोरेकार्थताभिधाने
न सामानाधिकरण्यं ॥ यथोक्तं ॥ आमिक्षां देवतायुक्तां वदत्येव षतद्धितः ॥ आमिक्षापदसान्निध्यात्तस्यैव विषयार्पणमिति
कुतः भिन्नार्थत्वात् ॥ न चाजहत्स्वार्थया निरूढलक्षणया विशेषणविशेष्यभावेन नीलमुत्पलमितिवत् ॥ यथोक्तं ॥ स्व
कारस्य तेन विशिष्यं तद्विशेषणमित्यादि ॥ कुतः ॥ विरुद्धार्थेन तदयोगात् ॥ न च जहत्स्वार्थत्वेन संबंधि लक्षणया कुड्यमिति
द्गंगायां गोतिवत् ॥ कुत एकार्थत्वस्याविवक्षितत्वात् ॥ अतो जहदजहत्स्वार्थलक्षणया सोऽयं देवदत्त इतिवद् विशिष्टांशत्यागेनानुग

न्नाप्रीतितमेनारायणनारदवादतः॥ वेदैःस्तुतिर्गुणात्तंवानिर्गुणावधिवर्ण्यते॥१॥ वागीशायस्यवदनेलक्ष्मीर्यस्यचवक्षसि॥ यस्या
स्तेहृदयेसंवित्तंनृसिंहमहंभजे॥२॥ संप्रदायविशुद्ध्यर्थंस्वीयनिर्बंधयंत्रितः॥ श्रुतिस्तुतिमितव्याख्याकरिष्यामियथामति॥३॥ श्रीमद्भाग
वतेपूर्वैःसारतःसंनिषेवितं॥ मयातत्तदुपस्पृष्टमुच्छिष्टमुपचीयते॥४॥ पूर्वाध्यायांते॥ एवंस्वभक्तयोराजन्भगवान्भक्तभक्ति
मान्॥ उषित्वादिश्यसन्मार्गंपुनर्द्वारवतीमगादितियत्रसन्मार्गं॥ सतांस्वतःप्रमाणभूतानामप्रमाणपरिहारेणाहितानांवेदानांमार्गं
ब्रह्मपरत्वमुपदिश्यभगवानगादित्युक्तं॥ तत्रवेदानांब्रह्मपरत्वमघटमानंमन्वानःपृच्छति॥ ब्रह्मन्निति॥ तत्रतावन्मुख्याल

टि१ क्षणागुणाभेदेनत्रिधाशब्दप्रवृत्तिः॥ मुख्यापिरूढियोगभेदेनद्विधा॥ रूढिश्चसकलपदस्यजात्यागुणेनवानिर्दिश्यवस्तुनिसंज्ञासं

परीक्षिदुवाच॥ ब्रह्मन्ब्रह्मण्यनिर्देश्येनिर्गुणेगुणवृत्तयः॥ कथंचरंतिश्रुतयःसाक्षात्सदसतःपरे॥१॥

ज्ञासंकेतेनप्रवर्त्तते॥ यथाडित्थःगौःशुक्लइति॥ लक्षणावृत्तेनैवसंकेतेनाभिहितार्थसंबंधिनि॥ यथागंगायांघोषइति
गौणीचाभिहितार्थलक्षितगुणयुक्तेतस्मादृश्य॥ यथासिंहोदेवदत्तइति॥ यथाहुः॥ अभिधेयाविनाभूतप्रवृत्तिर्लक्षणेष्यते
लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टातुगौणतेति॥ योगवृत्तिस्तुएतत्त्रिविधवृत्तिप्रतिपादितपदार्थयोःप्रकृतिपदार्थयोर्योगेनय
थापंकजंऔपगवःपाचकइत्यादि॥ तत्रतावद्रूढ्यलक्षणादिवृत्तिर्नसंभवतीत्याह॥ साक्षात्कथंचरंतीति॥ तत्रहेतुः॥ अनिर्देश्य
इति॥ अनिर्देश्यत्वेपिहेतुंवदन्॥ गुणवृत्तिंनिराकरोति॥ निर्गुणेगुणवृत्तयइति गुणैर्वर्त्तमानाअपिनिर्गुणेकथंचरंतीत्यर्थः॥
निर्गुणेचहेतुंवदन्लक्षणांयोगवृत्तिंचनिराकरोति॥ सदसतःपरइति॥ कार्यकारणाभ्यांपरस्मिन्नसंगेकेनचिदपिसंबंधाभावा

ब्रह्मसत्रमिति॥ यथा यजमानानामृत्विगादिरूपेणैव यत्र कर्म कुर्वंतीति तत्कर्तृसत्रं प्रसिद्धं तथा॥ यत्र समाना एव वक्तृश्रोतृ
भावेन ब्रह्म मीमांसते तद्ब्रह्मसत्रमिति॥ ९॥ अहो तर्हि मया कथं तन्न ज्ञातमित्यत आह॥ श्वेतद्वीपमिति॥ तदीश्व
रं तत्रस्थं मामेवानिरुद्धं द्रष्टुं॥ १०॥ न तु सर्वज्ञास्ते कस्तत्र वक्ता प्रष्टा वा तत्राह॥ तुल्यश्रुतेति॥ श्रुतादिभिरविशे

श्रीभगवानुवाच॥ स्वायंभुव ब्रह्मसत्रं जनलोकेऽभवत्पुरा॥ तत्रस्थानां मानसानां मुनीनामूर्द्ध्व
रेतसां॥ ९॥ श्वेतद्वीपं गतवति त्वयि द्रष्टुं तदीश्वरं॥ ब्रह्मवादः सुसंवृत्तः श्रुतयो यत्र शेरते॥ तत्र
हायमभूत्प्रश्नस्त्वं मां यमनुपृच्छसि॥ १०॥ तुल्यश्रुततपःशीलास्तुल्यस्वीयारिमध्यमाः॥
अपि चक्रुः प्रवचनमेकं शुश्रूषवोऽपरे॥ ११॥ श्रीसनंदन उवाच॥ स्वसृष्टमिदमापीय शयानं
सह शक्तिभिः॥ तदंते बोधयांचक्रुस्तल्लिंगैः श्रुतयः परं॥ १२॥ यथा शयानं संम्राजं वन्दिन
स्तत्पराक्रमैः॥ प्रत्यूषेऽभ्येत्य सुश्लोकैर्बोधयंत्यनुजीविनः॥ १३॥

षा॥ अरिमित्रोदासीनदृष्टिरहिता इत्यर्थः॥ अतः सर्वे प्रवचनयोग्या अपि केनापि कौतुकेनैकं प्रवक्तारं कृ
त्वा अन्ये प्रष्टार इत्यर्थः॥ ११॥ स्वसृष्टमिति॥ स्वयं निर्मितमिदं विश्वं प्रलयसमये आपीय संहृत्य॥ शयानं योग
निद्रया निवर्तमानं॥ तदंते प्रलयांते॥ तल्लिंगैस्तत्प्रतिपादकैर्वाक्यैः॥ परं ईश्वरं॥ सृष्टिसमये प्रथमनिश्वा

यथा वा त्रैरीयोपक्रमे ॥ त्वरष्टमिदमापीयेत्यादिना विशिष्टमालंवनं वक्ष्यति ॥ अंते च श्रुतयस्त्वयि हि फलंतत्य तन्निरसनेन सम्बुद्धि
धनाइत्युपसंहरिष्यति ॥ उपासनादिवाक्यानां तु क्रियार्थप्रवृत्तस्य द्याद्युवलंवनेन ज्ञानसाधनविधानेन तत्परत्वमिति
यादिकं ॥ २ ॥ अत्रेचानादिशिष्टपरंपरागतत्वात्संदेहो युक्त इत्याह ॥ सेषेति ॥ सेषाय थोक्तालंवना ब्राह्मी ब्रह्मपरा श्रद्धया

सेषा ह्युपनिषद्ब्राह्मी पूर्वेषां पूर्वजैर्धृता ॥ श्रद्धया धारयेद्यस्तां क्षेमं गच्छेदकिंचनः ॥ ३ ॥ अत्र तेव
र्णयिष्यामि गाथां नारायणान्वितां ॥ नारदस्य च संवादमृषेर्नारायणस्य च ॥ ४ ॥ एकदा नारदो लो
कान्पर्यटन्भगवत्प्रियः ॥ सनातनमृषिं द्रष्टुं ययौ नारायणाश्रमं ॥ ५ ॥ यो वै भारतवर्षेस्मिन्क्षे
माय स्वस्तये नृणां ॥ धर्मज्ञानशमोपेतमाकल्पादास्थितस्तपः ॥ ६ ॥ तत्रोपविष्टमृषिभिः कलाप
ग्रामवासिभिः ॥ परीतं प्रणतोऽपृच्छदिदमेव कुरूद्वह ॥ ७ ॥ तस्मै ह्यवोचद्भगवानृषीणां शृण्व
तामिदं ॥ यो ब्रह्मवादः सर्वेषां जनलोकनिवासिनां ॥ ८ ॥

आदरेण वैतंडिकतर्काद्यभिनिवेशेन तयः श्रवणादिना च धारयेत् ॥ सः अकिंचनः ॥ निरस्तदेहाद्युपाधिः सन्
परं पदं प्राप्नुयादिति ॥ ३ ॥ एतदेव सर्वश्रुत्यर्थनिरूपणेन प्रपंचयितुमितिहासमवतारयति ॥ अत्र तइति ॥
नारायणान्वितां ॥ नारायणप्रवक्तृत्वेनान्वितां यस्यां तां गाथामितिहासं ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ ॥ ऽऽ ॥

भा०द०उ ननुकथंमामेवप्रतिपादयंति । यतइंद्रोजातोजंगमस्यस्थावसितस्यराजेत्यादिभिरिंद्रोजातोजंगमस्यस्थावसितस्यस्थाव
१४६ रस्यचराजेतिप्रतिपाद्यते । तथाग्निर्मूर्द्धादिवइत्यादिभिश्चतद्भक्तत्वेनाग्न्यादयःप्रतिपाद्यंतेतत्राह । बृह
दुपलब्धमेतदिति । अयमर्थः । एतदुपलब्धंदृष्टमिंद्रादिसर्वंबृहदेव । ब्रह्मत्वमित्येवावयंतिजानंति । कथंबृहदेतद
वावशेषतया । अवशिष्यमाणत्वेनकुतःयतोबृहतःसर्वस्योदयास्तमयौ । उत्पत्तिलयौ । सर्वोपादानत्वात् । तर्हिकिंवि
कारित्वंबृहतः । न । अविकृतात् । विवर्त्ताधिष्ठानत्वेनाविकारादित्यर्थः । यथाघटादेर्विकृतेर्मृदि । उदयास्तमयौतद्वत्वा

बृहदुपलब्धमेतदवयंत्यवशेषतयायतउदयास्तमयौविकृतेर्मृदिवाविकृतात् । अतऋ
षयोदधुस्त्वयिमनोवचनाचरितंकथमयथाभवंतिभुविदत्तपदानिनृणां ॥ १५ ॥ घटादेः

चारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यं । सर्वंखल्विदंब्रह्मेत्यादिभिस्तथाप्रतिपादनादित्यर्थः । अतःकारणात्
ऋषयोमंत्रास्तद्दृष्टारोवात्वय्येवमनोवचनाचरितंदधुः । मनसाआचरितंतात्पर्यंवचनोचरितंमभिधानंचधृतवंतः
नपृथग्विकारेष्वित्यर्थः । अत्रनिदर्शनं । कथमयथेति । नृणांभूचराणांयत्रकुत्रापिदत्तानि । निहितानिपदानिभुवि
कथमयथानिभवंति । अदत्तपदानिनभवंति । अतोयथाश्मपाषाणेष्टकादिषुदत्तानिपदानिभुवंनव्यभिचरं
ति । तथायत्किमपिविकारजातंवदंतोवेदास्त्वामेवसर्वकारणंपरमार्थंभूतंप्रतिपादयंतीत्यर्थः ॥ १५ ॥ द्रु दु
हिणवह्निरवीन्द्रमुखामराजगदिदंनभवेत्पृथगुत्थितं । वेदमुखेरपिमंत्रगणैरजस्त्वमुहुर्महत्रिरितोविनिग हि

जयजयेति ॥ भो अजित जय जय उत्कर्षमाविष्कुरु ॥ आदेवीप्राकेनव्यापारेण ॥ अगजगदोकसां ॥ अगानि स्थावराणि जगानि जंगमानि च ओकांसि शरीराणि येषां जीवानां अज्ञानमविद्या ज्ञहिनाशय ॥ किमिति गुणवती हत इत्यत आह ॥ दोषग्रभीतगुणं ॥ दोषाय आनंदाद्यावरणाय गृहीता गुणा माया तो ॥ इयं हार्भेनग्रहसीतिभकारः ॥ इयं हि स्वैरिणी वपरप्रतारणाय गुणानगृह्णाति अतो हंतव्येति ॥ तर्हि मय्यपि दोषमूवहेदिति ममापि तत्प्रकाशाक्तिः स्यादत आह ॥ त्वमिति ॥ यद्यस्मात्त्वं आत्मना स्वरूपेणैव ॥ समवरुद्धसमस्तभगः संप्राप्तसमस्तैश्वर्योसि ॥ वशीकृतमायत्वादिति भावः ॥ ननु स्वयमेवेतज्ञानेवैराग्यादिना किं न हन्त्वित्यत आह ॥ अखिलशक्त्यु द्बोधकेति ॥ तेषां त्वमेवान्तर्यामी ॥ सर्वशक्त्युद्बोधकः ॥ अतोनेनैज्ञानादौ स्वतंत्राइतिभावः ॥ अहमकुर्वज्ञानेभ्य

श्रुतयऊचुः ॥ जयजयजह्यजामजित दोषगृभीतगुणां त्वमसियदात्मनासमवरुद्धसमस्तभगः ॥ अगजगदोकसामखिलशक्त्यवबोधकते क्वचिदजयात्मना च चरतोनुचरेन्निगमः ॥ १ ॥ १४ ॥

ययोदिगुण ॥ जीवानां कर्मज्ञानादिशक्त्यवबोधनेनाविद्याहतेत्यत्र किं प्रमाणमिति चेदहमेव प्रमाणमित्याह ॥ निगमः वेदः ॥ नन्वेवमस्तु मायिकधर्मश्रुतीनां प्रवृत्तिस्तत्राह ॥ क्वचिदिति ॥ कदाचित्सृष्ट्यादिसमये ॥ अजया मायया चरतः क्रीडतः ॥ नित्यं वा लुप्तभगतया सत्यज्ञानानंतानंदैकरसेनात्मना च चरतो वर्तमानस्य निगमो नुचरेदिति प्रतिपादयत् कर्मणिष्वष्ठी ॥ यतो वाङ्मानिभूतानि जायंते ॥ यो ब्रह्माणं विदधाति ॥ सर्वेयो वेदाश्च प्रहीणोत्ति तस्मै तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये ॥ य आत्मनि तिष्ठन् ॥ सत्यं ज्ञानमनंतं ब्रह्म यः सर्वज्ञः सर्वविदित्यादिनिगमकदंबकं स्वामिनं अनुभूतं प्रतिपादयतीत्यर्थः ॥ १ ॥ १४ ॥ जयजयाजितजह्यगजंगमावृत्तिमजामुपनीतमृषागुणां ॥ नहिभवंतम्

भगवद्बहिर्मुखाः ९ जनकं प्रति याज्ञवल्क्यस्य वचनं ९॥

भा० द० उ०
१४७

असुर्या नाम ते लोका अंधेन तमसावृताः । तांस्ते प्रेत्याभिगच्छंति ये के चात्महनो जनाः । नथाभवद्वेदी मह-
तीविनष्टिरित्याद्याश्रुतयः । एवं श्लोको को भयाद्विधुं भजंतं हीनानिंदंतीति । दृतय इव इति । असुभृतो नराः । यदि
ते अनुविधा नीत्यनुवर्तिनो भक्ताः । इति यावत् तर्हि श्वसंति जीवंति सफलजीवना भवंति । इतरथा दृतय इव
भस्त्रा इव । यथा श्वासास्तथेत्यर्थः । ननु भक्तानामपि कामादिफलमस्त्येव । न कार्यकारणानुग्राहकत्वेन जीव-

दृतय इव श्वसंत्यसुभृतो यदि तेनुविधा महदहमादयोंडमसृजन्यदनुग्रहतः ॥

नहेतोस्तवाभजने कृतघ्नानां तदपि न सिद्ध्येदित्याशयेनाह । महदहमादय इति । महानहंकारश्च आदिर्ये-
षां ते यदनुग्रहतः यस्यानुप्रवेशेन लब्धसामर्थ्याः संतः अंडं देहं समष्टिव्यष्टिरूपं सृष्टवंतः । तत्र च पं-
च पंचापि कोशानन्नमयादीन् प्रविश्य तत्तदाकारः सन् पश्चात् तत्तत्सत्त्वं तत्राह । पुरुषविध इति । पुरुष-
स्यान्नमयादेर्विधेव विधाकारो यस्य सः तथा । ननु चिदेकरसस्य कथं तत्तदाकारता अत आह ॥ ॥ ५५ १४७

त्वमेव सर्वनिगमगोचरेति सतां प्रवृत्त्या द्रढयति ॥ इति तवेति ॥ त्वमेव सर्वकारणत्वेन परमार्थ इति कृत्वा भो त्र्यधि
पते ॥ त्रिगुणमायामृगीनृत्तेक ॥ स्मर यो विवेकिनः ॥ तवाखिललोकमलक्षपणकथामृताब्धिं सकलजनरंजिनंनि
रसनहेतुकीर्तिसुधासिंधुमवगाह्य निषेव्य तपांसि पापानि दुःखावाजहुः ॥ त्यक्तवंतः ॥ त्वदीयकथामात्रेण यदा
पापत्यागस्तदा किं वक्तव्यं ॥ ये पुनः स्वधामविधुताशयकालगुणाः ॥ स्वधाम्ना स्वरूपस्फुरणेन विधुतास्त्यक्ता आश

इति तव सूरयस्त्र्यधिपतेखिललोकमलक्षपणकथामृताब्धिमवगाह्य तपांसि जहुः ॥ कि
मुत पुनः स्वधामविधुताशयकालगुणाः परम भजंति ये पदमजस्रसुखानुभवं ॥ ३ ॥ १६ ॥

यगुणाः ॥ अंतःकरणधर्मा रागादयः ॥ कालगुणा जरादयश्च यैस्ते तथा ॥ हे परम ॥ तवाजस्रं सुखानुभवं अखंडा
नंदानुभवं पदं स्वरूपं भजंति सेवंते ॥ तथाभूता दुःखानि त्यजंतीति ॥ तद्यथा पुष्करपलाश आपो न श्लिष्यंते
एवमेवंविदि पापं कर्म न श्लिष्यते ॥ न कर्मणा लिप्यते पापकेन ॥ नैनं सुकृतदुःकृते विधुनुते ॥ एवं ह
६.२० वाव न तपति किमहं साधु नाकरवं ॥ किमहं पापमकरवमित्यादिश्रुतेरित्यर्थः ॥ ३ ॥ १६ ॥ सकलवेदगणे
भा०१०.२० रितसत्त्वगुणस्त्वमिति सर्वमहीशयनो जनाः ॥ त्वयि सुभद्रगुणश्रवणादिभिस्तव पदस्मरणेन गतक्लमाः ॥ ३ ॥
सि

एवंतावत्सर्वात्मके परमेश्वरे सर्वश्रुतिसमन्वयेन सहजनीयत्वमुक्त्वा॥ अभक्तनिंदया च तदेव दृढीकृत्य इदानीमनु
ग्राह्यमहिमानं प्रपंचयंस्तावदुपाध्यालंबनमुपास्यं ब्रह्मेति शार्कराख्या उपासते॥ हृदयं ब्रह्मेत्यारुणयो॥ ब्रह्मा हैवत्ता इत ऊर्ध्वं त्वे
वोदसर्पत्तच्छिरोश्रयतेत्याद्याः श्रुतयो विदधतीत्याह॥ उदरमुपासत इति ऋषिवर्त्मसु ऋषीणां संप्रदायमार्गेषु ये कू
र्पदृशस्ते उदरालंबनं मणिपूरकस्थं ब्रह्मोपासते॥ ध्यायंति शार्कराक्षा इति श्रुतिपदस्य प्रतिपदं॥ कूर्पदृश इति कूर्पः शर्करा
जा विधीयते च दृष्टिर्येषां ते तथा स्तैः पिहितदृष्टयः स्थूलदृष्टय इत्यादिवत्॥ उदरस्य हृदयापेक्षया स्थूलत्वात्॥ यद्वा॥ कूर्पे सूक्ष्मे
दृशः इत्यपि॥ तदा हृदयस्थं सूक्ष्ममेवालंबनं तत्प्रवेशाय प्रथममुपासत इति भावः॥ आरुणयस्तु साक्षात् हृदयस्थं दहरं सूक्ष्मं

उदरमुपासते य ऋषिवर्त्मसु कूर्पदृशः परिसरपद्धतिं हृदयमारुणयो दहरं॥ तत उदगादनंत तव धाम शि
रः परमं पुनरिह यत्समेत्य न पतंति कृतांतमुखे॥ १८॥

मेवोपासते॥ हृदयविशेषणं परिसरपद्धतिमिति॥ परितः सरंति प्रसर्पंतीति परिसरा नाड्यः तासां पद्धतिं मार्गं प्रसरणस्थानमि
त्यर्थः॥ विशेषणस्य फलमाह॥ तत इति॥ ततो हृदयात्॥ भो अनंत तव धाम उपलब्धिस्थानं॥ सुषुम्णाख्यं परं संश्रेष्ठं ज्योतिर्मयं शि
रः मूर्धानं प्रत्युदगात्॥ उदसर्पत् मूलाधारादारभ्य हृदयमध्याद्ब्रह्मरंध्रं प्रत्युद्गतमित्यर्थः॥ कथंभूतं तं धाम यत्समेत्य प्राप्य पु
नरिह कृतांतमुखे संसारे न पतंति॥ तथा च श्रुतिः॥ शतं चैका हृदयस्य नाड्यः तासां मूर्धानमभिनिःसृतैका तयोर्ध्वमायन्न
मृतत्वमेति॥ विष्वगन्या उत्क्रमणे भवंतीति॥ १८॥ उदरादिषु यः पुंसां चिंतितो मुनिवर्त्मभिः॥ हंति मृत्युभयं देवो हृद्ग

[illegible]

अन्वयोत्रेति ॥ अत्र येष्वन्नमयादिष्वन्वेतीत्यन्वयः ॥ अंतस्तत्तदाकारतेति ॥ एवं तर्हि सत्यत्वमसंगत्वं च कथं
तत्राह । चरमोन्नमयादिषु य इति ॥ अन्नमयादिषूपदिश्यमानेषु य चरमो ब्रह्म पुच्छं प्रतिष्ठेति ॥ पुछत्वे
नोक्तः सत्वमिति संबंधः ॥ ननु तथापि योऽन्नमयादिष्वन्वितस्तत्वे संगतत्वापत्तिरेव तत्राह ॥ सदसतः परं त्वमथ यदे
ष्ववशेषमृतमिति ॥ सदसतः स्थूलसूक्ष्मादन्नमयादेः परं व्यतिरिक्तं ॥ तेभ्यो निषेधे सत्यवशेषं ॥ अवशिष्यत
इत्यवशेषमबाध्यं ॥ अथ अतएव सत्यं ॥ तर्हि किमर्थं तेष्वन्वय उक्तः ॥ शाखाचंद्रवत्सूक्ष्मस्वरूपल

पुरुषविधोन्वयोऽत्र चरमोऽन्नमयादिषु यः सदसतः परं त्वमथ यदेष्ववशेषमृतं ॥ १७

क्षणार्थः ॥ तथाहि ॥ स वा एष पुरुषोऽन्नरसमयस्तस्येदमेव शिर इत्यादिना स्थूलसूक्ष्मक्रमेण पंचकोशाननु
पदिश्य तस्य पुरुषविधतामन्वयं ॥ पुरुष इति पुनः पुनस्तदन्वितत्वेनालक्ष्य ब्रह्म पुच्छं प्रतिष्ठेति ॥ सर्वसाक्षि
सुद्धस्वरूपनिरूपणमित्यनवद्यं ॥ ६ ॥ १७ ॥ नरवपुः प्रतिपद्य यदि त्वयि श्रवणवर्णनसंस्मरणादिभिः
॥ नरहरे न भजंति नृणामिदं हृतिवदुच्छ्वसितं विफलं ततः ॥ ४ ॥ रामराम रामराम रामरा

भा०द०उ० अपिचकृतोन्वियमाशंकास्यात् ॥ भगवतोदेहाद्युपाधिकृतदोषप्रसंगइति ॥ यतोऽविद्याकामकर्मभिःसंसरतोजीवस्यै
१६९ पिभगवदंशत्वलक्षणयाबोधयंत्यस्तंदोषंनिषेधयंति ॥ सयश्चायंपुरुषेयश्चासावादित्येसएकः ॥ तत्त्वमसीत्याद्याःश्रुत
योननुकथंजीवस्यात्मनःस्तुतिरियमीश्वरत्वेनक्रियते ॥ ननुतस्येश्वरत्वंबोध्यते नैतद्युज्यतेयतस्तत्र ॥ यस्यदेवेपराभक्ति
र्यथादेवेतथागुरौ ॥ तस्यैतेकथिताह्यर्थाःप्रकाशंतेमहात्मनइत्याद्याःश्रुतयःकेनोवतारस्यभगवतश्चरणभजन
मुपायंवदंतीत्याह ॥ स्वकृतपुरेष्विति ॥ स्वकर्मोपार्जितेषुपुरेष्वमीषुनरादिषुभोक्तृत्वेनवर्तमानंपुरुषं ॥ अखिलशक्ति

स्वकृतपुरेष्वमीष्ववहिरंतरसंवरणंतवपुरुषंवदंत्यखिलशक्तिधृतोंऽशकृतं ॥ इतिनृगतिंविवि
च्यकवयोनिगमावपनंभवतउपासतेंऽघ्रिमभवंभुविविश्वसिताः ॥ १ ॥ २० ॥

धृतःसर्वशक्त्याश्रयस्यपूर्णस्यतवांशकृतंवदंति ॥ अंशइवांशःकृतइवकृतःत्वद्रूपंवदंतीत्यर्थः ॥ ननुकार्यकारणसं
वृत्तस्यकुतएवंभूतत्वंतत्राह ॥ अवहिरंतरसंवरणमिति ॥ वहिःकार्यमंतरंकारणंवस्तुतस्तदावरणशून्यंतयोरसत्वा
दित्यर्थः ॥ इतिएवंनृगतिं ॥ नुर्जीवस्यगतिंतत्त्वंविविच्यविशोध्यकवयः ॥ अन्यथैतद्दुष्प्राप्यमितिजानंतः ॥ निगमावपनंआ
समंतादुप्यंतेऽस्मिन्नित्यावपनंचेतनंसर्वकर्मार्पणविषयमित्यर्थः ॥ यत्रार्पितानिकर्माणिमुक्तिफलफलंति तेभव
तोंऽघ्रिमभवंभवनिवर्तकंविश्वसिताः ॥ कृतविश्वासाः उपासते ॥ अर्चनवंदनादिभिःसेवंते ॥ भुवीतिमर्त्यलोके
इदमेवोचितमितिदर्शयति ॥ १ ॥ २० ॥ त्वदंशस्यममेशानत्वन्मायाकृतबंधनं ॥ त्वदंघ्रिसेवामादिश्यपरानंदनिव

१६९

नन्वीश्वरस्यापि तर्हि जीववदुदरहृदयसंबंधे तदनुप्रविष्टस्य च तारतम्ये सति केन विशेषेणोपास्यत्वमस्ति नेत्याशं-
क्यापरिहरंत्यः । एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो नि-
र्गुणश्चेत्याद्याः श्रुतयः स्तुवंतीत्याह । स्वकृतविचित्रयोनिष्विति । स्वयं कृतासु उच्चावचासु नीचमध्यमासु योनिषु अभिव्य-
क्तिस्थानेषु कार्येषु देहादिषु हेतुतया उपादानतया प्रागेव विद्यमानत्वेन मुख्यप्रवेशासंभवात् । विशन्निव वर्तमानस्तारत-
म्येनोन्यूनाधिक्यभावेन च कास्सि शोभसे । अवभाससे । स्वकृता योनीरनुकरोतीति स्वकृतानुकृतिः । अनलवत् । अग्निर्यथा

स्वकृतविचित्रयोनिषु विशन्निव हेतुतया तरतमतश्चकास्यनलवत्स्वकृतानुकृतिः । अथ वितथा-
स्वमूष्ववितथं तव धाम समं विरजधियोऽनुयंत्यभिविपण्यव एकरसं । ६ । १९ ।

स्वतस्तारतम्यहीनोपि काष्ठानुसारेण तथा तथा प्रकाशते । तद्वत् । अथ अतो वितथासु मिथ्याभूतास्वमूषु योनिषु । अवितथं
सत्यं यतः सममविशेषं । अतस्सत्यं तव धाम स्वरूपं विरजधियो निर्मलमतयः । अनुयंति जानंति । नु इति पृथक् पदं वा । अत्र हेतुः
अभिविपण्यव इति । अभितो विगतव्यवहाराः । पणो व्यवहार इत्यस्य रूपं । पण एरिति । ऐहिकामुष्मिककर्मफलरहिता इत्यर्थः
अवशेषत्वादेकरसं सन्मात्रं । अतस्तत्वोपाधिकतारतम्याभावात् । अप्रच्युतैश्वर्यस्योपास्यत्वमिति भावः । ६ । १९ । स्व-
निमित्तेषु कार्येषु तारतम्यविवर्जितम् । सर्वानुस्यूतं च सन्मात्रं भगवंतं भजामहे । ६ । ॥ ऽऽ ॥ ॥ ऽऽ ॥ ऽऽ ॥

सू

आराममस्यपश्यंतिनतंपश्यतिकश्चन ॥ नतंविदाथयइमाजजानान्यद्युष्माकमंतरंबभूवनीहारेण
प्रावृताजल्प्याचासुतृपउक्थशासश्चरंतीत्याद्याः श्रुतयः ॥ अनुक्रोशंत्योजगदात्मनीश्वरेरतिमुपादि
शंतीत्याहुः ॥ त्वदनुपथमिति ॥ त्वदनुवृत्तित्वसेवोपयिकमिदंकुलायं ॥ कौलीयतेइतिकुलायंशरीरं ॥ आ
त्मसुहृत्तेप्रियवत्त ॥ आत्माचसुहृच्चप्रियश्चतद्वच्चरति ॥ स्वाधिनतयावर्त्ततइत्यर्थः ॥ तथापित्वयिउ

त्वदनुपथंकुलायमिदमात्मसुहृत्प्रियवच्चरतितथोन्मुखेत्वयिहितेप्रियआत्म
निच ॥ नवतरमंत्यहोऽसदुपासनयात्महनोयदनुशयाभ्रमंत्युरुभयेकुशरीरभृतः ॥ इ ॥
॥ २२ ॥

न्मुखेहितेप्रियेआत्मनिच ॥ अप्यर्थेचकारः ॥ एवंभूतेषुसेव्येऽपित्वयिवततअहोकष्टम् ॥ नरमंति ॥ नसख्या
दिनाभजंति ॥ असदुपासनया ॥ देहाद्युपलालनेन ॥ आत्महनः ॥ कुतः यदनुशयाः येषामसदुपासनायामनुश
योवासनायेषांतेकुशरीरभृतः संतः उरुभयेसंसारेभ्रमंति ॥ परिवर्त्तंते ॥ अतः आत्महनइतिभावः ॥ इ ॥ २२ ॥ त्वया
त्मनिजगन्नाथेमन्मनोरमतामिह ॥ कदाममेदृशंजन्ममानुषंसंभविष्यति ॥ इ ॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ॥ ऽऽ

भक्तिरन्यसाधनमितिवचनमनुचितमिव मन्वानो भक्तिं गुरुं करोति ॥ दुरवगमेति ॥ भो ईश्वर ॥ दुर्वोधं
यदात्मतत्त्वं तस्य निगमाय ज्ञापनाय त्वात्ततनोराविःकृतमूर्त्तेश्चरितमहामृताब्धिपरिवर्त्तपरिश्रमणाः
चरितमेवामहानमृताब्धिस्तस्मिन्परिवर्त्तो विगाहस्तेन परिश्रमणाः ॥ परिवर्जनेऽर्थे ॥ श्रमणाश्रमः ग
तश्रमा इत्यर्थः ॥ अपवर्गमपि केचिन्नपरिलषंति ॥ नेच्छंति ॥ कुतोऽन्यत ॥ इंद्रपदादि केचिदिति ॥ एवंभूता भक्तिरसि
का विरला इति दर्शयति न केवलमन्यन्नेच्छंति ॥ किंतु तेनैव पूर्णाः संतः ॥ सर्वसिद्धं ग्रहादिसुखमपि त्यजंतीत्

दुरवगमात्मतत्त्वनिगमाय तवात्ततनोश्चरितमहामृताब्धिपरिवर्त्तपरिश्रमणाः ॥ न प
रिलषंति केचिदपवर्गमपीश्वर ते चरणसरोजहंसकुलसंगविसृष्टगृहाः ॥ दं ॥ २१ ॥

त्याह ॥ ते चरणसरोजहंसकुलसंगविसृष्टगृहा इति तव चरणसरोजे हंसा इव रममाणा ये भक्तास्तेषां कुलं तेन सं
गस्तेन विसृष्टा गृहा यैस्ते तथा ॥ अनेन श्रवणकीर्त्तनेन दर्शितं ॥ श्रुतिश्च मुक्तेरप्याधिक्यं भक्तेर्दर्शयति ॥ यथाह ॥ यं
सर्वे देवा नमंति ॥ मुमुक्षवो ब्रह्मवादिनश्चेति व्याख्यातं च सर्वज्ञैर्भाष्यकृद्भिः ॥ मुक्ता अपि लीलया विग्रहं कृत्वा भ
जंत इति ॥ दं ॥ २१ ॥ त्वत्कथामृतपाथोधौ विहरंतो महामुदः ॥ कुर्वंति कृतिनः केचिच्चतुर्वर्गं तृणोपमम् ॥ ५

भा०द०उ०
१५१

यतोवाचोनिवर्त्तंतेअप्राप्यमनसासह। कोअद्धावेदकइहप्रावोचं। कुतआयाता। कुतइयंविसृष्टिः। अर्वाग्देवाअस्यविसर्ज्जनेन।
नाथाकोवेदयतआवभूव। अनेनहेकंमनसोजवीयोनैनद्देवाआप्नुवन्। पूर्वमर्शत्। तद्धावतोऽन्यानत्येति तस्मिन्नपोमातरिश्वा
दधातीत्याद्याःश्रुतयोभगवत्तत्त्वंदुर्ज्ञेयंवदंत्योभक्तिमेवोररीकृत्यकुर्वंतीत्याह। कइहनुवेदेति। वतअहोभगवनिहजगति
अग्रसरंपूर्वसिद्धंत्वां। अवरजन्मलयः। अर्वाचीनोत्पत्तिविनाशवान्कोनुपुमान्वेदजानाति ईश्वरस्यपूर्वसिद्धत्वस्यचार्वाचीन
त्वप्रमाणंवदनुज्ञानकुरणमभावमाह। यतउदगादिति। यतः त्वत्तः ऋषिर्ब्रह्माउत्पन्नः यंब्रह्माणमनुउभयेआध्यात्मिकाधिदैविक
देवगणउत्पन्नाः। तेतोप्यर्वाचीनाः सर्वेयदातुभवानस्वंसर्वमेवकृष्यउपसंहृत्यशयीत। तर्हितदाअशयिनांजीवानांज्ञानसाध

कइहनुवेदवतावरजन्मलयोग्रसरंयतउदगादृषिर्यमनुदेवगणाउभये। तर्हिनसन्नचासदु
भयंनचकालजवैः किमपिनतत्रशास्त्रमवकृष्यशयीतयदा॥ ११॥ २४॥ ॥ ॥

तंनास्तियतस्तदानसत्। स्थूलंआकाशादि। नचासत्सूक्ष्मंमहदादि नचउभयं। सदसज्ज्ञामारब्धंशरीरं नचकालजवः
तन्निमित्तभूतकालवैषम्यएवंसति। तत्रतदानकिमपिइंद्रियप्राणाद्यपि नचज्ञापकंशास्त्रमपि। अयमभिप्रायः अर्वाकृस
ष्टिगतानांदेहाद्युपाधिकेतान्तरायकालवशेनचमलिनसत्वानांनतावद्भगवज्ज्ञानसामर्थ्यं तथाचश्रुतिः
नतंविदाथयइमाजजानान्यद्युष्माकमन्तरंबभूवेत्याद्याः। यदातुप्रलयसमयेनवकन्तरमस्ति। तदापिसा
धनाभावान्नभगवज्ज्ञानं। अतस्त्वदेकशरणतयाश्रवणकीर्त्तनादिभक्तिरेवसुकरेति॥ ११॥ २४॥ कांहंतुष्यादि

१५१ संकृच्छः कंचवृमन्महस्तव। नवंधोरयासि योमक्तिं मेन्द्रहरदिश॥ ११॥

१५१

इदानीमात्मावाअरे द्रष्टव्यः । श्रोतव्यो मंतव्यो निदिध्यासितव्य इत्याद्याः । श्रुतयो ध्यानमंगत्वेनोपदिशंतीत्याहुः ।
निभृतमरुन्मनोक्षदृढयोगयुज इति ॥ मरुत्प्राणः मनश्च अक्षाणींद्रियाणि च निभृतानि यैस्ते च ते दृढयोगं यु-
जंतीति दृढयोगयुजस्ते तथाभूता मुनयो हृदि यत्तत्त्वमुपासते ॥ तद्देवारयोपि तव स्मरणाद्ययुः । प्रापुः । स्त्रियोपि काम-
तः उरगेंद्रभोगभुजदंडविषक्तधियः । अहींद्रदेहसदृशयोर्भुजदंडयोर्विषक्ताधीर्यासां ताः परिछिन्नदृष्टयः स-

निभृतमरुन्मनोक्षदृढयोगयुजो हृदि यन्मुनय उपासते तदरयोपि ययुः स्मरणात् ॥
स्त्रिय उरगेंद्रभोगभुजदंडविषक्तधियो वयमपि ते समाः समदृशोंघ्रिसरोजसुधाः ॥ १० ॥ २३ ॥

मदृशः ॥ समम परिछिन्नं त्वां पश्यंत्यो वयं श्रुत्यभिमानिन्यो देवता अपि ते समा एव कृपाविषयतया । अंघ्रि-
सरोजसुधाः ॥ अंघ्रिसरोजं सुष्ठु धारयंत्यः ॥ अयं भावः । इत्थंभूतास्तव स्मरणानुभावः ॥ ये योगिनस्त्वां हृदया-
लवनं उपासते ॥ याश्च वयं त्वां समं पश्यामः । याश्च स्त्रियः कामतः परिछिन्नं ध्यायंति ये च द्वेषेण सर्वे न पिता-
नं त्वामेव प्रापयंतीति ॥ १० ॥ २३ ॥ चरणस्मरणं प्रेम्णा तव देव सुदुर्लभं ॥ यथा कथंचिन्नृहरे मम भूयादहर्नि-
शम् ॥ १० ॥

भा० द० उ० ननु यद्यसन्नोत्पद्यते । यदि च त्रिगुणमयपुरुषो न भवति तर्हीदं प्रपंचजातं पुरुषश्च पृथक् नास्तीत्युक्तं स्यात् कथं तर्हि तयो
१५२ सत्वेन प्रतीतिरत आह । सदिव मन इति । मनः मनोमात्रविलसितमिदं त्रिवृत् त्रिगुणात्मकं प्रपंचजातं भासते एव सदिव विभा
ति कथमिति चेत्तत्राह । त्वयीति । त्वय्यधिष्ठाने सत्तया सत्वप्रतीयत इत्यर्थः । न केवलमिदं कार्यमात्रं । किंत्वामनुजात्मनुजः पुरु
षः अभिविधावाकारः । पुरुषमभिव्याप्येति । पुरुषस्यापि पृथक् सत्वप्रतीति मनोमात्रविलसितेत्यर्थः । तथा च श्रुतिः । असतोधि
मनोसृज्यत मनः प्रजापतिमसृजत तद्वा इदं मनस्येव परमं प्रतिष्ठितं यदिदं किंचेति । तच्चात्मविदामपि विम्बं सदेव सु

सदिव मनस्त्रिवृत्त्वयि विभात्यसदामनुजात्सदभिमृशंत्यशेषमिदमात्मतयात्मविदः ॥ नहि वि
कृतिं त्यजंति कनकस्य तदात्मतया स्वकृतमनुप्रविष्टमिदमात्मतयावसितं ॥ १३ ॥ २६ ॥ ऽऽ

प्रति । अतः कथमसत्स्यादत आहुः । सदभिमृशंतीति । आत्मविदस्त्वशेषमिदं भोक्तृभोग्यात्मकं विश्वमात्मतयैव स
दभिमृशंति सदिति जानंति । आत्मकार्यत्वान्न पृथगित्यर्थः । तथाहि । यदुपादानकं यत्कार्यं भवति । तत्तेनैव रूपेण प्रती
यते । उपादीयते चेति लोकाचारे प्रदर्शयति । नहि विकृतिमिति । कनकस्य विकृतिं कुंडलादिकं कनकार्थिनो न हि
त्यजंति । अत्र हेतुः । तदात्मतया कनकरूपत्वेनेत्यर्थः । अतः स्वकृतमिदं विश्वमनुप्रविष्टं च पुरुषरूपमात्मतयैवा
वसितं निश्चितं ॥ १३ ॥ २६ ॥ यस्मात्त्वत्तः सदाभाति जगदेतदसत्स्वतः । सदाभासमसत्यस्मिन्भगवंतं भजामि तं ॥ २३ ॥ १५२

इतोपि नष्ठानेसुकरं ॥ उपविशंतामपि भ्रमवाङ्कु इत्यादित्याह ॥ अनिमसत इति ॥ असतो जगतो जनिमुत्पत्तिं ये वैशेषिकादयो वदं
ति ॥ असत एव ब्रह्मत्वेस्यात्पत्तिं ॥ ये च पातंजलादयः ॥ सत एव एकविंशतिप्रकारस्य दुःखस्य नाशं मोक्षं वदंति ॥ ये नैयायिका
उक्त अपि ये च सांख्यादयः ॥ आत्मनि भिदां भेदं ॥ ये च मीमांसका विपण्यं कर्मफलं व्यवहारं मतं समरंति ॥ ते सर्वे आरोपितैः कं
र्मफलैरेवोपदिशंति ॥ न तत्वदृष्ट्या ॥ सदेव सौम्येदमग्र आसीत् ॥ ब्रह्मैव सन् ब्रह्माप्येति ॥ अनीशया शोचति मुह्यमानाः ॥ मैरेवउप दिशन्ति २
अविद्यायामंतरे वर्तमानाः स्वयं धीराः पंडितं मन्यमानाः ॥ जंघन्यमानाः परियंति मूढाः ॥ अंधेनैव नीयमाना यथांधाः ॥ एवं

जनिमसतः सतो मृतिमुतात्मनि ये च भिदां विपणमृतं स्मरंत्युपदिशंति त आरुपितैः ॥ त्रिगुण
मयः पुमानिति भिदा यदबोधकृता त्वयि न ततः परत्र स भवेदवबोधरसे ॥ १२ ॥ २५ ॥

मेवाद्वितीयं ब्रह्म ॥ एक एव हि भूतात्मा भूते भूते व्यवस्थितः ॥ एकधा बहुधा चैव दृश्यते जलचंद्रवत् ॥ इत्यादिश्रुतिवि
रोधात् ॥ किं च वस्तुतः पुरुषस्य त्रिगुणमयत्वे सर्वमिदं संगच्छेत न तु तदस्तीत्याह ॥ त्रिगुणमयः पुमानिति भिदा य
दबोधकृता ॥ त्वयीति ॥ त्रिगुणमयः पुमानित्यनेन हेतुनाया भिदा ॥ उपलक्षणमेतत् द्विष्टादिसा यस्मात्त्वयि विषये अ
बोधकृता ॥ त्वद्विषयाज्ञानविजृंभिता ॥ तर्हि किमज्ञानमस्ति ॥ वस्तुतः पुंसि नैवेत्याह ॥ ततोऽवबोधात् परत्र परे असंगे
ऽवबोधरसे ज्ञानघने सोऽबोधो न भवेत् ॥ न संभवतीत्यर्थः ॥ १२ ॥ २५ ॥ मिथ्यातर्कसुकर्कशेरितमहावादांधका
रांतरे भ्राम्यन्मंदमतेरमंदमहिमं त्वज्ञानवर्त्मा स्फुटं ॥ श्रीमन्माधव वामन त्रिनयन श्रीशंकर श्रीपते गोविन्देति मुदा व
दन्मधुपते मुकुंद कदा स्यामहं ॥ १२ ॥

भा०द०उ०
१५२

ननु यथाखिलशक्तिनिकेतत्वेन भगवतः सेव्यत्वमुच्यते । तर्हि तत्तत्करणसंबंधात्तेषां भोक्तृत्वे प्रसज्जेयातां न वस्तुतस्तथात्व
मिति चेत्तर्हि जीवो वा नामापि तत्तुल्यत्वमिति । केन विशेषेण पुनः सेव्यसेवकत्वमिति मामाशंकां परिहरंत्यः । अपाणिपादो जव
नो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः । स वेत्ति विश्वं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं पुराणमित्याद्याः श्रुतयः स्तुवंतीत्याह । त्व
मकरण इति । करणसंबंधरहित एवाखिलकारकशक्तिधरः । अखिलानां प्राणिनां यानि कारकाणींद्रियाणि तेषां शक्तीर्द्धार
यति प्रवर्त्तयतीति तथा । कुतः स्वराट् यतः स्वेनैव राजसे दीप्यसे । नहि स्वतः सिद्धज्ञानशक्तेरिंद्रियापेक्षेत्यर्थः । अत स्तव वलि
मुद्वहंति पूजां कुर्वन्ति । अजया अविद्यया सहितास्तया वृता इत्यर्थः । अनिमिषा देवा इंद्रादयः । तत्सृज्या विश्वसृजो ब्रह्मादयो

त्वमकरणः स्वराडखिलकारकशक्तिधरस्तव वलिमुद्वहंति समदंत्यजयानिमिषाः । वर्षभुजो
ऽखिलक्षितिपतेरिव विश्वसृजो विदधति यत्र ये त्वधिकृता भवतश्चकिताः ॥ १५ ॥ २८ ॥

प्रियया सस्त्रीका एव किंकराः स्वामिनं सेवंते । तथा अविद्यायुक्ता देवादयः त्वामिति लोकोक्तिः । समदंति च मनुष्यैर्दत्तं हव्यं कव्या
दिलक्षणं वलिं भक्षयंति । अत्र दृष्टांतः । वर्षभुजः खंडमंडलपतयो अखिलक्षितिपतेर्महामंडलेश्वरस्य स्वप्रजादत्तं वलिं भु
जो वलिमुद्वहंति । तद्वदिति । कथं वलिमुद्वहंतीति तदाह । विदधति यत्र ये त्वधिकृता भवतश्चकिता इति त्वत्तो भीताः संतो यस्मि
न्कर्मणि ये नियुक्तास्ते तत्कुर्वंतीति । त्वदाज्ञापालनमेव वलिवहनमित्यर्थः । तथा च श्रुतिः । भीषास्माद्वातः पवते भीषोदेति
सूर्यः । भीषास्मादग्निश्चेंद्रश्च मृत्युर्धावति पंचम इति ॥ १५ ॥ २८ ॥ अनिंद्रियोपि यो देवः सर्वकारकशक्तिधृक् । सर्वज्ञः सर्व

१५२

भा०द०टी०
१५३

ननु सत्यं ज्ञानमनंतं ब्रह्म नेह नानास्ति किंचन ॥ मृत्योः स मृत्युमाप्नोति ॥ य इह नानेव पश्यतीत्यादिश्रुतिभिरेवंभूतस्य भगवतः प्रतिपा
दनात्तज्ज्ञानं सुकरमेवेति कृतं भक्त्यात्रत आह ॥ तव परि ये चरंतीति ॥ तवेति कर्मणि षष्ठी ॥ त्वां ये परिचरन्ति ॥ छंदसि व्यवहिता
श्चेति यत्क्लेषु नव्यवधानमदोषः ॥ केन रूपेण अखिलसत्वनिकेततया ॥ अखिलानि निकेतानि यस्य स तथा तस्य भावस्तत्ता तया सर्व
भूतावासतयेत्यर्थः ॥ त एवाविगणय्यातिरस्कृत्य निरृतेर्मृत्योः शिरः मूर्ध्नि पदा पादेनाक्रमंति ॥ मृत्योर्मूर्ध्नि पदं
दधतीति ॥ तरंतीति मुच्यंत इत्यर्थः ॥ ये पुनर्विमुखास्त्वभक्तास्तान् गिरा वाचा पशूनिव विबुधान् विदुषोपि परिवयसे बध्नासि
कृतस्त्वयि कृतसौहृदाः ॥ त्वयि कृतसौहृदं प्रेम यैस्ते खलु निश्चितं पुनंति ॥ पवित्रयंति ॥ आत्मानं अन्यानपीति शेषः ॥

तव परि ये चरंत्यखिलसत्वनिकेततया त उत पदाक्रमंत्यविगणय्य शिरो निरृतेः ॥ परिव
यसे पशूनिव गिरा विबुधानपि तांस्त्वयि कृतसौहृदाः खलु पुनंति न ये विमुखाः ॥ श्रं ॥ २७ ॥

नितरेतथा च श्रुतिः ॥ तस्य वाकृतंत्रिनीमानि ॥ दामानि ॥ तस्येदं वाचा तंत्या नामभिर्दामभिः सर्वं सितमिति ॥ अयमभि
प्रायः सत्यमेवंभूतमात्मानं श्रुतयः प्रतिपादयंति ॥ तत्र च यद्यपि वस्तुतोपरोक्षमेव ज्ञानमुत्पद्यते ॥ तथापि असंभावना
विपरीतभावनातिरस्कृतत्वान्मलिनचित्तेषु परोक्षमिव भवतीति ॥ नापरोक्षं संसारभ्रमनिवर्त्तिसमर्थं भगवत्प
रिचर्यया तु सम्यक् ॥ अमलचित्तानां तत्प्रसादेन लब्धापरोक्षज्ञानानामयत्नत एव करकलितो मोक्ष इति ॥ त
था च श्रुतयः ॥ देहांते देवः ॥ परं ब्रह्म तारकं ॥ व्याचष्टे यमेवैष वृणुते तेन लभ्यः ॥ यस्य देवे परा भक्तिरित्यादयः ॥ श्रं ॥
२७ ॥ तपं तु तापैः प्रपन्नत्तु पर्वताद्दृष्टं तु तीर्थो निपवं तु चागमान् ॥ पंजं तु यागैर्विवदंत्युयोगैर्हरिं विनानैव मृतिं

भा०द०उ०
१५४

एवंतावत्परमात्मनःसकाशाद्विद्याकृतकार्य्योपाधयस्तदंशाएवजीवाज्ञाताःसंसरंतोभजंतीत्युक्तं।तत्रयद्येका
विद्यातदाजीवस्याप्येकत्वादेकमुक्तौसर्वमुक्तिप्रसंगः।अथनानाऽविद्यास्तर्हितस्यैवांशांतरस्यसंसारानपगमादनिर्मो
क्षइत्यादितर्कबलेनवस्तुतएवनानात्मने।तत्रचतेषामणुत्वेदेहव्यापिचैतन्यंनस्यात्।देहपरिमाणत्वेचमध्यमपरिमा
णानांसावयवत्वेनानित्यत्वंस्यात्।अतःसर्वगतानित्याश्चेतिकेचनमन्यंते।तेवंनतावदुक्तदोषप्रसंगः।अविद्याभेदेन
तच्छक्तिभेदेनवाबद्धमुक्तव्यवस्थासंभवात्।ईश्वरस्याप्यंतुकेनाप्यंशेनसंसारशंकेत्युक्तमेवप्रसिद्धंचात्मैक्यंसर्वश्रुतिषु
किंचैवंपक्षेमंतव्योमिथ्याज्ञानमपिनसहतइत्याह।अपरिमिताइति।वस्तुतएवानंताध्रुवास्तेनैवरूपेणनित्याःसर्वगता

अपरिमिताध्रुवास्तनुभृतोयदिसर्वगतास्तर्हिनशास्यतेतिनियमोध्रुवनेतरथा।अजनिचयन्मयंत
दविमुच्यनियंतृभवेत्सममनुजानतांयदमतंमतदुष्टतया।७॥ ३०॥

अ।न्तुभृतोजीवायदिसर्वगतास्तर्हितेषांसमत्वात्शास्यताघटनइतिकृत्वा।हेध्रुवनियमोनियमनंत्वयानस्यात्।इतरथातुघटेतइ
तिकथं।यन्मयंयदुपाधितयाहिकारणप्रायंयज्जीवाख्यमजनिज्ञातं।तत्तस्यस्वविकारस्यनियंतृनियामकंभवेत्।अविमुच्याका
रणतयाऽपरित्यज्य।कितत्समनुस्यूतं।ननुकिंयत्तच्छब्दैर्निर्णीयतेचेदुच्यतां।इदंचेदितितत्राह।अनुज्ञानतांयदमतं।इति
जानीमइत्यिवदतांयदमतंमविज्ञातप्रायं।अविषयत्वात्।तथाचश्रुतिः।यस्यामतंतस्यमतंमतंयस्यनवेदसः।अविज्ञातंवि
जानतांविज्ञानमविजानतां।अवचनेनैवप्रोवाचसहतूष्णींबभूवेत्यादि।किंचमतस्यज्ञातस्यदुष्टतयादोषश्रवणात्।तथा
चश्रुतिः।यदिमन्यसेसुवेदेति।दहरमेवापिनूनंत्वंवेत्थब्रह्मणोरूपं।यदस्यदेवेष्वित्यादि।तस्मादेतत्तच्छब्दादेर्द्योत्य
मतर्क्यंकिमपिसर्वानुस्यूतंत्वेनसमंनियंतृभवेदित्यर्थः॥१७॥३०॥अतर्क्यतांसर्वलोकस्यगीतःश्रुत्यायुक्त्याचैव

१५४

तदेव करणप्रवर्त्तकमीश्वरं करणपरतंत्रानसभजंतीत्युक्तं॥ न केवलमीयदेवकारणं तत उत्पन्नत्वेनापि तत्परतंत्रत्वादित्तिवदंति॥ यथाग्नेः क्षुद्राविस्फुलिंगाव्युच्चरंति। एवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि सर्व एत आत्मनो व्युच्चरंतीत्यादिश्रुतेः स्थिरचरजातय इति। हे विमुक्त नित्यमुक्त। उदितवत् अजया मायया विहरः विहारः क्रीडा भवति॥ तदा स्थिरचरजातयः। स्थिराश्च चराश्च जातयो जात्यालिंगितादेहा येषां ते जीवाः स्युः भवेयुः। कथंभूतस्य तव। ततः अजातः परस्य दूरे वर्त्तमानस्यासंगस्येत्यर्थः। कथं विहारः। उदीक्षया ईक्षणेन तेषाम्॥ ननु मयि लीनानां कथं जन्म स्यात्तत्राह। उत्थनिमित्तयुज इति। ईक्षयैवोत्थितानि निमित्तानि कर्माणि तद्युक्तानि लिंगशरीराणि वा तैर्युज्यंत इति तत्तथा॥ ननु किंनिमित्तो

स्थिरचरजातयः स्युरजयोत्थनिमित्तयुजो विहर उदीक्षया यदि परस्य विमुक्त ततः॥ न हि परमस्य कश्चिदपरो न परश्च भवेद्वियत इवापदस्य तव शून्यतुलां दधतः॥ १६॥ २९॥

स्यादेनमदीक्षयैवाविर्भवंतु॥ न त्वयि वैषम्याभावात्॥ विषमसृष्टेः योगादित्याह॥ परमस्येति। तव परमस्य उत्तमस्य परमकारुणिकस्य। वियत इवाकाशसदृशस्य समस्येत्यर्थः॥ कश्चिदपरः स्वीयः परोऽस्वीयश्च न संभवतीत्यर्थः। असद्वा इदमग्र आसीत्। ततो वै सदजायतेत्यादिश्रुत्या शून्यपूर्वकं चेत्समिव प्रतीयते। तदर्थं पुनर्विशिनष्टि शून्यतुलां दधतः शून्यसाम्यं भजतः। तदेवं दर्शयंस्तु पुनर्विशिनष्टि॥ अपदस्येति। न पद्यते इत्यपदस्तस्य वाङ्मनसयोरगोचरस्येत्यर्थः॥ १६॥ २९॥ त्वदीक्षणवशक्षोभमायावोधितकर्मभिः॥ जातान्संसरतः खिन्नान्नित्यं हरे पाहि

भा० द० उ०
१५५

तदेवसेकमेवाद्वितीयं ब्रह्म ॥ अज्ञामेकां ॥ अविनाशी वारेयमात्मेत्यादिश्रुतिबलादुत्पत्तिस्मरणाच्च जीवानामौ
पाधिकमेव जन्मनः स्वत इत्युक्तं ॥ उपाधिलयेन परमात्मनि पुनर्लयश्रवणात् ॥ अपि न वास्तवजन्मेत्याह
त्वयीति ॥ त्वयि कारणात्मनि तत इमे जीवाः स्वत इति ॥ यतो न वास्तवं जन्म तस्माद्विविधनामगुणैरनेकप्रकारकार्यो
पाधिभिः सह लिल्युः ॥ लीना बभूवुः ॥ तत्र सुषुप्तिप्रलययोर्मधुन्यशेषरसा इव लीयंते ॥ यथा मधुनि सकलकुसुम
रसाविशेषतो ऽनुपलभ्यमाना अपि सामान्येनोपलभ्यंते ॥ एवं स्वापादौ विशेषमात्रलयात् ॥ त्वयि परमे निरुपा

त्वयि त इमे ततो विविधनामगुणैः परमे सरित इवार्णवे मधुनि लिल्युरशेषरसाः ॥ १८ ॥ ३१ ॥

धौ सरित इवार्णवे [illegible] लीयंते इति विवेकं लभंते ॥ अमुष्याहं वृक्षस्य रसो ऽस्मीत्येवमेव खलु सौम्येमाः
सर्वाः प्रजाः सति संपद्य न विदुः ॥ सति संपद्यामह इति ॥ यथा नद्यः स्यन्दमानाः समुद्रे ऽस्तं गच्छं
ति ॥ नामरूपे विहाय ॥ तथा विद्वान्नामरूपाद्विमुक्तः परात्पुरुषमुपैति ॥ दिव्यमित्याद्याः ॥ १८ ॥ ३१ ॥ य
स्मिन्सुषुप्त्यादिलयमपि यज्ञाति विश्वं लयादौ जीवोपेतं पुरुकरुणया केवलात्मावबोधे ॥ अत्यंतांतं तवज्ञ
ति सहसा सिंधुवत् सिंधुमध्ये मध्येचित्ते त्रिभुवनगुरुं भावये तं नृसिंहम् ॥ १८ ॥ ॥ ६६ ॥ ॥ ६७ ॥ १५५

२ मुच्यते न स्वतः अघटनादित्याह न घटत इति अत्र किं प्रकृते जीवरूपेणोद्भवः स्यात् पुरुषस्य वा उभयोर्वा आद्ये जीवानां

ननु यदि च परमात्मनो जीवा जायन्ते इति नियन्तृनियम्यभाव उच्यते तर्हि ॥ तथा सति जीवानामनित्यत्वप्रसंगे प्रतिदिनं कृतनाशाकृताभ्यागमप्रसंगः स्यात् । किं च मोक्षो नाम जीवस्य स्वरूपहानिरेव स्यात् ॥ न चैतद्युक्तं स्वप्रकाशानंदात्मनोऽविद्योत्थानर्थनिवृत्तिमात्रस्य मोक्षत्वाभ्युपगमादित्याशंक्योपाधिजन्मनैव जन्म जीवानां जडत्वापत्तिः ॥ द्वितीये पुरुषस्य विकारित्वप्रसंगः ॥ अत एव न तृतीयः प्रसंग इत्याशयेनोक्तं ॥ प्रकृतिपुरुषयोरुद्भवो न घटत इति श्रुत्याऽजत्वप्रतिपादनादपीत्याह ॥ अजयोरिति ॥ तथा च श्रुतिः ॥ अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः जनयन्तीं स्वरूपाम् अजो ह्येको जुषमाणोऽनुशेते ॥ जहात्येनां भुक्तभोगामजोऽन्य इत्युभययुजा तु भवंति ॥ उभयं च तत्र युज्यते इत्युभययुक् संबंधः परस्पराध्यस्तमिति यावत् ॥ तेनासु

प न घटत उद्भवः प्रकृतिपुरुषयोरजयोरुभययुजा भवंत्यसुभृतो जलबुद्बुदवत् ॥ ३१ ॥

भृतः ॥ प्राणाद्युपाधयो जीवा जायंत इत्यर्थः ॥ जलबुद्बुदवदिति ॥ यथा केवलेनानिलेन वा सलिलेन वा जलबुद्बुदा न भवंति ॥ किं तु मिलिताभ्यां तद्वत् तत्र च यथा अनिलो निमित्तं जलमुपादानं ॥ तस्माद्वा एतस्मादात्मनः आकाशः संभूतः सोऽकामयत बहु स्यां प्रजायेयेति ॥ यथाग्नेः क्षुद्रा विस्फुलिंगाः व्युच्चरंति ॥ एवमेवास्मादात्मनः सर्वे प्राणाः सर्वे देवाः सर्वाणि भूतानि सर्व एत आत्मनो व्युच्चरंतीत्यादिश्रुतिषु चेतनाचेतनप्रपंचस्य परमात्मोपादानत्वश्रवणात् ॥ न च विकारित्वं परिणामानंगीकारात् ॥ केचित्तु नः परिणाममंगीकृत्यात्मनो विकारभिया विपरीतं निमित्तोपादानभावमिच्छंति सर्वथा तावत् प्रकृतिपुरुषैक्याद्भवतीति सिद्धं ॥ ३१ ॥

सचभगवतिभावोमनोनियमेसतिभवतिसोगुरूपसदनंविनाघटते ॥ तद्विज्ञानार्थंसगुरुमेवाभिगच्छेत्समित्पा-
णिः श्रोत्रियंब्रह्मनिष्ठं ॥ आचार्यवान्पुरुषोवेदनैषातर्केणमतिरपनेया ॥ प्रोक्तान्येनैवसुज्ञानायप्रेष्ठेत्याद्याःश्रु-
तयइत्याह ॥ विजितहृषीकवायुभिरिति ॥ विजितानिहृषीकाणींद्रियाणिवायुश्चप्राणोयैस्तैरपि ॥ अदांतमनस्तुरंगं ॥ अ-
दांतमदमितंमनएवतुरगंदुर्दमत्वसाम्यात्तंयेयंतुंयतंतिप्रयतंते ॥ अतिलोलमतिचंचलंगुरोश्चरणंसमवहाय
अनाश्रित्यतेउपायेषुखिद्यंतेक्लिश्यंतिइत्युपायखिदःसंतः ॥ व्यसनशतान्विताः ॥ बहुव्यसनाकुलाः ॥ इहसंसारस-

विजितहृषीकवायुभिरदांतमनस्तुरगंयइहयतंतियंतुमतिलोलमुपायखिदः ॥ व्यसनश-
तान्विताःसमवहायगुरोश्चरणंवणिजइवाजसंत्यकृतकर्णधराजलधौ ॥ २० ॥ ३३ ॥

मुद्रेसंतितिष्ठंति ॥ दुःखमेवप्राप्नुवंतीत्यर्थः ॥ हेअजअकृतकर्णधराः ॥ अस्वीकृतनाविकाःवणिजइवतद्वत् ॥ उक्तं-
च ॥ नरदेहमाद्यंसुलभंसुदुर्लभंप्लवंसुकल्पंगुरुकर्णधारंमयानुकूलेननभस्वतेरितंपुमान्भवाब्धिंनतरे-
त्सआत्महा ॥ प्राकृतैःसंस्कृतैश्चैवगद्यपद्याक्षरैस्तथा ॥ देशभाषादिभिःशिष्यंबोधयेत्सगुरुःस्मृतः ॥ गुरु-
णोपदर्शितभगवद्भजनसुखानुभूतैःस्वतएवमनोनिश्चलंभवति ॥ नान्यथेतिभावः ॥ २० ॥ ३३ ॥ यद्वापरानं-
दगुरोभवंतादेपदमनोमेभगवद्वल्लभेन ॥ तदानिरस्ताखिलसाधनश्रमःश्रयेयसौख्यंभवतःकृपातः ॥ २०

एवंतावत्यरमेष्वराज्ञीवाजायंते॥तद्दसेनचकर्माणिकुर्वंति॥पुनस्तत्रलीयंतइतिसंसारचक्रेभ्रमणमुक्तं॥इदानीं
तन्निवृत्तये पूरीत्यमत्तानिपरीत्यलोकान् परीत्यसर्वाःप्रदिशोदिशश्च॥उपस्थायप्रथममजामृतस्यात्मनात्म
नमभिसंविवेशेत्याद्यभगवदनुवृत्तिंविदधत्याह॥नपुत्तवेति॥नपुजीवेषुअमीपुत्तवमाययाभ्रममुक्तोल
त्तणमवगत्यज्ञात्वासुधियःभ्रशांत्वयिअभवेभवनिवर्त्तकेभावंस्वभावमनुवृत्तिंदधतिकुर्वंति॥अनुप्रभव
अन्वनुप्रभवोयस्मिन्तभ्रमंततःकिमतआह॥कथमिति॥अनुवर्त्तमानानांत्वामेवशरणंभजतांभवभयं

नपुत्तवमाययाभ्रममसीप्रवगत्यभ्रशांत्वयिसुधियोऽभवेदधतिभावमनुप्रभवं॥कथमनुवर्त्त
तांभवभयंतवयद्भ्रुकुटिःसृजतिमुकुटत्रिनेमिरभवच्छरणेषुभयम्॥शं९॥३२॥ ॥ss॥॥

संसारभयंकथंभवेत्॥नकथंचिदपीत्यर्थः॥कुतःयद्यस्मात्तवभ्रुकुटिःभ्रूभंगरूपस्त्रिनेमिस्त्रिनेमिस्त्रोने
मयइवावच्छेदाः॥शीतोष्णवर्षकालायस्यसंवत्सरात्मककालस्यसःअभवच्छरणेषु॥नभवच्छ
रणेषु॥नभवाच्छरणंरत्तितायेषांतेष्वेवभयंजन्ममरणादिलत्तणंसृजतिकरोति॥अतएवंसंसार
माकलय्यतन्निवृत्तयेसुधियस्त्वयिभावंदधतीति॥शं९॥३२॥संसारचक्रकेवचैविदीर्णमुदीर्णनाभवता
पतन्नं॥कथंचिदापन्नमिहप्रपन्नंतमुद्धरश्रीनहरेन्द्रलोकम्॥१९॥ ॥ss ॥

भा० द० उ० एवंगुरूपदेशेनतत्त्वमवगम्यसारासारविवेकेनचसर्वतोनिर्विघ्नतदेवमहत्संगेनोपपत्तिभिःसम्यगवधारयि
१५९ तुंतीर्थसदनानिमुनयःपर्य्यटंतीतिश्रोतव्योमंतव्यइत्यादिश्रुत्यर्थमाह॥भुविपुरुपुण्यतीर्थसदनानीति॥तेउक्तलक्ष
णाऋषयोविमदाःनिरहंकाराः॥यतोभवत्पदांबुजंहृदोभवतःपदांबुजंहृदियेषांते॥अतस्वयमेवअघभिदंघ्रिजलत्वं
येषांते॥उतअपितथाविधाअपिपुरूणिबहूनितीर्थानिसदनानिचक्षेत्राणितान्येवउपासंतेसेवंते॥प्रायस्तत्रैवमह
त्संगोभवतीति॥अथवापुरुअधिकंभगवज्जनलक्षणपुण्यंयेषांतानिचतीर्थानिचगुरवःमहांतइत्यर्थः॥तेषांसद

भुविपुरुपुण्यतीर्थसदनान्यृषयोविमदास्तउतभवत्पदांबुजहृदोघभिदंघ्रिजलाः॥दधतिसकृ
न्मनस्त्वयियआत्मनिनित्यसुखेनपुनरुपासतेपुरुषसारहरावसथान्॥२२॥३५॥

नानि॥आश्रमान्॥यथाहामरसिंहः॥निपानागमयोस्तीर्थमृषिजुष्टेजलेगुराविति॥नपुनःपुरुषसारहराव
सथानुपासते॥पुरुषाणांसारंविवेकधैर्य्यक्षमाशांतिप्रमुखंहरंतीतितथातेचतेआवसथागृहास्तान्
नचैतेषांगृहादिभवकुत्सितसुखापेक्षेत्याह॥दधतीतिसकृन्मनस्त्वयियआत्मनिनित्यसुखेइतिसकृ
दपित्वयियेमनोदधतितेपिगृहाद्यासक्तानभवंति॥किंपुनरेवंभूताइत्यर्थः॥२२॥मुंचन्नंगतदगसंगम
निशंत्वामेवसंचिंतयन्सतःसंतिपतोसतोगतमदास्तानाश्रमानावसन्॥नित्यंत्वन्मुखपंकजाद्विगलितत्वसु

२॥३५॥

॥२२॥

१५९

परित्यलोकान्कुसंज्ञितान्ब्राह्मणोनिर्वेदमायात् ॥ नास्त्यकृतः कृतेनेति ॥ तथायदासर्वेप्रमुच्यंतेकामायेऽस्यहृदि
स्थिताः अथमर्त्योऽमृतोभवत्यत्रब्रह्मसमश्नुतइत्याद्यावेदाःपुमर्थंविदधतीत्याह ॥ स्वजनेनसुतेति ॥ आत्मादेहः धा
मगृहं ॥ असुः प्राणः स्वजनादिभिः ॥ किंसर्वरसेसर्वेरसाः ॥ सुखानिविद्यंतेयस्मिन् ॥ तस्मिंस्त्वयिपरमानंदे ॥ एतस्यै
वानंदस्यान्यानिभूतानिमात्रामुपजीवंतीतिश्रुतेः ॥ त्वांश्रयतःसेवमानस्यपुंसः ॥ आत्मनिसति ॥ नृणांतुएभिःरतैः

स्वजनसुतात्मदारधनधाममधरासुरथैस्त्वयिसतिकिंनृणांश्रयतआत्मनिसर्वरसे ॥ इतिसद
जानतांमिथुनतोरतयेचरतांसुखयतिकोन्विहस्वविहतेस्वनिरस्तभगे ॥ २१ ॥ २४ ॥ ॥ ८८ ॥

किंकउपयोगः ॥ इतितत्सत्यंपरमार्थसुखमजानतां ॥ अतएवमिथुनतः ॥ स्त्रियांमिथुनीभूयरतयेमायासुखाय
चरतांप्रवर्त्तमानानांकर्मणिपर्षदो ॥ अज्ञानेतःपुरुषान्कोन्वर्थःसुखयति ॥ आनंदयति नकोपीत्यर्थः ॥ इहसंसारेक
थंभूते ॥ स्वविहते ॥ स्वतएवनश्वरे ॥ स्वनिरस्तभगेस्वतएवगतसारेइति ॥ पाठांतरेतु ॥ कोन्वित्यस्यैतच्छिद्रोपपणाढ्यं
अतस्त्वद्भजनमेवोचितमित्यर्थः ॥ २१ ॥ ३४ ॥ भजतोहिभवान्साक्षात्परमानंदचिद्घनः ॥ आत्मैवकिमतःकृत्यंतुच्छ
दारसुतादिभिः ॥ २१ ॥

भा०द०उ० व्यवहृतये विकल्पइषितइति॥ व्यवहाराय अर्थक्रियार्थं विकल्पो भ्रम इषितः॥ इष्ट एव कुरकार्षापणादि नाणकवत् व्यवहार द
१५८ र्शनान्नन्वेकअसतो न्यत्रारोपो भ्रमःप्रसिद्धः॥ अत्यंतासत्वे कथं प्रपंचो भ्रमः स्यात् सत्ये वा नाद्वैतसिद्धिः॥ उक्तं च भेदः
अध्यस्येनैव पुष्पाद्वेमसत्के यम वस्तुनि॥ अज्ञाततद्गुणं मत्तोकं मध्यारोपयेत् त्वान्वेति॥ नेत्याह॥ अंधपरंपरयेति॥ अंधे
परंपरया यो विकल्पइत्यन्वयः॥ अयं भावः॥ संस्कारजन्यो भ्रमः॥ संस्कारश्च हि पूर्व एवं प्रतीतिमात्रमपेक्षते॥ न वस्तुसत्वं प्रती
तोसत्यावस्तुसत्यत्वाभावेन भ्रमव्यतिरेकादर्शनात्॥ अतो नादृत्वा तत्पूर्व पूर्वं भ्रमेण हृष्यात्तरोत्तरस्यारोपो भविष्यतीत्य
न्धपरंपरान्यायेन तेन च व्यवहारः॥ सेत्स्यतीत्यप्रयोजको हेतुरिति॥ नन्वक्षय्यं ह वै चातुर्मास्ययाजिनः॥ सुकृतं भवति
अपाम सोमममृता अभूमेत्यादिभिः कर्मफलस्य नित्यत्व प्रतिपादनाद्वसत्वेन घटते॥ न हि नित्यं वस्तु असद्भवति॥ त

व्यवहृतये विकल्पइषितोंधपरंपरया भ्रमयतिभारती तउरुवृत्तिभिरुक्थजडान्॥ २३॥ ३६

साहेदप्रतिपादितत्वात् द्वैतंसदेवेत्याशंक्याह॥ भ्रमयतीति हेभगवन् तेतव भारती वेदलक्षणादि वृत्तिभिर्व
कीभिर्गौणलक्षणादिवृत्तिभिः॥ उक्थजडान्॥ कर्मश्रद्धाभराक्रांतमंदमतीन्॥ भ्रमयति मोहयति॥ अयं भावः॥
न हि वेद कर्मफलस्य नित्यत्वमभिप्रैति॥ किंतु लक्षणया प्राशस्त्यमात्रं विध्येकवाक्यत्वात्॥ अन्यथा वाक्यभेद
प्रसंगात्॥ तद्यथेह कर्मजितो लोकः क्षीयत इति न्यायोपबृंहित श्रुत्यंतरविरोधाच्च॥ अतः कर्मजडानामिदं भ्रम
मात्रमिति॥ एतेनैव॥ तस्माद्वा एतस्मादात्मनः आकाशः संभूत इत्यादिभामन्यपरत्वं दर्शितं भवति॥ ३६॥ उक्तं भ
वतः सतोपि भुवनसन्निवेसर्वस्य तज्ज॥ कुर्वत्का यमयी व कूटकन्न कंवेदोपि नैवंपरः॥ आद्वैतं तत्व सत्यं तु परमानंदं पदं
सन्मुदावदेसुंदरमिंदिरानुत हरे मां नं च मामानत॥ २३॥ १५८॥

नन्वाम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तद्भूतानां क्रियार्थेन समाम्नाय इति । तत्र तन्त्रे जैमिनिना वेदस्य क्रियापरत्वाभि-
धानादुपनिषदामपि तदेवयुक्तं तत्र वार्त्तिककृता । एतेन कर्तृत्वर्थकर्तृप्रतिपादनेनोपनिषदां नैराकांक्ष्यं व्याख्यातमिति । न । एक-
मेवाद्वितीयं ब्रह्म विज्ञानमानन्दं ब्रह्म अयं वाव स्तुश्रोत्रमित्येव तद्धि परिनिष्ठितात्मप्रतिपादनात् । न ह्यद्वितीयपरमानन्दरूपस्य कर्माङ्गत्वं
युज्यते । अननुमतं चेत् तद्वार्त्तिककृता । कथं सर्वत्रैव विज्ञानं संस्कारत्वेन गम्यते । परांगं चात्मविज्ञानादन्यत्रेत्यवधार्यतामिति
तेनैवोक्तत्वात् । एतदर्थमेवमनेनायमुन्नयः पर्य्यटितमित्युक्तं । तत्र तावद्द्वैतस्य सत्यत्वे भवेदप्येवं तदेव तु न संभवतीति प्रश्नोत्तराभ्यां
तेनैन तत्वावधारणप्रकारमाह सत्तदमुत्थितं सदिति । इदं विश्वं धर्मि सदिति साध्यो धर्मः । सत्वोत्पन्नत्वात् । यद्युत्पन्नं तत्तद्
आत्मकमेव दृष्टं । यथा कनकादुत्पन्नं कुण्डलादि तदात्मकं तद्वदिति । तत्र यदि सदभेदः साध्यते तदोपादानत्वेन निर्दृष्टेनैव भेदप्रती-

सत्तदिदमुत्थितं सदिति चेन्न नु तर्कहतं व्यभिचरति क्व च कचमृषा न तथोभययुक् ॥ ॥ ० ॥ ॥ ५५ ॥

तेर्विरुद्धो हेतुरित्याह । नन्विति तर्कहतमिति । न तु नाभेदं साधयामः । किं तु तदुत्पन्नत्वेन कुण्डलादिवदैक्यं प्रतिषेधयामः । तत्राभेदस्यैवस्य
ह्यितिचेदित्याशंक्यानैकान्तिकत्वेन दूषयति व्यभिचरति क्व चेति । पितृपुत्रादिषु मृत्स्नाघटप्रध्वंसादिषु च तथा दर्शनादिति भा-
वः । ननु तदुत्पन्नत्वं नाम तदुपादानत्वं न तु तन्निमित्तत्वं । अतो नानैकान्तिकत्वमित्याशंक्य दूषयति । क्व च मृषेति । गुणोपादानस्यापि प-
णिनो न गुणत्वं किंतु मिथ्यात्वं । अन्यथा कुण्डलादिवद्भेदघटितप्रसङ्गात् । अतः पुनरप्यनैकान्तिकत्वमेवेति भावः । ननु तत्र न केवलं गु-
णमात्रं फणिन उपादानं किं तु अविद्यायुक्तं तथाभूतस्यावस्तुत्वाद्युक्तं फणिनो मिथ्यात्वमित्याशंक्य तुल्यमत्रापीति दूषयति
न तथोभययुगिति । अयमर्थः । अत्राप्यविद्यायुक्तस्यैव सतस्तदुपादानत्वं । एवं भूतस्य न च वस्तु सत्यं । अतः सदुपादानत्वमसि-
द्धमिति । न वस्तु सत्यत्वं प्रपञ्चस्येति । ननु माभूद्धेतुनानेन नहेतुना प्रपञ्चस्यसत्यं हेत्वन्तरेण तु साधयामः । तथा हि सदिदं । अर्थक्रिया

१ तत्वदेव

मू ३

भा० द० उ०
१५९

ननुचयदिप्रपंचोनाममात्रस्त्वेव।नचासत्ताते नचैतन्यस्यसंबंधगंधोपितर्हिकिमपराद्धंजीवेनयतः।अयंसंसरति।किंवहु
गुणमीश्वरस्य।यतोनित्यमुक्तः।किंविषयंचतत्ताकर्मकांड इत्यपेक्षायांजीवेश्वरविशेषं।द्वासुपर्णासयुजासखायासमानंवृ
क्षंपरिषस्वजाते तयोरन्यःपिप्पलंस्वाद्वत्त्यनश्नन्नन्योभिचाकशीति।अजामेकांलोहितशुक्लकृष्णांइत्याद्यांच
हृतीत्याह सयदजयेति।सतुजीवः।यतयस्मादजयामायया।अजांअविद्यांअनुशयीत।आलिंगेत।ततश्चगुणांश्च
देहेंद्रियादीन्सेवमानआत्मतयाअध्यस्यन्।तदनुतदनंतरंस्वरूपतांतद्धर्मयोगंचजुषन्अपेतभगःपिहिता
नंदादिगुणःसन्मृत्युंसंसारंभजतिप्राप्नोति।तद्विषयमेवचकर्मकांडमितिभावः।त्वमुतत्वंतुजहासितांमायां।ननु

सयदजयात्वजामनुशयीतगुणांश्चजुषन्भजतिसरूपतांतदनुमृत्युमपेतभगः।त्वमुतजहासि
तामहिरिवत्वचमात्तभगोमहसिमहीयसेऽष्टगुणितेऽपरिमेयभगः।२५।३८।

सामर्थ्येवास्तिकथंत्यागस्तत्राह।अहिरिवत्वचमिति।अयंभावः।यथाभुजंगःस्वगतमपिकंचुकंजीर्णबुद्ध्यानाभि
मन्यतेतथात्वमजांनहिनियंतेराइङ्गादिवत्कामधेनुवंदपत्नेरजयाकृत्यामितितामुत्सृजसिइतिकुतएतत्तदाह।आत्तभ प १ न २
गोनित्यप्राप्तैश्वर्यः।महसिपरमैश्वर्ये।अष्टगुणिते।अणिमाद्यष्टविभूतिमतिमहीयसेपूज्यसेविराजसे।कथं
भूतः।अपरिमेयभगः।अपरिमितैश्वर्यः।नह्यन्येषामिवदेशकालादिपरिच्छिन्नतयाष्टगुणितमैश्वर्यं।अपितु
परिपूर्णस्वरूपानुबंधित्वादपरिमितमित्यर्थः।२५।३८।नत्वंतीतदीश्वरणाप्राणागात्ताकालस्वभावादिभिर्भावा
त्सत्वरजस्तमसयानुन्मीलयंवहून्।मामात्रमप्यपदाशिरस्यतिभिरंसंमद्वैयत्याद्दूरंमायातेशरणंगतोऽस्मिन्हरे

ति

१५९

तदेवप्रपंचस्यसत्वेसाधकंनास्तीत्युक्तं॥इदानीमसत्वेस्पष्टंप्रलयश्रुतयोयतोवाइमानिभूतानिजायंतेइत्याद्याः॥तन्मूलंचानु
मानप्रमाणमित्याह॥नयदिदमिति॥यस्मादिदंविश्वंअग्रेसृष्टेःपूर्वंनआसननआसीत्सदेवसोम्येदमग्रआसीत्॥आत्मावाइ
दमेकएवाग्रआसीदित्यादिश्रुतेः॥नचनिधनात्प्रलयादनुअनंतरंभविष्यत्भविष्यति॥नासदासीन्नोसदासीदित्यादिः॥अतःका
रणात्॥अंतरामध्येपिएकरसेकेवलेत्वयिमृषामिथ्यारूपमेवविभातीतिमितंनिश्चितंश्रुतएव॥अतःश्रुत्याःद्रविणजाति
विकल्पपथैः॥द्रविणजातीनांमृल्लोहकांस्यायसरूपाणांविकल्पाभेदाघटकुंडलादयः॥तेषांपंथानोमार्गाःप्रकारास्तैरुप
मीयते॥सदृशतयानिरूप्यते॥यथातत्रकार्यकारणंनामधेयमात्रंतत्कारणंमृदादेरेवतुसत्यं॥तथात्राप्याकाशादीनां

नयदिदमग्रआसनभविष्यदतोनिधनादनुमितमंतरात्वयिविभातिमृषैकरसे॥अतउपमीयतेद्रवि
णजातिविकल्पपथैर्वितथमनोविलासमृतमित्यवयंत्यबुधाः॥२४॥३७॥

नाममात्रंतद्ब्रह्मैवसत्यं॥तथाचश्रुतिः॥वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यं॥यथासोम्यैकेनमृत्पिंडेनवि
ज्ञातेनसर्वंमृन्मयंविज्ञातंभवति॥यथाएकेनलोहमणिनासर्वंलोहमयंविज्ञातंस्यात्॥तथाएकेननखनिकृंतनेनसर्वं
कार्ष्णायसमित्यादितस्मादस्यसत्वप्रमाणाभावादसत्वेप्रमाणस्यविद्यमानत्वाद्वितथंमनोविलासंऋतंसत्यमितियेऽवयं
तिजानंतितेऽबुधाः॥अज्ञाइत्यर्थः॥तत्रैवंप्रयोगः॥विवादाध्यासितंनसत्॥आद्यंतयोरविद्यमानत्वात्विकारित्वात्दृश्यत्वाच्च
शुक्तिरजतादिवत्आत्मवच्चेति॥२४॥३७॥मुकुटकुंडलकंकणकिंकिणीपरिणतंकनकंपरमार्थतः॥महदहंकृतिखंप्र
मुखंतथानरहरेनपरंपरमार्थतः॥२४॥॥ss॥

भा०द०उ० नन्तु यत्तेर्न किमपि कृत्यमस्ति ॥ प्रारब्धमेव सुखदुःखोपभोगे नापद्यते ॥ अतः किमपि च याशाण्त्रे उभयतोप्यसुख
१६० मिति श्रुपते च ॥ एष नित्यो महिमा ॥ ब्राह्मणस्य न कर्मणा वर्द्धते नो कनीयानित्यादिश्रुतेः ॥ त्वदवगमीति ॥ हे सगुणष
ड्गुणैश्वर्ययुक्त ॥ त्वदवगामी त्वज्ज्ञानवान् ॥ भवदुत्थशुभाशुभयोरुभवतः ॥ कर्मफलदातुरीश्वरस्य ते ॥ अत्ययोरा
विर्भूतयोः शुभाशुभयोः ॥ प्राचीनपुण्यकर्मणोः ॥ फलभूतान् गुणविगुणान्वयान् सुखदुःखसंबंधान्नवेत्ति ॥ प
विगत देहाभिमानतया कार्याकार्यबोधाभावात्तैर्न नियुज्यत इत्यर्थः ॥ युक्तं चैतत् ॥ यतः कारणात् ॥ मनुजैर

त्वदवगमी न वेत्ति भवदुत्थशुभाशुभयोर्गुणविगुणान्वयांस्तर्हि देहभृतां च गिरः ॥ अनुयुग
मन्वहं सगुण गीतपरंपरया श्रवणभृतो यतस्त्वमपवर्गगतिर्मनुजैः ॥ २७ ॥ ४० ॥ ॥ ६६ ॥ वे २

न्वहं श्रवणभृतः ॥ अनु[illegible]दिनं श्रवणेन चेतसि धृतस्त्वं ॥ तेषामपवर्गगतिः ॥ अपवर्गरूपा गतिर्भवति ॥ के
(तावेतत्वस्त्रो) यं श्रवणभृतः ॥ अनुयुगं प्रतियुगं यथा गीत परंपरा उपदेशसंततिस्तया सत्संप्रदायानुसारेणेत्य
र्थः एतदुक्तं भवति ॥ एतावत्तत्त्वज्ञानिनः ॥ न तेषां कर्माधिकारशंकापि ये चानवरतं त्वत्कथाश्रवणादिनिष्ठास्ते
षामपास्तं भवत्पदानां न विधिनिषेधइत्तरेषां तु योगच्छद्मेनेंद्रियलालनलालसानामुभयतोप्यसुखमिति
२७ ॥ ४० ॥ अवगमं तव मे दिश माधव स्फुरति येन सुखासुखसंगमः ॥ श्रवणवर्णनभावमथापि वा न हि भवामि यथा १६०

इतरेसंसरन्ती

एवं तावदुक्तसाधनकर्त्वेन ये भगवन्तं भजन्ति ते मृत्युं तरन्तीत्युक्तं ॥ इदानीं ये बहिःसंगं परित्यज्य भगवन्मार्गे प्रवृत्तास्त्रपि के
चिदन्तर्वन्ताशिनः कामान्न मुंचन्ति ॥ ते न भगवन्तं न प्राप्नुवन्ति ॥ न चेह सुखं लभन्ते ॥ केवलं कुयोनीरेव प्राप्नुवन्तीति तान्श्ये
चन् कामान् यः कामयते मन्यमानः ॥ स कर्मभिर्जायते तत्र तत्रेति श्रुत्यर्थमाह ॥ यदिन समुद्धरन्तीति ॥ हे भगवन् येय
यतयः हृदि स्थिताः ॥ कामजटाः कामस्य जटा मूलानि वासना यदि न समुद्धरन्ति नोत्पाटयन्ति तेषामसतां भवान् हृदिगतोपि
दुरधिगमः दुःप्रापः ॥ कथं अस्मृतकंठमणिः विस्मृतः यः कंठमणिः तत्तुल्यः स यथा कंठे वर्त्तमानोप्यस्मृतश्चेद्प्राप्यस्तथा भव

यदि न समुद्धरन्ति यतयो हृदि कामजटा दुरधिगमोऽसतां हृदि गतोऽस्मृतकंठमणिः ॥ असुतृप
न२ योगिनामुभयतोप्यसुखं भगवन्ननपगतान्तकादनधिरूढपदाद्भवतः ॥ ३६ ॥ ३९ ॥ ॥ ॥ ऽऽ ॥ ॥

ति ॥ तद्वदिति ॥ न केवलमेतावत्किंतु असुतृपयोगिनामिंद्रियतर्पणपराणां योगच्छद्मनामुभयतोप्यसुखं ॥ इहामु
त्र च दुःखमेव तदाह ॥ अनपगतान्तकात् ॥ अनिवृत्तान्मृत्योः ॥ लोकाराधनधनार्ज्जनादिक्लेशात् ॥ भोगवैभवप्राकट्यभ ६
याच्चेह तावद्दुःखं भवति ॥ ईश्वरादपि दुःखं कथं भवतात् ॥ अनधिरूढात् ॥ अनधिरूढं पदं यस्य तस्मात् स्वपदप्राप्त्यभावात्
अविद्यावद्विषयत्वेन प्राप्तनिजधर्मातिक्रमनिबंधनत्वदंडरूपनरकप्राप्तेरमुत्राप्यसुखमित्यर्थः ॥ ३६ ॥ ३९ ॥ दंभव्या
समिषेणैवं चिन्तजुनेभोगे कश्चितातुरं संमुह्यत्तमहर्न्निशं विरचितोद्योगे लोके नैकाकुलं ॥ श्रोत्रालं घ्रिनमत्तजनत्ता
समानत्तासमदं दीनानाथदयानिधानपरमानंदप्रभो पाहिमां ॥ ३६ ॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ॥ ऽऽ

भा० द० उ० ४२ ॥ इत्यशेषसमाम्नायपुराणोपनिषद्रस इति सर्वश्रुतिपुराणरहस्यतात्पर्य्यमित्यर्थः ॥ ४३ ॥ ब्रह्मदायादेति ॥ ब्रह्मैव दायमिवायत्तप्रा
१६१ प्यं ॥ अन्निसेवत इति ॥ तथा ब्रह्मपुत्रेति वा ॥ ४४ ॥ पूर्णः कृतकृत्यः ॥ श्रुतमर्थं मनसि धारयन् ॥ वीरव्रतो नैष्ठिकब्रह्मचारी ॥ ४५ ॥ न

श्रीभगवानुवाच ॥ इत्येतद्ब्रह्मणः पुत्रा आश्रुत्यात्मानुशासनं ॥ सनंदनमथानर्चुः सिद्धा ज्ञात्वात्मनोग
तिं ॥ ४२ इत्यशेषसमाम्नायपुराणोपनिषद्रसः ॥ समुद्धृतः पूर्वजातैर्व्योमयानैर्महात्मभिः ॥ ४३ त्वं चैतद्ब्र
ह्मदायाद श्रद्धयात्मानुशासनं ॥ धारयंश्चर गां कामं कामानां भर्जनं नृणां ॥ ४४ ॥ श्रीशुक उवाच ॥ एवं
स ऋषिणादिष्टं गृहीत्वा श्रद्धयात्मवान् ॥ पूर्णः श्रुतधरो राजन्नाह वीरव्रतो मुनिः ॥ ४५ ॥ नारद उवा
च ॥ नमस्तस्मै भगवते कृष्णायामलकीर्त्तये ॥ यो धत्ते सर्वभूतानामभवायोशतीः कलाः ॥ ४६ ॥ इत्या
द्यमृषिमानम्य तच्छिष्यांश्च महात्मनः ॥ ततोगादाश्रमं साक्षात्पितुर्द्वैपायनस्य मे ॥ ४७ ॥ स
भाजितो भगवता कृतासनपरिग्रहः ॥ तस्मै तद्वर्णयामास नारायणमुखाच्छ्रुतं ॥ ४८ ॥ इत्ये
तद्वर्णितं राजन् यन्नः प्रश्नः कृतस्त्वया ॥ यथा ब्रह्मण्यनिर्देश्ये निर्गुणेपि मनश्चरेत् ॥ ४९ ॥

मरतीति कृष्णावतारतया नारायणं नमस्यति ॥ उक्तं हि एते चांशकलाः पुंसः ॥ कृष्णस्तु भगवान्स्वयमिति ॥ ४६ ॥ सा
क्षात्पितुरिति ॥ योनिव्यवधानं विना जनकस्यत्वग्निमथनावसरे ॥ कथंचिदरण्यां रेतः पतितं समंथय व्यासः ॥ त

देव ततः उत्पन्नः शुक इति हि वदंति ॥ ४७ ॥ ४८ ॥ ४९ ॥

१६१

त्वद्वगामी न वेत्ति सुखदुःखेन च विधिनिषेधावित्युक्तं ॥ तत्र न तु कथमवगंतुं शक्यं दुरवगमस्योक्तत्वादित्येवमाशंक्य सत्य
मेवमनवगाह्यमहिम्नो वाङ्मनसागोचरत्वादविषयत्वेनैवज्ञानमिति दर्शयन् ॥ यदूर्ध्वं गार्गि दिवो यदर्वाक् पृथिव्या यदंतरा
द्यावापृथिवी इमे यद्भूतं भवच्च भविष्यच्चेत्यादिश्रुतिप्रतिपादितमपरिमितमहिमानमाह ॥ द्युपतय एवेति ॥ हे भगवन् ते अंतं ॥ द्यु
पतयः स्वर्गादिलोकपतयो ब्रह्मादयोपि न ययुः ॥ न प्रापुः तत्र कुतः यदंतवद्वस्तु तत्किमपि त्वं न भवसि अतस्ते द्युपतयो न ययुरि
ति यतो यस्मात्त्वमपि आत्मनोंतं न यासि ॥ कुतस्तर्हि सर्वज्ञता सर्वशक्तिता वा अंतस्याभावात् ॥ अनंततया ॥ अंतताभावेन न हि शशवि
षाणज्ञानं सार्वज्ञ्यं तत्प्राप्तिर्वा शक्तिविभवं विहंति ॥ अनंतत्वमेवाह यदंतरेति ॥ यस्य तव अंतरा मध्ये ननु अहो सावरणा

त

द्युपतय एव ते न ययुरंतमनंततया त्वमपि यदंतरांडनिचया ननु सावरणाः ॥ खइव रजांसि वांति वयसा सह
यच्छ्रुतयस्त्वयि हि फलंत्यतन्निरसनेन भवन्निधनाः ॥ २८ ॥ ४१ ॥

उत्तरोत्तरं दशगुणैः सप्तावरणैर्युक्ता अंडनिचया ब्रह्मांडसमूहा वांति परिभ्रमंति वयसा कालचक्रेण ॥ खे रजांसीव
सह एककदैव ॥ न तु पर्यायेण ॥ हि यस्मादेवं ॥ अतः श्रुतयः त्वयि फलंति ॥ तात्पर्येण त्वय्येव पर्यवस्यंति ॥ न तु साक्षादिदंतया
अयमेतावानिति सगुणस्य गुणानंत्यात् निर्गुणस्य वागगोचरत्वात् ॥ कथं तर्हि पदार्थे तात्पर्यमिति ॥ तत्र विधिमुखेन वाक्यस्य
येदं नियमः पदार्थस्यैव वाक्यार्थत्वमिति निषेधमुखेन तु नायं नियमः इत्याह ॥ अतन्निरसनेनेति ॥ अन्यदेव तद्विदितादथो
अविदितादधि अन्यत्र धर्मात् ॥ अन्यत्रास्मात्कृताकृतात् ॥ अस्थूलमनण्वित्यादिप्रकारेण लक्षणया च तत्त्वमसी
त्यादयः पर्यवस्यंति न च वाच्यं निषेधे शून्यमेवज्ञायत इति ॥ यतो भवन्निधना भवति त्वयि निधनं समाप्तिर्यासां ता ॥ तथा

भा० द० उ०
१६२

सर्वश्रुतिशिरोरत्ननीराजितपदांबुजं ॥ भोगयोगप्रदं वंदे माधवं कर्मिनम्रयोः ॥ १ ॥ इति श्री दशमे सप्ताशीतित
मः ॥ ८७ ॥ अष्टाशीतितमे विष्णुभक्तः कैवल्यमश्नुते ॥ ततो वा गदेवभक्तास्तु विभूतिमिति वर्ण्यते ॥ १ ॥ हरिर्भजतां
मुक्तिद इत्युक्तं ॥ अथ यं ध्यायेदजस्रमिति ॥ तत्र शंकते ॥ देवासुरेष्विति ॥ अशिवं ॥ अवधारितभोगा ॥ भोजा भोगिनः

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां दशमस्कंधे नारायणनारदसंवा
दे सप्ताशीतितमोऽध्यायः ॥ ८७ ॥ राजोवाच ॥ देवासुरमनुष्येषु ये भजंत्यशिवं शिवं ॥ प्रायस्ते धनि
नो भोजा न तु लक्ष्म्याः पतिं हरिं ॥ १ ॥ एतद्वेदितुमिच्छामः संदेहोऽत्र महान् हि नः ॥ विरुद्धशीलयोः प्र
भ्वोर्विरुद्धा भजतां गतिः ॥ २ ॥ श्रीशुक उवाच ॥ शिवः शक्तियुतः शश्वत्त्रिलिंगो गुणसंवृतः ॥ वैका
रिकस्तैजसश्च तामसश्चेत्यहं त्रिधा ॥ ३ ॥ ततो विकारा अभवन् षोडशामीषु कंचन ॥ उपधावन् विभू
तीनां सर्वासामश्नुते गतिम् ॥ ४ ॥

लक्ष्म्याः पतिं ॥ सर्वभोगयुक्तं ॥ १ ॥ २ ॥ अन्योन्योपमर्दनं तमसत्वविद्या त्रिलिंगः ॥ त्रिलिंगत्वमाह ॥ वैकारिक इति ॥ अहं अहं
कारः ॥ ३ ॥ विकाराः मन इंद्रियभूततन्मात्राः ॥ षोडशेति ॥ इंद्रियदेवानामभेदविवक्षया केचनेति ॥ यत्किंचिद्विकारोपाधि
कं भजन् ॥ उपाधिमनुरूपाणां विभूतीनां स्वरूपं प्राप्नोतीति ॥ ४ ॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ऽऽ ॥ ५ ऽऽ ॥ ॥ ऽऽ १६२

ॐ २

समस्तवेदस्तुत्यर्थसंग्रहानुस्मारयति ॥ यस्योत्प्रेक्षक इति ॥ अस्याविश्वस्योत्प्रेक्षक एवमिदमनुशयिनां समस्तपुरुषार्थसि
द्धये सृष्टिस्थितिप्रलयादि प्रापणीयमित्यालोचक इत्यर्थः ॥ अनेन निमित्तत्वमुक्तं ॥ एवमालोच्यास्यादिमध्यनिधनेष्वादि
जन्ममध्यं पालनं निधनं चांतः ॥ एतेषु कर्मसु यो वर्त्तते ॥ अनेनोपादानत्वमुक्तं ॥ ननु प्रकृतिपुरुषयोरुपादाननिमित्तत्वे प्रसि
द्धे सत्यं तयोरपि तत्त एवोद्भूतत्वान्मूलकारणं स एवेत्याह ॥ यो व्यक्तं जीवेश्वर इति प्रवेशनियमने दर्शयति ॥ एवोक्तं य
कारेणेदं सृष्ट्वा यदर्थमेतत्सृष्टं तेन ऋषिणा सह ॥ कार्यं ब्रह्मेति दर्शनादृषिर्जीवः तेन सहानुप्रविष्टः ॥ पुरः श
रीराणि तस्य भोगायतनानि चक्रे ताः पुरः शास्ति तस्य भोगं ददत् ॥ परिपालयति ॥ उपासकस्य च कैवल्यरूपो भवतीत्याह ॥ यं संपद्येति यं

योऽस्योत्प्रेक्षक आदिमध्यनिधने योऽव्यक्तजीवेश्वरो यः सृष्ट्वेदमनुप्रविश्य ऋषिणा चक्रे पुरः शास्ति ताः ॥
यं संपद्य जहात्यजामनुशयी सुप्तः कुलायं यथा तं कैवल्यनिरस्तयोनिमभयं ध्यायेदजस्रं हरिम् ॥ ५० ॥

पश्यति ॥ एव

संप्रपद्य प्राप्यानुशयी ॥ अन्वनुदंडवत्प्रणमैश्वर्याणां मूले शेते इति तथा ॥ स जीवः अजां कार्य्यकारणलक्षणां मा
यां विद्यांत्यजति ॥ ननु ब्रह्मसंपन्नस्यापि जीवस्य तत्त्वेवं धोह दृश्यते ॥ अत आह ॥ सुप्तः कुलायं यथेति ॥ अयं भावः ॥ य
था सुप्तः शरीरं त्वं न मन्ये पश्यंति ॥ स तु नात्मानं तथा पश्यति ॥ एवं जीवन्मुक्तोऽप्यन्ये देहवंतं पश्यंति ॥ स तु न किं
चित्पश्यतीति तं हरिं अजस्रं ॥ अनवरतं ध्यायेत् ॥ किमिति ॥ अत आह अभयं न भयं यस्मात् भयनिवर्तक इत्यर्थः
कुतस्तत्र कैवल्यनिरस्तयोनिं ॥ कैवल्येन ॥ अप्रच्युतस्वरूपावस्थानेन निरस्ता तिरस्कृता योनिर्मूलकारणं माया येन

यस्याहमनुगृह्णामीति ॥ अयमर्थः ॥ योविषयान् परिजिहीर्षुरपि कथंचिद्ध्रियमानेसक्ततेक्लिश्यतिच ॥ तस्याविष
यापहारएवानुग्रहइतियथाश्रुतत्वेध्रुवादीनामैश्वर्यविरोधात् ॥ अथवाप्रसं ॥ भक्तेः कामनानुरूपाद त्त्वाशनैर्वि
षयाभोगावसानेतस्यनिर्वेदमुत्पाद्यहरिष्यामिपरमानुग्रहंकर्तुमिति ॥ तदुक्तंभगवतैव ॥ मय्यावेश्यमतिधियांको

श्रीभगवानुवाच ॥ यस्याहमनुगृह्णामिहरिष्येतद्धनंशनैः ॥ ततोऽधनंत्यजंत्यस्यस्वजनाः दुःखदुः
खितं ॥ ८ ॥ सयदावितथोद्योगोनिर्विण्णःस्याद्धनेहया ॥ मत्परैःकृतमैत्रस्यकरिष्येमदनुग्रहं ॥ ९ ॥ तद्ब्र
ह्मपरमंसूक्ष्मंचिन्मात्रंसदनंतकं ॥ अतोमांसुदुराराध्यंहित्वान्यान्भजतेजनः ॥ १० ॥ ततस्तआशुतो
षेभ्योलब्धराज्यश्रियोद्धताः ॥ मत्ताःप्रमत्तावरदान्विस्मरंत्यवजानते ॥ ११ ॥ ऋषिरुवाच ॥ शा
पप्रसादयोरीशाब्रह्मविष्णुशिवादयः ॥ सद्यःशापप्रसादोंऽगशिवोब्रह्मानचाच्युतः ॥ १२ ॥

मंकामायकल्पतइति ॥ दुःखदुःखितमिति ॥ दुःखादनुपुनर्दुःखितमिवप्रतीयमानमित्यर्थः ॥ ८ ॥ सपुनर्वधना
माग्रहेणधनेहयाप्रवृत्तोऽपिमदनुग्रहेणयदानिष्फलोद्यमः ॥ निर्विण्णःस्यात्तदामदनुग्रहमिति ॥ ममासाधार
णमनुग्रहं ॥ ९ ॥ तमेवाह ॥ तद्ब्रह्मेति ॥ अतःपश्चादपिन्यत्तमरोचयत ॥ अन्यासक्तोजनइत्यर्थः ॥ १० ॥ ११ ॥ एतद्देवे
ति ॥ हासेनस्पष्टयितुं ॥ शापप्रसादयोरिति ॥ ब्रह्माचेत्यन्वयः ॥ १२ ॥ ॥

उपद्रष्टा साक्षी सन् ॥ यतः सर्वदृक् सर्वं पश्यति ॥ अतः प्रकृतेः पर इति ॥ अत्रेदं तत्त्वं वस्तुनो गुणसंबंधे रूपद्वय
मिहेष्यते ॥ तद्धर्म्मयोगायोगाभ्यां विंबवत्प्रतिविंबवत् ॥ गुणाः सत्वादयः शांतघोरमूढाः स्वभावतः ॥ विष्णुब्रह्मशिवा
नां च गुणयंत्रस्वरूपिणां नातिभेदो भवेद्देषु गुणधर्मैरिहांशतः ॥ सत्वस्य शांत्या नो जातु विष्णोर्विकृतिरीक्ष्यते रजस्त त४
मोगुणाभ्यां तु भवेतां ब्रह्मरुद्रयोः ॥ गुणोपमर्द्दतो भूयस्तदंशानां च भिन्नता ॥ अतः सम्यक् सत्वस्य विष्णोर्मोक्षकरी मतिः ॥

हरिर्हि निर्गुणः साक्षात्पुरुषः प्रकृतेः परः ॥ स सर्वदृगुपद्रष्टा तं भजन्निर्गुणो भवेत् ॥ ५ ॥
निवृत्तेष्वश्वमेधेषु राजा युष्मत्पितामहः ॥ शृण्वन्भगवतो धर्म्मानपृच्छदिदमच्युतं ॥ ६ ॥
स आह भगवांस्तस्मै प्रीतः शुश्रूषवे प्रभुः ॥ नृणां निःश्रेयसार्थाय योवतीर्णो यदोः कुले ॥ ७ ॥

अंशतो भक्तिहेतुश्च तथानंदमपीश्वरः ॥ अंशतस्तारतम्येन ब्रह्मरुद्रादिसेविनां विभक्तयो भवंत्येवं शनैर्मोक्षो
प्यनंशतः ॥ इदमेवाभिप्रेत्यात्रोच्यते श्रेयांसि तत्र खलु सत्वतनोर्नृणां स्युरिति ॥ तथा ॥ सत्त्वं यस्य प्रिया मूर्त्ति
रिति ॥ तथा सत्वं तत्त्रार्थसाधनमिति ॥ तथात्रयाणामेकभावानां यो न पश्यति वै भिदामिति ॥ तथा ॥ न ते मय्य
च्युतेऽजे च भिदामण्वपि चक्षते इत्यादि ॥ एवं च सति न किंचिदसमंजसं ॥ तत्तद्भक्तानां तु मोहमात्रमिति ॥ ५ ॥ ६ ॥ ७ ॥

भा० द० उ० २१ दातुमनर्हमपि दत्तवान् ॥ स पार्वतीरमिव ॥ २२ ॥ २३ उपसृष्टः अनुगतः ॥ उदगात् अन्वधावत् ॥ उदक् उत्तरतः ॥ २४ ॥
१६४ वैकुंठं श्वेतद्वीपं ॥ २५ ॥ २६ ॥ तं वृकासुरं तथा व्यसनं ताहग्व्यसनं प्रयस्यत ॥ वृजिनार्दनः ॥ दुःखं च हंता ॥ दूरत एव दृष्ट्वा
देवं सवृकेणा पापीयान् वरं भूतभयावहं ॥ यस्य यस्य करं शीर्ष्णि धास्ये स म्रियतामिति ॥ २१ ॥ त
च्छ्रुत्वा भगवान् रुद्रो दुर्मना इव भारत ॥ ॐ मिति प्रहसंस्तस्मै ददेऽहेरमृतं यथा ॥ २२ ॥ इत्यु
५३ क्तः सोऽसुरो नूनं गौरीहरणलालसः ॥ स तद्वरपरीक्षार्थं शंभोर्मूर्ध्नि किलासुरः ॥ स्वहस्तं धातुमा
रेभे सोऽबिभ्यत्स्वकृताच्छिवः ॥ २३ ॥ तेनोपसृष्टः संत्रस्तः पराधावन् सवेपथुः ॥ यावदंतं दिवो
भूमेः काष्ठानामुदगादुदक् ॥ २४ ॥ अजानंतः प्रतिविधिं तूष्णीमासन् सुरेश्वराः ॥ ततो वैकुंठम
गमद्भास्वरं तमसः परं ॥ २५ ॥ यत्र नारायणः साक्षान्न्यासिनां परमा गतिः ॥ शांतानां न्यस्तदंडा
नां यतो नावर्तते गतः ॥ २६ ॥ तं तथा व्यसनं दृष्ट्वा भगवान् वृजिनार्दनः ॥ दूरात्प्रत्युदियाद्भूत्वा
बटुको योगमायया ॥ २७ ॥ मेखलाजिनदंडाक्षैस्तेजसाग्निरिव ज्वलन् ॥ अभिवादयामास च
तं कुशपाणिर्विनीतवत् ॥ २८ ॥ श्रीभगवानुवाच ॥ शाकुनेय भवान्व्यक्तं श्रांतः किं दूरमागतः ॥ क्ष
णं विश्रम्यतां पुंस आत्मायं सर्वकामधुक् ॥ २९ ॥
२७ ॥ मेखलादिभिरुपलक्षितः ॥ प्रत्युदियात् ॥ सन्मुखमागतः ॥ २८ ॥ व्यक्तं निश्चितं ॥ किमर्थं आत्मा देहः ॥ सर्वपुरुषा १६४

१३ ॥ शकुनेः पुत्रः ॥ १४ ॥ १५ ॥ सुसंकरमाप ॥ कैलासशोत्पाटनं पुरपालनंच ॥ १६ ॥ स्वगात्रतः ॥ उपाधावत ॥ कथं आत्मक्रव्येणस्वमां
सेन जुह्वान इति ॥ १७ ॥ अत्रस्वारः ॥ छेत्तुमुद्यतः ॥ १८ ॥ महांस्तिमान निरिव ॥ देदीप्यमानः ॥ वयं अघुनोतनाय यथाकथंचिद्धुः ॥

अत्रैवोदाहरंतीममितिहासं पुरातनं ॥ रकासुराय गिरिशो वरं दत्त्वाप संकटं ॥ १३ ॥ वृको नामासुरः पु
त्रः शकुनेः पथि नारदं ॥ दृष्ट्वाशुतोषं पप्रच्छ देवेषु त्रिषु दुर्मतिः ॥ १४ ॥ स आह देवं गिरिशमुपाधावाशु
सिद्धसि ॥ योल्पाभ्यां गुणदोषाभ्यामाशु तुष्यति कुप्यति ॥ १५ ॥ दशास्यबाणयोस्तुष्टः स्तुवतोर्वंदिनोरिव
ऐश्वर्यमतुलं दत्त्वा ततस्राप ससंकटं ॥ १६ ॥ इत्यादिष्टस्तमसुर उपाधावत्स्वगात्रतः ॥ केदार आत्मक्रव्ये
ण जुह्वानोग्निमुखं हरं ॥ १७ ॥ देवोपलब्धिमप्राप्य निर्वेदात्सप्तमेहनि ॥ शिरोऽवृश्चत्सुधितिना त
त्तीर्थक्लिन्नमूर्धजं ॥ १८ ॥ तदा महाकारुणिकः स धूर्जटिर्यथा वयं चाग्निरिवोत्थितोऽनलात् ॥ निगृह्य
दोर्भ्यां भुजयोर्न्यवारयत्तत्स्पर्शनाद्भूय उपस्कृताकृतिः ॥ १९ ॥ तमाह चांगालमलं वृणीष्व मे यथा
भिकामं वितरामि ते वरं ॥ प्रीयेय तोयेन नृणां प्रपद्यतामहं त्वयात्मा भृशमर्द्यते वृथा ॥ २० ॥
सेन कर्तुकामं वारयामास ॥ तद्वदिति ॥ स च उपस्कृताकृतिः ॥ परिपूर्णदेहो भवत् ॥ १९ ॥ न्यवारयत् ॥ एवमाह च ॥ यतो
येनापि भजतां प्रीतः स्यां त्वया तु देहो रथापीड्यत इति ॥ २० ॥

भा॰द॰टी॰ अव्याकृतशक्त्युदन्वतः॥ वाङ्मनसोगोचरशक्तिसमुद्रस्य गिरित्रमोक्षं शिवमोचनं रूपं चरित्रं॥ संसृतिभिर्नानारूपसंसारैः

१६५ ४०॥ इति दशमे टीकायामष्टाशीतितमः॥ ८८॥ नवाशीतितमे देवेषु को महानिति संशये॥ परीक्ष्य विष्णोरुत्कर्षं मुनिभ्यो भृगुरैरयत्॥

यएवमव्याकृतशक्त्युदन्वतः परस्यसाक्षात्परमात्मनोहरेः गिरित्रमोक्षंकथयेच्छृणोतिवा विमु
च्यतेसंसृतिभिस्तथारिभिः॥ ४०॥ इतिश्रीमद्भागवते महापुराणे दशमस्कंधे रुद्रमोक्षोनामाष्टाशीति
तमोध्यायः॥ ८८॥ श्रीशुकउवाच॥ सरस्वत्यास्तटेराजन्नृषयःसत्रमासत॥ वितर्कःसमभूत्तेषां
त्रिष्वधीशेषुकोमहान्॥ १॥ तस्यजिज्ञासयातेवैभृगुंब्रह्मसुतं नृप॥ तज्ज्ञप्त्यैप्रेषयामासुःसो
ऽभ्यगाद्ब्रह्मणःसभाम्॥ २॥ नतस्मैप्रह्वणंस्तोत्रंचक्रेसत्वपरीक्षया॥ तस्मैचुक्रोधभगवान्प्रज्वल
न्स्वेनतेजसा॥ ३॥ सआत्मन्युत्थितंमन्युमात्मजायात्मनाप्रभुः॥ अशीशमद्यथावह्निंस्वयोन्यावारि
णात्मभूः॥ ४॥ ततःकैलासमगमत्सतंदेवोमहेश्वरः॥ परिरब्धुंसमारेभउत्थायभ्रातरंमुदा॥ ५॥
नैच्छत्त्वमस्युत्पथगइतिदेवश्चुकोपह॥ शूलमुद्यम्यतंहन्तुमारेभेतिग्मलोचनः॥ ६॥

१ इतिहासान्तरमाह सरस्वत्या इति॥ १॥ २॥ ३॥ स्वयोन्या स्वस्यैव रूपान्तरेणाभिव्यक्तिस्थानेन स्वकार्येणे
त्यर्थः॥ तेन यथा कश्चिद् ह्रियमाणं शमयति॥ तथा स्वकार्येण पुत्रेण क्रोधं शमयामासेत्यर्थः॥ ४॥ ५॥ ६॥ ॥ ऽऽ १६५

प्रायशः पुंभिः धृतैर्भवान्स्वार्थान्समीहते साधयितुमिच्छति ॥ अथवा जनः पुंभिः सहायैः स्वकार्याणि साधयति ॥ अ
तोऽन कथ्यतामिति ॥ ३० ॥ ३१ ॥ पैशाच्यं पिशाचानामिव वृत्तिं ॥ ३३ ॥ यत्तु यथा वक्ता वदिष्यति ॥ ३४ ॥ चित्रैः भ्रामकैः सुपेश

यदि नः श्रवणायालं युष्मद्व्यवसितं प्रभो ॥ भण्यतां प्रायशः पुंभिर्धृतैः स्वार्थान्समीहते ॥ ३० ॥ श्रीशु
क उवाच ॥ एवं भगवता पृष्टो वचसामृतवर्षिणा ॥ गतक्लमोऽब्रवीत्तस्मै यथापूर्वमनुष्ठितं ॥ ३१ ॥ श्रीभगवा
नुवाच ॥ एवं चेत्तर्हि तद्वाक्यं न वयं श्रद्दधीमहि ॥ यो दक्षशापात्पैशाच्यं प्राप्तः प्रेतपिशाचराट् ॥ ३२ ॥ यदि
स्व४ वस्तत्र विश्रंभो दानवेंद्र जगद्गुरौ ॥ तर्ह्यंगाशु स्वशिरसि हस्तं न्यस्य प्रतीयतां ॥ ३३ ॥ यद्यसत्यं वचः शंभोः
कथंचिद्दानवर्षभ ॥ तदैनं जह्यसद्वाचं न यद्वक्तानृतं पुनः ॥ ३४ ॥ इत्थं भगवतश्चित्रैर्वचोभिः स
शीर्ष्णि ६ सुपेशलैः ॥ भिन्नधीर्विस्मितः स्वहस्तं कुमतिर्न्यधात ॥ ३५ ॥ अथा पतद्भिन्नशिरा वज्राहत इव क्ष
णात् ॥ जयशब्दो नमःशब्दः साधुशब्दोऽभवद्दिवि ॥ ३६ ॥ मुमुचुः पुष्पवर्षाणि हते पापे वृकासुरे ॥ देवर्षि
टी२ पितृगंधर्वा मोचितः संकटाच्छिवः ॥ ३७ ॥ मुक्तं गिरिशमभ्याह भगवान्पुरुषोत्तमः ॥ अहो देव महादेव पा
पोऽयं स्वेन पाप्मना ॥ ३८ ॥ हतः को नु महत्स्वीश जंतुर्वै कृतकिल्बिषः ॥ क्षेमी स्यात्किमु विश्वेशे कृतागस्को जग
द्गुरौ ॥ ३९ ॥

लैः अतिरम्यैः भिन्नधीः भ्रंशितमतिः ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ किमु वक्तव्यं ॥ विश्वेशे त्वयि कृतागाः कृतापराध इति ॥ ३९ ॥

भा०द० द्विस्मिताश्च परार्धातिरेकेपि निर्विकारित्वेन भूयांसं श्रद्दधुः॥ महत्त्वं निश्चितवंतः॥ १५॥ यतः यस्मिन्वैराग्यं च चतु
१६६ र्विधमिति पाठे तच्चातुर्विध्यमेवं द्रष्टव्यं॥ विषयांस्त्यक्तुमशक्नुवतोपि समानेच्छात्यागो नामाद्यं वैराग्यं॥ ततो विषया
णां मध्ये लवणादिव्यतिरेकेणापि रक्तिर्द्वितीयं॥ तथावृत्तावपि मनसि रागशैथिल्येन वाह्येन्द्रियैरेव विषयसे

तन्निशम्याथ मुनयो विस्मिताश्छिन्नसंशयाः॥ भूयांसं श्रद्दधुः कं सं यतः शांतिर्यतोऽभयं
तं२ १५॥ धर्मः साक्षाद्यतो ज्ञानं वैराग्यं च तदन्वितं॥ ऐश्वर्यं चाष्टधा यस्माद्यशश्चात्ममलापहं॥ १६
मुनीनां न्यस्तदंडानां शांतानां समचेतसां॥ अकिंचनानां साधूनां यमाहुः परमां गतिं॥ १७॥
सत्त्वं यस्य प्रिया मूर्तिर्ब्राह्मणास्त्विष्टदेवताः॥ भजंत्यनाशिषः शांता यं वा निपुणबुद्धयः॥ १८॥
त्रिविधाकृतयस्तस्य राक्षसा असुराः सुराः॥ गुणिन्या मायया सृष्टाः सत्त्वं तत्तीर्थसाधनं॥ १९॥

वनं तत्तृतीयं॥ तत्राप्यौदासीन्यं च तुर्यं॥ यथाहुः॥ वैराग्यमाद्यं यतमानसंज्ञं कश्चिद्धि रागो व्यतिरेकसंज्ञः॥
एकेंद्रियाख्यं हृदि रागसौक्ष्म्यं तस्याप्यभावस्तु वशीकृताख्यमिति॥ १६॥ १७॥ तस्य भगवतस्त्रय यद्यपि त्रि
विधा आकृतयस्तत्॥ तासु सत्त्वमेव तीर्थसाधनं पुरुषार्थहेतुः॥ १८॥ इत्थं निश्चित्य सरस्वतीतीरवासिनो विप्रा हरिसेवया मुक्तिं प्रापुरिति॥ १९॥

१६६

७॥८॥९॥१०॥तीर्थीकारिण्या॥तीर्थत्वनिमित्तेन॥११॥१२॥तस्य मंद्रया गंभीरया गिरा निर्दिष्टः॥तस्मीवभ्रदेति

पतित्वा पादयोर्देवी सांत्वयामास तं गिरा॥अथो जगाम वैकुंठं यत्र देवो जना
र्दनः॥शयानं श्रिय उत्संगे पदा वक्षस्यताडयत्॥७॥ततउत्थाय भगवान्सह लक्ष्म्या स
तां गतिः॥स्वतल्पादवरुह्याथ ननाम शिरसा मुनिं॥८॥आह ते स्वागतं ब्रह्मन्निषीदात्रासने
क्षणं॥अजानतामागतान्वः क्षंतुमर्हथ नः प्रभो॥९॥अतीवकोमलौ तात चरणौ ते महामुने॥
इत्युक्त्वा विप्रचरणौ मर्दयन्स्वेन पाणिना॥१०॥पुनीहि सह लोकं मां लोकपालांश्च मद्गतान्॥
पादोदकेन भगवंस्तीर्थानां तीर्थकारिणा॥११॥अद्याहं भगवँल्लक्ष्म्या आसमेकांतभाजनं॥
वत्स्यत्युरसि मे भूतिर्भवत्पादहतांहसः॥१२॥श्रीशुक उवाच॥एवं ब्रुवति वैकुंठे भृगुस्तन्मं
द्रया गिरा॥निर्वृतस्तर्पितस्तूष्णीं भक्त्युत्कंठोश्रुलोचनः॥१३॥पुनः स्वसत्रमाक्रम्य मुनीनां
ब्रह्मवादिनां॥स्वानुभूतमशेषेण राजन्भृगुरवर्णयत्॥१४॥

शेषः॥१३॥१४॥हरये परमात्मने नमो नमः॥रामाय नमो नमः॥रामगोविंद दामोदर वासुदेवेति नमो नमः

ब्रह्मन्किंस्विदिति॥ किमर्थं वृथा रोदिषि॥ यतस्त्वन्निवासे धनुर्धरमात्रो राजन्यबंधुरपि नास्ति॥ ब्रह्मण एष स्यात्तु का वार्ता
एते तु सत्रे यागे स्वब्राह्मणमिलिता भवितुमर्हंतीत्यर्थः॥ २६॥ तदेवाह धन दारात्मजापृक्ता इति धनादिभिर्वियुक्ताः

किंस्विद्ब्रह्मंस्त्वन्निवासे इह नास्ति धनुर्धरः॥ राजन्यबंधुरेते वै ब्राह्मणाः सत्रमासते॥ २६॥ धनदा
रात्मजापृक्ता यत्र शोचंति ब्राह्मणाः॥ ते वै राजन्यवेषेण नटा जीवंत्यसुंभराः॥ २७॥ अहं प्रजा वां भग
वन्रक्षिष्ये दीनयोरिह॥ अनिस्तीर्णप्रतिज्ञोऽग्निं प्रवेक्ष्ये हतकल्मषः॥ २८॥ ब्राह्मण उवाच॥ सं
कर्षणो वासुदेवः प्रद्युम्नो धन्विनां वरः॥ अनिरुद्धोऽप्रतिरथो न त्रातुं शक्नुवंति यत्॥ २९॥ तत्कथं नु भ
वान्कर्म दुष्करं जगदीश्वरैः॥ चिकीर्षसि त्वं बालिश्यात्तन्न श्रद्दध्महे वयं॥ ३०॥ अर्जुन उवाच॥ नाहं सं
कर्षणो ब्रह्मन्न कृष्णः कार्ष्णिरेव च॥ अहं वा अर्जुनो नाम गांडीवं यस्य वै धनुः॥ ३१॥ मावमंस्था मम
ब्रह्मन्वीर्यं त्र्यंबकतोषणं॥ मृत्युं विजित्य प्रधने आनिष्ये ते प्रजाः प्रभो॥ ३२॥ एवं विश्रंभितो विप्रः फा
ल्गुनेन परंतप॥ जगाम स्वगृहं प्रीतः पार्थवीर्यं निशामयन्॥ ३३॥

यत्र येषु जीवत्सु शोचंति ते जीवंति॥ केवलं जीविकां संपादयंति॥ २८॥ हतकल्मष इति॥ अग्निप्रवेशे न ब्राह्मणवित्तापहा
रणपातकात्मुक्तो भवेयमित्यर्थः॥ अहतकल्मषश्चेदिति वा॥ ३०॥ ३१॥ न श्रद्दध्महे न संप्रतीमः॥ ३२॥ ३३॥ ३४॥ एवं प्रोदि

२०॥ व्यासनंदनस्यमुखपंकजाहृतगंधयुक्तंपीयूषतुल्यंहरेः प्रशस्तयशोयःसंसारीसेवतेसमुक्तोभवतीति॥२१॥
सचोक्तलक्षणोभगवान्कृष्णएवेतिदर्शयितुमाख्यानांतरमाह॥एकदेति॥२२॥२३॥ब्रह्मद्विषइत्यादिकंतंगाः

श्रीशुकउवाच॥ एवंसारस्वताविप्रानृणांसंशयनुत्तये॥पुरुषस्यपदांभोजसेवयातद्गतिंगताः॥२०॥
सूतउवाच॥ इत्येतन्मुनितनयास्यपद्मगंधपीयूषंभवभयभित्परस्यपुंसः॥सुश्लोकंश्रवणपुटैःपि
बत्यभीक्ष्णंपांथोध्वभ्रमणपरिश्रमंजहाति॥२१॥श्रीशुकउवाच॥एकदाद्वारवत्यांतुविप्रपत्न्याः
कुमारकः॥जातमात्रोभुवंस्पृष्ट्वाममारकिलभारत॥२२॥विप्रोगृहीत्वामृतकंराजद्वार्युपधायसः॥
इदंप्रोवाचविलपन्नातुरोदीनमानसः॥२३॥ब्रह्मद्विषःशठधियोलुब्धस्यविषयात्मनः॥क्षत्रबंधोः
कर्मदोषात्पंचत्वंमेगतोर्भकः॥२४॥हिंसाविहारंनृपतिंदुःशीलमजितेंद्रियं॥प्रजाभजंत्यःसीदं
तिदरिद्रानित्यदुःखिताः॥२५॥एवंद्वितीयंविप्रर्षिस्तृतीयंत्वेवमेवच॥विसृज्यसनृपद्वारितांगाथांस
मगायत॥२६॥तामर्जुनउपश्रुत्यकर्हिचित्केशवांतिके॥परेतेनवमेबालेब्राह्मणंसमभाषत
॥२७॥

याचकां॥मयिनकश्चिद्दोषः॥अतोराजदोषेणैवमत्पुत्राम्रियंत इतिवारंवारंचुक्रोशेत्यर्थः॥२४॥२५॥२६॥२७॥

भा०द०उ
१६८

येनिंदंति एवं मनुष्याअन्मः कीर्तिं स्थापयिष्यंति । निश्चलां करिष्यंति । पारगतं तरेतुं छंदोभंगभयात् दुर्गतं तु कमिति ॥ ४७ ॥ सप्त
सप्तसप्तगिरियो युगुहीपेषु तान् ॥ ४८ ॥ ४९ ॥ ५० ॥ कृतमिति प्रकृतिपरिणामरूपं नालोकाभावमात्रं ॥ ५१ ॥ चक्रानुपथेन

एतेनेकीर्तिं विमलां मनुष्याः स्थापयिष्यंति ॥ इति संभाष्य भगवानर्जुनेन सहेश्वरः ॥ दिव्यं स्वरथमा
स्थाय प्रतीचीं दिशमाविशत् ॥ ४७ ॥ सप्तद्वीपान्सप्तसिंधून्सप्तसप्तगिरीनथ ॥ लोकालोकं तथातीत्य
विवेश सुमहत्तमः ॥ ४८ ॥ तत्राश्वाः शैब्यसुग्रीवमेघपुष्पबलाहकाः ॥ तमसि भ्रष्टगतयो बभूवुर्भ
रतर्षभ ॥ ४९ ॥ तान्दृष्ट्वा भगवान्कृष्णो महायोगेश्वरेश्वरः ॥ सहस्रादित्यसंकाशं स्वचक्रं प्राहिणो
त्पुरः ॥ ५० ॥ तमः सुघोरं गहनं कृतं महद्विदारयद्भूरितरेण तेजसा ॥ मनोजवं निर्विविशे सुदर्शनं गु
णच्युतो रामशरो यथा चमूः ॥ ५१ ॥ द्वारेण चक्रानुपथेन तत्तमः परं परं ज्योतिरनंतपारं ॥ समश्नुवा
नं प्रसमीक्ष्य फाल्गुनः ॥ प्रताडिताक्षोपिदधेक्षिणी उभे ॥ ५२ ॥ ततः प्रविष्टः सलिलं नभस्वता बलीय
सैजद्बृहदूर्मिभूषणं ॥ तत्राद्भुतं वै भवनं द्युमत्तमं भ्राजन्मणिस्तंभसहस्रशोभितं ॥ ५३ ॥

चक्रमनुगतेन द्वारेण तत्तमः । परस्मात्तमसः परं दूरे वर्त्तमानं परं श्रेष्ठं । भागवतं । ज्योतिः समश्नुवानं व्याप्नुवत् प्र
समीक्ष्य प्रताडिताक्षो नेत्रे न्यमीलयदिति ॥ ५२ ॥ एजंतः उच्चैश्चलंतः । बृहंतः महांतः ऊर्मयो भूषणं यस्य तत् ॥ तत्र सलिले

[illegible]

५१४

इदं ब्राह्मणोपेक्षकत्वेन कृष्णावज्ञया महेश्वरं नमस्कृत्य ॥३४॥ न्यरुणत् आरतवान् तदेवाह तिर्य्यगूर्द्ध्वमिति ॥३५॥ अद
प्रसूतिकाल आसन्ने भार्याया द्विजसत्तमः पाहि पाहि प्रजां मृत्योरित्याहार्ज्जुनमातुरः ॥३६॥ स उपस्पृ
श्य शुच्यम्भो नमस्कृत्य महेश्वरं ॥ दिव्यान्यस्त्राणि चसंस्मृत्य सज्यं गाण्डीवमाददे ॥३७॥ न्यरुणत्सू
तिकागारं शरैर्नानास्त्रयोजितैः तिर्य्यगूर्द्ध्वमधः पार्थश्चकार शरपञ्जरं ॥३८॥ ततः कुमारः संजातो
विप्रपत्न्या रुदन्मुहुः ॥ सद्योऽदर्शनमापेदे सशरीरो विहायसा ॥३९॥ तदाह विप्रो विजयं विनिन्दन्कृ
ष्णसन्निधौ ॥ मौढ्यं पश्यत मे योहं श्रद्दधे क्लीवकत्थनं ॥४०॥ न प्रद्युम्नो नानिरुद्धो न रामो न च के
शवः ॥ यस्य शेकुः परित्रातुं कोन्यस्तदवितेश्वरः ॥४१॥ धिगर्ज्जुनं मृषावादं धिगात्मश्लाघिनो ध
नुः ॥ दैवोपसृष्टं यो मौढ्यादानिनीषति दुर्मतिः ॥४२॥ एवं शपति विप्रर्षौ विद्यामास्थाय फाल्गुनः
ययौ संयमनीमाशु यत्रास्ते भगवान्यमः ॥४३॥ विप्रापत्यमचक्षाणस्तत ऐन्द्रीमगात्पुरीं ॥ आग्नेयीं
नैरृतीं सौम्यां वायव्यां वारुणीमथ ॥४४॥ रसातलं नाकपृष्ठं धिष्ण्यान्यन्यान्युदायुधः ॥ ततोऽलब्धद्विज
सुतो ह्यनिस्तीर्णप्रतिश्रुतः ॥४५॥ अग्निं विविक्षुः कृष्णेन प्रत्युक्तः प्रतिषेधता ॥ दर्शये द्विजसूनूंस्ते मावं

शनमापेदे देहेनापि नावशिष्ट इत्यर्थः ॥३९॥४०॥ यस्य प्रजाः तत्र तत्र ॥५१॥५२॥५३॥५४॥५५॥ इत्युक्तः वारितः उपपत्तिभिः प्र
तिषेधं कुर्वता सावज्ञमावजानीहि ॥५६॥

भा०द०उ० मे कलावतीश्रोविवितिसंवोधनं शीघ्रंमे निसकाशं॥ इतं आगच्छतं ॥५९॥ आचरंतं इदं तु भारत्त युद्धात्पूर्वमेव कृतमपि
६६९
हि ज्ञात्मजामे युवयोर्दिदृक्षुणा मयापनीता भुवि धर्मगुप्तये॥ कलावतीर्णाववनेर्भरासुरान्हृ
त्वेह भूयस्त्वरयेतमंतिमे॥५९॥ एवंकामावपियुवां नरनारायणावृषी॥ धर्ममाचरतां स्थित्यै
ऋषभौ लोकसंग्रहं॥६०॥ इत्यादिष्टौ भगवता तौ कृष्णौ परमेष्ठिनां॥ ओमित्यानम्य भूमान
मादाय द्विजदारकौन॥६१॥ न्यवर्ततां स्वकं धाम संप्रहृष्टौ यथागतं॥ विप्राय ददतुः पुत्रान्य
था रूपं यथा वयः॥६२॥ निशम्य वैष्णवं धाम पार्थः परमविस्मितः॥ यत्किंचित्पौरुषं पुंसां मेने
कृष्णानुकंपितं॥६३॥ इतीदृशान्यनेकानि वीर्याणीह प्रदर्शयन॥ वुभुजे विषयान्ग्राम्या
नीजे चात्युर्जितैर्मखैः॥६४॥ प्रववर्षाखिलान्कामान्प्रजासु ब्राह्मणादिषु॥ यथाकालं य
थैवेंद्रो भगवान्श्रैष्ठ्यमास्थितः॥६५॥ हत्वान्नृपानधर्मिष्ठान घातयित्वार्जुनादिभिः॥
अंजसावर्तयामास धर्मं धर्मसुतादिभिः॥६६॥
श्लोकप्रथमप्रस्तावेत॥ अत्रोक्तम॥६०॥६१॥६२॥६३॥६४॥६५॥६६॥ रामरामरामरामरामराम॥ ६६९

सहस्रंमूर्द्धिभवाःफणास्तासुमणयस्तेषांद्युतिभिः॥ द्विसहस्रनेत्रैरूर्जितंस्फटिकगिरिसंकाशंशितिकंठजि
ह्वाशितयः॥ नीलाः॥ कंठजिह्वायस्यतं॥ ५४॥ तद्भोगसुखासनंतस्यानंतस्यभोगोदेहःसुखकरमासनंयस्यतं॥ ५५॥

तस्मिन्महाभोगमनंतमद्भुतंसहस्रमूर्द्धन्यफणामणिद्युभिः॥ विभ्राजमानंद्विगुणेक्षणोल्बणं
सिताचलाभंशितिकंठजिह्वं॥ ५४॥ ददर्शतद्भोगसुखासनंविभुंमहानुभावंपुरुषोत्तमोत्तमं॥
सांद्रांबुदाभंसुपिसंगवाससंप्रसन्नवक्त्रंरुचिरायतेक्षणं॥ ५५॥ महामणिव्रातकिरीटकुंडल
प्रभापरिक्षिप्तसहस्रकुंतलं॥ प्रलंबचार्वष्टभुजंसकौस्तुभंश्रीवत्सलक्ष्मंवनमालयावृतं
॥ ५६॥ सुनंदनंदप्रमुखैःस्वपार्षदैश्चक्रादिभिर्मूर्त्तिधरैर्निजायुधैः॥ पुष्ट्याश्रियाकीर्त्यजया
खिलर्द्धिभिर्निषेव्यमाणंपरमेष्ठिनांपतिं॥ ५७॥ ववंदआत्मानमनंतमच्युतोजिष्णुश्चतद्दर्शनजात
साध्वसः॥ तावाहभूमापरमेष्ठिनांप्रभुर्बद्धांजलीसस्मितमूर्जयागिरा॥ ५८॥ श्री २

महांतोमणिव्रातायेषुतेषांकिरीटकुंडलानांप्रभातयापरिक्षिप्ताः सर्वतःस्फुरंतःसहस्रमपरिमिताःकुंत
लायस्यतं॥ ५६॥ कीर्त्यजयाकीर्त्तिसहितयाअजया॥ अखिलर्द्धिभिरणिमादिविभूतिभिर्मूर्त्तिधराभिः॥ ५७॥ ऊर्जि
तयापिगिरा॥ ५८॥

भा० द० उ० सूतमागधवंदिभिश्चोपगीयमानः ॥ ८ ॥ ९ ॥ ताः क्लिन्नवस्त्रा अतएव विवृतोरुकुचप्रदेशाः ॥ उद्धृतानि स्रस्तानि
१७० बृहत्कवरभ्यः प्रसूनानि यासां ताः ॥ जातेन स्मरेण य उत्सवः तेन लसंति वदनानि यासां ताः ॥ १० ॥ मासो

उपगीयमानो गंधर्वैर्मृदंगपणवानकान् ॥ वादयद्भिर्मुदा वीणां सूतमागधवंदिभिः ॥ ८ ॥
सिच्यमानोऽच्युतस्ताभिर्हसंतीभिः स्मरेचकैः ॥ प्रतिसिंचन्विचिक्रीडे यक्षीभिर्यक्षराडि
व ॥ ९ ॥ ताः क्लिन्नवस्त्रविवृतोरुकुचप्रदेशाः सिंचंत्य उद्धृतबृहत्कवरप्रसूनाः ॥ कांतं स्मरेच
कजिहीर्षयोपगूह्य जातस्मरोत्सवलसद्वदना विरेजुः ॥ १० ॥ कृष्णस्तु तत्स्तनविषज्जितकुंकु
मस्रक्क्रीडाभिषंगधूतकुंतलवृंदबंधः ॥ सिंचन्मुहुर्युवतिभिः प्रतिषिच्यमानो रेमे करे
णुभिरिवेभपतिः परीतः ॥ ११ ॥ नटानां नर्तकीनां च गीतवाद्योपजीविनां ॥ क्रीडालंकारवासां
सि कृष्णोऽदात्तस्य च स्त्रियः ॥ १२ ॥ कृष्णस्यैवं विहरतो गत्यालापेक्षितस्मितैः ॥ नर्मक्ष्वेलिप
रिष्वंगैः स्त्रीणां किल हृता धियः ॥ १३ ॥

स्तनेभ्यो विषज्जितं कुंकुमं यस्यां स्रक् यस्य सः ॥ क्रीडायामभिषंगेन अभिनिवेशेन धूतः कंपितः कुंतलवृंदस्य बंधो यस्य ॥
सः ॥ ११ ॥ १२ ॥ १३ ॥

इतिश्रीसुखसामेनवतीतमः ॥ ८९ ॥ चरमेतुपुनःप्रोक्ताकृष्णलीलासमासतः ॥ यदुवंशप्रसूतानामानंत्यंचसत्कारणं ॥ श्रीम
विम्हतिंसमासेनदर्शयति ॥ सुखंस्वपुर्य्यामिति ॥ सर्वसंपदादिविशिष्टायां ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ श्रियःपतिःषोडशपत्नीना
इतिश्रीमद्भागवतेमहापुराणेदशमस्कंधेद्विजकुमारानयनंनामनवाशीतितमोध्यायः ॥ ८९ ॥ श्री
शुकउवाच ॥ सुखंस्वपुर्य्यांनिवसनद्वारकायांश्रियःपतिः ॥ सर्वसंपत्समृद्धायांजुष्टायांवृष्णि
पुंगवैः ॥ १ ॥ स्त्रीभिश्चोत्तमवेषाभिर्नवयौवनकांतिभिः ॥ कंदुकादिभिर्हर्म्येषुक्रीडंतीभि
स्तडिद्द्युभिः ॥ २ ॥ नित्यंसंकुलमार्गायांमदच्युद्भिर्मतंगजैः ॥ स्वलंकृतैर्भटैरश्वैरथैश्चकनको
ज्ज्वलैः ॥ ३ ॥ उद्यानोपवनाढ्यायांपुष्पितद्रुमराजिषु ॥ निर्विशद्भृंगविहगैर्नादितायांसमंत
तः ॥ ४ ॥ रेमेषोडशसाहस्रपत्नीनामेकवल्लभः ॥ तावद्विचित्ररूपोसौतद्गेहेषुमहर्द्धिषु ॥ ५ ॥ प्रो
त्फुल्लोत्पलकह्लारकुमुदांभोजरेणुभिः ॥ वासितामलतोयेषुकूजद्द्विजकुलेषुच ॥ ६ ॥ विजहा
रविगाह्यांभोह्रदिनीषुमहोदयः ॥ कुचकुंकुमलिप्तांगःपरिरब्धश्चयोषितां ॥ ७ ॥

मेकवल्लभःसन्तासांगेहेषुरेमइत्यन्वयः ॥ ५ ॥ गेहविशेषणंप्रोत्फुल्लेत्यादिश्लोकेन ॥ ६ ॥ तथाह्रदिनीषुचअंभो
विगाह्यविजहारमहानुदयोवैभवंयस्यसः ॥ योषितांकुचकुंकुमैर्लिप्तांगः यतस्ताभिःपरिरब्धः ॥ ७ ॥ ॥ ८८ ॥

भा०द०उ० ॥१४॥ मुकुंदगदितानि रहस्यानि विस्मृत्य ॥ तर्हि कच्चिंतया कच्चित्वं हीणोसि वयमिव स्थगितगीस्तदनुवाकु ॥ हे इंदो
१७१ नस्तत्यैवोपलक्षसे ॥१८॥ अप्रियाचरणं विनास्मरोदीरणेन व्यथाजननं मलयानिलत्ववानुचितमित्यर्थः ॥
१९ ॥ मेघेति ॥ आतपाद्दिहिरण्यादिसाम्यात्त्वया दवेंद्रस्य नून्नं दयितः सखासि अतो भवांस्तं ध्यायति ॥ ध्याने लिंग

भोभोः सदा निष्टनसे उदन्वन्न लब्धनिद्रोधिमात प्रजागरः ॥ किंवा मुकुंदापहृतात्मलांछ
नः प्राप्तां दशां त्वं च गतो दुरत्ययां ॥ १७ ॥ त्वं यक्ष्मणा बलवतासि गृहीत इंदो क्षीणस्तमो न नि
जदीधितिभिः क्षिणोषि ॥ कच्चिन्मुकुंदगदितानि यथा वयं त्वं विस्मृत्य भोः स्थगितगीरुपलक्ष्य
से नः ॥ १८ ॥ किं त्वाचरितमस्माभिर्मलयानिल तेप्रियं गोविंदापांगनिर्भिन्ने हृदीरयसि नः स्मरं ॥ १९ ॥
मेघ श्रीमंस्त्वमसि दयितो यादवेंद्रस्य नूनं श्रीवत्सांकं वयमिव भवान्ध्यायति प्रेमबद्धः ॥ अत्युत्कंठः
सबलहृदयोऽस्मद्विधो वाष्पधाराः स्मृत्वास्मृत्वा विसृजति मुहुर्दुःखदस्तत्प्रसंगः ॥ २० ॥ प्रियरावपदा
नि भाषसे मृतसंजीविकयानया गिरा ॥ करवाणि किमद्य ते प्रियं वद मे वल्गितकंठ कोकिल ॥ २१ ॥
द्वि २

न्याकुः ॥ अत्युत्कंठ इत्यादि ॥ अहो किमिति त्वया तेन सख्यं कृतं ॥ यतो दुःखदस्तत्प्रसंग इति ॥ २० ॥ हे कोकिल प्रियरावस्य प्रि
यवदस्य श्रीकृष्णस्य पदानीव पदानि शब्दांस्त्वं भाषसे ॥ मृतान्संजीवयतीति तथा तया नया कोमलया वल्गितकंठ रम १७१

मुकुंदे कधियः समाहितास्त्वत्तएभागिरं सत्यः ॥ पुनस्तमेव चिंतयंत्योजडंयथाभवतितथायूनिवाक्यान्यूचुस्ता
निमेमत्तोगादतः शृणिवित्यर्थः ॥१४॥ ईश्वरः श्रीकृष्णः स्वपितित्वं तुनिद्राभंगंकुर्वंतीतिविलपसिनशेषेण स्वपिषितद्द
नुच्चिनमित्यर्थः ॥ अथवानापराधस्तवेत्याशयेनाहुः ॥ नलिननयनस्यहासेन सहितंतउदारंयल्लीलेक्षितंतेका चिद्रा

ऊचुर्मुकुंदैकधियो गिरस्तुन्मत्तवज्जडं ॥ चिंतयंत्योरविंदाक्षं तानि मे गदतः शृणु ॥१४॥ महिष्य
ऊचुः ॥ कुररि विलपसि त्वं वीतनिद्रा न शेषे स्वपिति जगति रात्र्यामीश्वरो गुप्तबोधः ॥ वयमिव स
खि कच्चिद्गाढनिर्भिन्नचेता नलिननयनहासोदारलीलेक्षितेन ॥१५॥ नेत्रे निमीलयसि नक्तमदृ
ष्टबंधुस्त्वं रोरवीषि करुणं बत चक्रवाकि ॥ दास्यं गता वयमिवाच्युतपादजुष्टां किं वा स्रजं स्पृहयसे
कवरेण वोढुं ॥१६॥

ढंनिर्भिन्नचेतास्त्वमिति ॥१५॥ नक्तंरात्रावदृष्टबंधुसतीरोरवीषि ॥ किंवानेत्रावत ॥ अपिचवयमिवस्पृहयसे ॥ अ
लब्धनिद्रः ॥ सदानिष्टनसे ॥ क्रोशसिकिंवाअस्माभिःप्राप्तांदशांत्वमपिगतोसि ॥ अहोकष्टं ॥ यथावयंसंभोगे
नमुकुंदापहृतकुंकुमादिलांछनाः ॥ तथात्वमपियतः ॥ अपहृतश्रीकौस्तुभादिलांछनोत्त्रसे ॥१६॥ ॥ ८८

भा०द०उ० २५॥तासां कृष्णेस्वेवंभूतोभावोनालिखितमित्याह॥श्रुतमात्रोपीति॥उरुभिर्गायैर्गीतैः॥उरुधागीतोवायैः॥कैश्चिदपिगीतैः
९७२ यथाकथंचिदपिगीतोवेत्यर्थः॥२६॥पदंस्थानं॥२७॥२८॥२९॥याःरुक्मिणीप्रमुखाअष्टौताउदाहृताःप्रागेव॥३०॥

इतीदृशेनभावेनकृष्णेयोगेश्वरेश्वरे॥क्रियमाणेनमाधव्योलेभिरेपरमांगतिं॥२५॥श्रुतमात्रो
पियःस्त्रीणांप्रसह्याकर्षतेमनः॥उरुगायोरुगीतोवापश्यंतीनांकुतःपुनः॥२६॥याःसंपर्य्यचरन्प्रेम्णा
पादसंवाहनादिभिः॥जगद्गुरुंभर्तृबुद्ध्यातासांकिंवर्ण्यतेतपः॥२७॥एवंवेदोदितंधर्ममनुतिष्ठन्स
तांगतिः॥गृहंधर्मार्थकामानांमुहुश्चादर्शयत्पदं॥२८॥आस्थितस्यपरंधर्मंकृष्णस्यगृहमेधि
नां॥आसन्षोडशसाहस्रंमहिष्यश्चशताधिकं॥२९॥तासांस्त्रीरत्नभूतानामष्टौयाःप्रागुदाहृताः
२२ रुक्मिणीप्रमुखाराजंस्तत्पुत्राश्चानुपूर्वशः॥३०॥एकैकस्यांदशदशकृष्णोऽजीजनदात्मजान्॥या
वत्यआत्मनोभार्य्याअमोघगतिरीश्वरः॥३१॥तेषामुद्दामवीर्य्याणामष्टादशमहारथाः॥आसन्नु
दारयशसस्तेषांनामानिमेशृणु॥३२॥प्रद्युम्नश्चानिरुद्धश्चदीप्तिमान्भानुरेवच॥सांबोमधुर्बृह
द्भानुश्चित्रभानुर्वृकोऽरुणः॥३३॥

वंअष्टोत्तरशताधिकषोडशसहस्रमहिषीणांपुत्रालक्षमेकमशीत्युत्तरैकषष्टिसहस्राणिभवंति॥३१॥३२॥अनिरुद्ध
इति॥अतःपुत्राणांमध्येसप्तदशैवज्ञेयाः॥अथवाअनिरुद्धनामापिकश्चित्पुत्रएवेति॥३३॥ ॥ऽऽ॥ ॥ऽऽ ॥ ऽऽ ९७२

हे क्षितिधर त्वं नवदासि ॥ अतो नूनं महांतमर्थं चिंतयसे ॥ वत तर्हि ॥ अपि किं वयं स्तनैर्विधर्तुं कामयामहे ॥ तथा त्वं स्तनतुले
ऽद्रेर्गौ वेदितुं कामयसे ॥ ऊमिति चेत्तर्हि तवापि अस्मद्दशस्याभविष्यतीति भावः ॥ २३ ॥ भो सिंधुपत्न्यः नद्यः से प्रतिग्रीष्म सिंधु
मेघद्वारा अम्रतवृष्ट्यायुष्मान्नानंदयति ॥ वंत अहो कष्टं ॥ अतः शुष्यतो द्रुः श्यायासांताः ॥ अपगतकमलशोभाः ॥ हे प्रोष्ठ
वयं यथा प्रियतमस्य भर्तुर्मधुपतेः स्मप्रसिद्धं ॥ २४ ॥ तद्देव दैवादागतं हंसं केल्यपि त्वाद्रुः हंसेति नः अस्मान्त्रातिपु

नचलसि नवदस्युदारवृद्धे क्षितिधर चिंतयसे महांतमर्थं ॥ अपि वत वसुदेवनंदनांघ्रिं वयमिव
कामयसे स्तनैर्विधर्तुं ॥ २३ ॥ शुष्यद्ध्रदाः कर्षिता वत सिंधुपत्न्यः संप्रत्यपास्तकमलश्रिय इष्टभर्तुः
यद्वद्वयं मधुपतेः प्रणयावलोकमप्राप्य मुष्टहृदयाः पुरुकर्षिताः स्म ॥ २४ ॥ हंस स्वागतमास्यतां पि
ब पयो ब्रूह्यंग शौरेः कथां दूतं त्वां तु विदाम कच्चिदजितः स्वस्त्यास्त उक्तं पुरा ॥ किं वा नश्चलसौहृदः स्म
रति तं कस्माद्भजामो वयं क्षौद्रालापय कामदं श्रियमृते सैवैकनिष्ठा स्त्रियां ॥ २५ ॥ श्रीशुक उवाच

स्महसितं तं किं वा चलसौहृदः स्मरति ॥ स त्वेवमां प्रस्थापितवानिति चेत् ॥ हे क्षौद्र स्तुद्रस्य दूतक स्मात्तं वयं भजामः ॥ का
मार्थमाह्वयति युष्मदादीति चेद्दत्तमाद्रुः ॥ अहो नितर्हि तं इहालापय अर्थौ कोरय ॥ ऊमिति गच्छे तमिव तं पुनराद्रुः ॥ योऽस्मा
न्वंचयित्वा एकाकिनीरमते ॥ तां श्रियमृते तमेवालापय ॥ सानंदे कनिष्ठा कथं परिहर्तुं शक्यत इति चेद्दत्तमाद्रुः ॥ स्त्रियां जाता
वेकवचनं ॥ अस्मास्तु स्त्रीमध्ये किं सैवैकनिष्ठा न तु वयमित्यर्थः ॥ पागतरेतु क्षौद्रं मधुनहत ॥ मधुरालापमात्रं यस्यतं ॥ अका

[illegible]

भा० द० उ० तेचोत्पन्ना[illegible] इतिप्रत्येकं वह्निभिः रूपैरितिज्ञेयं ॥४३॥ एवमेव यदुकुलेपि देवा इति ॥ तथा चोक्तं सहस्र
१७३ शः समुद्भूता देवा यदुकुले पृथगिति ॥४४॥४५॥४६॥ तस्मात्कृष्णकीर्तिः सर्वतीर्थोत्तमत्वं कृष्णस्य च सर्वदेवोत्तम
त्वेन विचित्रमित्याह तीर्थं चक्र इति इतः पूर्वं स्वःसरिद्देवसर्वतोधिकं तीर्थमित्यासीत् ॥ इदानीं तु यदुषु यदुजाति
जातं तीर्थं श्रीकृष्णकीर्तिरूपं एतत्स्वःसरित्पादशौचं तीर्थमुत्तममल्पं चक्रे ॥ स्वयमेव सर्वतीर्थोपरि विराजते

देवासुराहवहता यें दैत्येयाः सुदारुणाः ॥ ते चोत्पन्ना मनुष्येषु प्रजा दृप्ता बबाधिरे ॥४२॥ तन्नि
ग्रहाय हरिणा प्रोक्ता देवा यदोः कुले ॥ अवतीर्णाः कुलशतं तेषामेकाधिकं नृप ॥४४॥ तेषां प्रमा
णं भगवान्प्रभुत्वेनाभवद्धरिः ॥ ये चानुवर्तिनस्तस्य ववृधुः सर्वयादवाः ॥४५॥ शय्यासनाटनाला
पक्रीडास्नानाशनादिषु ॥ नाविदुः संतमात्मानं वृष्णयः कृष्णचेतसः ॥४६॥ तीर्थं चक्रे नृपोनं यदजनि य
दुषु स्वःसरित्पादशौचं विद्विट्स्निग्धाः स्वरूपं ययुरजितपरा श्रीर्यदर्थेऽन्ययत्नः ॥ ० ॥

यदर्थः ॥ श्रीकृष्णस्य विद्विषः स्निग्धाश्च तत्सारूप्यं ययुरित्यपि न चित्रं ॥ तस्य परमकारुणिकत्वात् तथा चेदं न
चित्रं ॥ किं तत् ॥ अजितपरा जिता केश्चिदप्यशक्यापरा सर्वतः परिपूर्णा श्रीः ॥ कृष्णस्यैव नान्यस्येति ॥ तदेवाह ॥ य
दर्थेन्य ॥ येषां ब्रह्मादीनां यत्न इति ॥ ननु निरपेक्षां तमेव लक्ष्मीः श्रयत इति चित्रमेवेति चेन्न हि ॥ परमसंगोलना

१७३

३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ सहस्राणामपरिमितानां ॥ कुमाराणामित्यन्वयः ॥ ४१ ॥ यदा प्रत्येकं बहूनध्याप

पुष्करो वेदवाहुश्च श्रुतदेवः सुनंदनः ॥ चित्रभानुर्विरूपश्च कविर्न्यग्रोध एव च ॥ ३४ ॥ एतेषामपि रा
जेंद्र तनयानां मधुद्विषः ॥ प्रद्युम्नश्चासीत्प्रथमः पितृवद्रुक्मिणीसुतः ॥ ३५ ॥ स रुक्मिणो दुहितर
मुपयेमे महारथः ॥ तस्मात्सुतोऽनिरुद्धोऽभून्नागायुतबलान्वितः ॥ ३६ ॥ स चापि रुक्मिणः पौत्रीं रो
हिज्ञाजगृहे ततः ॥ वज्रस्तस्याभवद्यस्तु मौसुलादवशेषितः ॥ ३७ ॥ प्रतिबाहुरभूत्तस्मात्सुबाहु
त५ स्तस्य चात्मजः ॥ सुबाहोः शांतसेनोऽभूत्शतसेनस्तु तत्सुतः ॥ ३८ ॥ न ह्येतस्मिन्कुले जाता अध
नाश्च बहुप्रजाः ॥ अल्पायुषोऽल्पवीर्याश्च अब्रह्मण्याश्च जज्ञिरे ॥ ३९ ॥ यदुवंशप्रसूतानां
पुंसां विख्यातकर्मणां ॥ संख्यानशक्यते कर्त्तुमपि वर्षायुतैर्नृप ॥ ४० ॥ तिस्रः कोट्यः सहस्राणाम
ष्टाशीतिशतानि च ॥ आसन्यदुकुलाचार्याः कुमाराणामिति श्रुतिः ॥ ४१ ॥ संख्यानं यादवानां
कः करिष्यति महात्मनां ॥ यत्रायुतानामयुतलक्षेणास्ते सआहुकः ॥ ४२ ॥

यन्नामाचार्याणामियं संख्या ॥ तदपि श्रुतिमात्रं ॥ न तु सम्यक् ज्ञायते ॥ तदा कुमाराणामेव संख्यां कर्त्तुं न शक्यते कर्तुं पुनः सर्वेषां यादवानामिति ॥

तत्तत्कार्यविशेषैः स्वीकृतमत्स्यकूर्मादिनानामूर्तिविशेषस्तोयदूत्तमस्य तदनुरूपानुकारीणि कर्मकषणानि कर्माणि च
श्रूयात् शृणुयादित्यर्थः॥४८॥ श्रवणस्तुतेः फलमाह मर्त्य इति॥ श्रीमत्याः कथायाः श्रवणकीर्तनयुक्तया चिंतया संवर्द्धि-

इत्थं परस्य निजवर्त्मरिरक्षयात्तलीलातनोस्तदनुरूपविडंबनानि॥ कर्माणि कर्मकषणानि यदू-
त्तमस्य श्रूयादमुष्य पदयोरनुवृत्तिमिछन्॥४८॥ मर्त्यस्तयानुसवमेधितया मुकुंद॥ श्रीम-
त्कथाश्रवणकीर्तनचिंतयैति॥ तद्धाम दुस्तरकृतांतजवापवर्गं ग्रामाद्वनं क्षितिभुजोऽ-
पि ययुर्यदर्थाः॥४९॥ चित्रं न चैतदुरुगायविचित्रलीलाविध्वस्तकल्मषकदंबकमुक्तिरू-
पं॥ स्त्रीणां सुदुस्त्यजेह कृतांतजवापवर्गं ग्रामाद्वनं क्षितिभुजोऽपि ययुर्यदर्थाः॥५०॥ इति
श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां वैयासिक्यां दशमस्कंधे श्रीकृष्णलीलाचरिता-
नुवर्णने नवतितमोऽध्यायः॥९०॥

तया तन्निष्ठत्वेन तस्य धाम लोकमेति॥ लोकत्वेपि कालानाकलितमाह॥ दुस्तरेति॥ दुर्लभपुरुषार्थमाह॥ ग्राम-
दिति॥४९॥५०॥ इति श्रीधरस्वामिविरचितायां भावार्थदीपिकायां दशमस्कंधे नवतितमोऽध्यायः॥९०॥ शुभमस्तु॥ १७४

स्कन्धः - दशमः उत्तरार्धं

यन्नामेति ॥ तेपि नाथ स्मरणापेक्षमित्याह ॥ श्रुतमथ गदितमिति ॥ सर्वैध मोश्रयत्वादपीत्याह ॥ यत्कृतो गोत्रधर्मेरिति ॥ गोत्रे
षु तदृषिवंशेषु धर्मो यत्कृतः ॥ येन प्रवर्त्तितः ॥ तस्यापि क्षितिभरहरणं नैव चित्रमित्याह ॥ कृष्णस्येतदिति ॥ कालचक्रायुध
स्येति सर्वसंहारककालमूर्त्तेः ॥ विशेषतो दुरंतप्रभाव चक्रायुधस्य कियदेतदित्यर्थः ॥ ४७ ॥ यतः एवं भूतः श्रीकृष्णः त
तः स एव सर्वोत्तम इत्याह ॥ जयतीति ॥ जनानां जीवानां यो निवासः ॥ आश्रयः तेषु वा निवसति ॥ अंतर्यामितया ॥ तथा सह

यन्नाममंगलघ्नं श्रुतमथ गदितं यत्कृतो गोत्रधर्मः ॥ कृष्णस्यैतन्न चित्रं क्षितिभरहरणं कालचक्रा
युधस्य ॥ ४७ ॥ जयति जननिवासो देवकीजन्मवादो यदुवरपर्षत्स्वैर्दोर्भिरस्यन्नधर्मं ॥ स्थि
रचरवृजिनघ्नः सुस्मितश्रीमुखेन व्रजपुरवनितानां वर्द्धयन् कामदेवम् ॥ ४८ ॥

सो जयति ॥ देवक्यां जन्मेति वादमात्रं यस्य सः ॥ यदुवराः पर्षत्सभासेवकरूपाः ॥ यस्येच्छामात्रेणापि निरस्यन् ॥ समर्थो
पि क्रीडार्थं दोर्भिर्धर्मम् अस्यन् क्षिपन् ॥ स्थिरचर वृजिनघ्नः ॥ अधिकारविशेषानपेक्षमेव वृंदावनगततरुलतादी
नां संसारदुःखहंता ॥ तथा विलासवैदग्ध्यानपेक्षं ॥ व्रजवनितानां पुरवनितानां च सुस्मितेन ॥ श्रीमता श्रीमुखेनैव का
मदेवं वर्द्धयन् ॥ कामस्यासौ दीव्यति ॥ विजिगीषति संसारमिति देवस्तं भोगद्वारा मोक्षप्रदमित्यर्थः ॥ ४८ ॥ ॥ ८८